श्रीगणेशायनमः॥ ॐ नमोभगवतेवासुदेवाय॥ ॐ नमः श्रीशंकरानंद गुरुपादांबुजन्मने॥ सविलासमहामोह

ग्राहग्रासैककर्मिणे॥१॥ एवमुपनिषदेकसमधिगम्यस्यब्रह्मात्मैकत्वविज्ञानस्यनिःश्रेयससाधनत्वमुक्तं॥ ए

तच्चसर्वशाखासंमतमितिदर्शयितुमेतरीयकादिसमस्तोपनिषदर्थस्यसाकल्येनप्रतिपादिकांब्रह्मगीतांव

क्तुंमुनीनांप्रश्नमवतारयंति॥ मुनयऊचुः॥ भवतासर्वमाख्यातंसंक्षेपाद्विस्तरादपि॥ इदानींश्रोतुमिच्छामोब्र

ह्मगीतामनुत्तमां॥१॥ सर्वविज्ञानरत्नानामाकरस्यमहात्मनः॥ कृष्णद्वैपायनस्यैवभवांछिष्यः सुशिक्षितः॥२॥

[illegible] विदितंकिंचिन्नास्तिसत्यंप्रभाषितं॥ यद्विप्रसंन्नोभगवांस्तन्नोवक्तुमिहार्हसि॥३॥ सूतउवाच॥ वक्ष्येता

[illegible] रेणैवब्रह्मगीतामनुत्तमां॥ श्रद्धयासहितायूयंश्रृणुतब्रह्मवित्तमाः॥४॥ अथतांवक्तुंपुरावृत्तमुदाहरति॥

संशया [illegible] पुराकल्पांतरेदेवाः सर्वेसंभूयसादरं॥ विचार्यसुचिरंकालंवेदानामर्थमुत्तमं॥५॥ संशयाविष्ट

[illegible] तपस्तप्त्वामहत्तरं॥ अभिजग्मुर्विधातारंप्रष्टुंदेवामुनीश्वराः॥६॥ यत्रास्तेजगतांनाथः सर्वज्ञः सर्ववि

[illegible] महाकारुणिकःश्रीमान्ब्रह्मासक्तहितेरतः॥७॥ सर्वज्ञः सर्वविदिति॥ सामान्यतः सर्वंजानातीति

[illegible] विशेषेणापिसर्वंवेत्तीतिसर्ववित्॥ यद्वासर्वस्यभासोज्ञश्चेतिसर्वज्ञः॥ सर्वजगदात्मकश्चिदेकरसशरी

[illegible] एवंरूपः परशिवएवहिरजोगुणोपहितः सन्नखिलजगत्सर्जनायब्रह्माभवतिपरशिवस्य

[illegible] सर्वविधस्यज्ञानमयंतपः इति॥ मेरुशृंगेवरेरम्येसर्वयोगिसमावृते॥ यत्र

॥१

Acc. No. 434 M-1512
Title - ब्रह्मगीता.
Author - महादेवाचार्य.
Date - ?
Sub - वेदान्त.
folio - 105
Xerox - 208

[illegible]सगंधर्वसिद्धाद्यैश्च सुसेविते ॥ ८ ॥ नानारत्नसमाकीर्णे नानाधातुविचित्रिते । शकुंतसंघसंजुष्टे नानातीर्थ
समावृते ॥ ९ ॥ गुहाकोटिसमायुक्ते गिरिप्रस्रवणैर्युते । मधुरादिरसैः षड्भिः समन्विते वरोत्तमे ॥ १० ॥ तत्र ब्रह्मवनं ना
म शततयोजनमायतं । शतयोजनविस्तीर्णदीर्घिकाभिः सुसंयुतं ॥ ११ ॥ नानापक्षिसमायुक्तं नानामृगसमाकुलं । स्वा
दुपानीयसंयुक्तं फलमूलैश्च संयुतं ॥ १२ ॥ भ्रमद्भ्रमरसंछन्नसुगंधकुसुमद्रुमं । मंदानिलसमायुक्तं मंदातपसमा
युतं ॥ १३ ॥ नित्यार्तवैर्युक्तं वनमस्ति महत्तरं । तत्र जांबूनदमयं तरुणादित्यसंनिभं ॥ १४ ॥ नवप्राकारसंयुक्तमत्री
तोद्वारसंयुतं । महाबलसमोपेतैर्द्वारपालैश्च कोटिभिः ॥ १५ ॥ खड्गतोमरचापादिशस्त्रयुक्तैश्च रक्षितं । पुष्पप्रकारसं
कीर्णपूर्णकुंभैश्च संयुतं ॥ १६ ॥ ज्वलद्दीपैः समायुक्तं पुष्पमालाविराजितं । विचित्रचित्रसंयुक्तभित्तिकोटिसुशो
भितं ॥ १७ ॥ मुक्तादामैः समायुक्तं वितानैर्मौक्तिकैर्युतं । अभ्रंलिहैर्ध्वजैर्युक्तं प्रांशुतोरणसंयुतं ॥ १८ ॥ नृत्य
गीतादिभिर्युक्तमप्सरोगणसेवितं । नानाविधमहावाद्यैर्नानातालैश्च संयुतं ॥ १९ ॥ मृदुमध्योग्रवाद्याद्यं नाना
काहलसंयुतं । वेदघोषसमायुक्तं स्मृतिघोषसमन्वितं ॥ २० ॥ पुराणघोषसंयुक्तमितिहासैरवान्वितं । सर्वविद्या
र्थैर्युक्तं सर्वशैश्च समावृतं ॥ २१ ॥ अगाधजलपर्यंतमवरोधसमन्वितं । रथकोटिसमायुक्तं कोटिकोटिगजावृतं ॥ २२
कोटिकोटिसहस्रैश्च महाश्वैश्च समावृतं । शस्त्रशास्त्रादिसंयुक्तैरसंख्यातबलान्वितैः ॥ २३ ॥ असंख्यातभटै

ग॰ ५ पु॰ २

निर्मितं राक्षितं पुरमुत्तमं ॥ अस्ति पुण्यवतां प्राप्यमप्राप्यं पापकर्मणां ॥ २४ ॥ तस्मिन्नंतःपुरे शुद्धे सहस्रस्थाणु
संयुते ॥ सर्वलक्षणसंयुक्ते सर्वालंकारसंयुते ॥ २५ ॥ मगतोरणसंयुक्ते कल्पवृक्षसमन्विते ॥ कंठीरवैः रवैर्युक्ते षट्प
दस्वनसंयुते ॥ २६ ॥ मृदुतल्पसमोपेते रत्ननिर्मितमंडपे ॥ देव्या चापि सरः स्वसावर्ण्यविग्रहया सह ॥ २७ ॥ सर्वत्र व्या
र्थभूतस्तत्र स्वानि वसति प्रभुः ॥ तत्र देवाद्द्विजागत्याद दृष्ट्वा लोकनायकं ॥ २८ ॥ नानारत्नसमोपेते विचित्रमुकुटोज्व
लं ॥ रत्नकुंडलसंयुक्तं प्रसन्नवदनं शुभं ॥ २९ ॥ नानारत्नसमोपेतहाराभरणभूषितं ॥ महार्हमणिसंयुक्तं केयूरकर
शोभितं ॥ ३० ॥ विचित्रकटकोपेतमंगुलीयकशोभितं ॥ उत्तरीयकसंयुक्तं शुक्लयज्ञोपवीतिनं ॥ ३१ ॥ नानारत्नसमोपे
तकुंदबंधविराजितं ॥ चंदनागरुकर्पूरक्षोदादिग्धतनूरुहं ॥ ३२ ॥ सुगंधकुसुमोत्पन्ननानामालाविभूषितं ॥ शुक्लवस्त्र
परीधानं नमजांबूनदप्रभं ॥ ३३ ॥ स्वभासा सकलं नित्यं भासयंतं परात्परं ॥ सुरासुरमुनींद्रैश्च वंद्यमानपदांबुजं ॥ ३४
तं दृष्ट्वा सर्वकर्तारं साक्षिणं तमसः परं ॥ महाप्रीतिसमोपेताः प्रसन्नवदनेक्षणाः ॥ ३५ ॥ संजातपुलकैर्युक्ता विवश
त्वागमदस्वराः ॥ प्रकाशितसुखावाप्ता तन्निमग्ना निर्मलात्मतां ॥ ३६ ॥ निर्मलात्मतमिति ॥ निर्मलैः सनकादिभिः
योगिभिः परिवृतमित्यर्थः ॥ ३७ ॥ निरस्तानिखिलध्वांताः प्रणम्य वसुधातले ॥ शिरस्यंजलिमाधाय सर्वे देवाः समा
हिताः ॥ ३८ ॥ तुष्टुवुर्हृष्टमीशानं सर्वलोकपितामहं ॥ मुक्तिदं पुण्यनिष्ठानां दुःखदं पापकर्मिणां ॥ ३९ ॥ देवा

गो

उच्चुः॥ ब्रह्मणेब्रह्मविज्ञान दुग्धोदधिविधायिने॥ ब्रह्मतत्वादिदृक्षूणां ब्रह्मदायनमोनमः॥३९॥ ब्रह्मतत्वमिति॥
ब्रह्मणः परमार्थिकं निष्प्रपंचसच्चिदानंदाखंडैकरसस्वरूपं साक्षात्कर्तुमिच्छतां मुमुक्षूणां ब्रह्मगात्मनः कुरूलक्ष
णब्रह्मरूपबोधकायेत्यर्थः॥३९॥ कष्टसंसारमग्नानां संसारोत्तारहेतवे॥ साक्षिणेसर्वभूतानां साक्षि
हीनायवैनमः॥४०॥ साक्षिणइति॥ सर्वदा सर्ववस्तूनां साक्षिणे साक्ष्यानुप्रविष्टेन स्वरूपचैतन्येनभास
कायेत्यर्थः॥ साक्षिहीनायेति। परमार्थोपाधिविज्ञानकार्यस्य साक्ष्यस्याभावात्तद्धीनः॥४०॥ सर्वधात्रे
विधात्रेच सर्वद्वंद्वापहारिणे॥ सर्वावस्थासु सर्वेषां साक्षिणे वैनमोनमः॥४१॥ सर्वधात्रइति॥ सर्वस्य
जातस्यधात्रे मित्रेविधात्रे निर्मात्रइत्यर्थः॥ सर्वावस्थास्विति॥ सर्वेषां प्राणिनां जाग्रदादिसर्वावस्थासु
साक्षीचैतन्यरूपेणावस्थितायेत्यर्थः॥४१॥ परात्परविहीनायपरायपरमेष्ठिने॥ परिज्ञानवतामात्मस्व
रूपायनमोनमः॥४२॥ परात्परविहीनायेति॥ महदादिभूतभौतिकादिकार्यापेक्षयापरं तस्मादपिप
रमव्यक्तं मायापरपर्यायेन रहितायेत्यर्थः॥४२॥ पद्मजायपवित्रायपद्मनाभसुतायच॥ पद्मपुष्पेणपू
ज्यायनमः पद्मधरायच॥४३॥ सुरज्येष्ठायसूर्यादिदेवतातृप्तिकारिणे॥ सुरासुरनरादीनां सुखदा
यनमोनमः॥४४॥ वेधसेविश्वनेत्रायविशुद्धज्ञानरूपिणे॥ वेदवेद्यायवेदांतविधयेनमोनमः॥४५॥

वै

=विधिहीनायेति

विश्वनेत्रायेति ॥ विश्वस्य सर्वस्य नेत्रवत् प्रकाशक इत्यर्थः ॥ विधये विधिहीनाय विधिवाक्यविधायिने ॥ विधूतकर्मनि
ष्ठानां नमो विद्याप्रदायिने ॥४६॥ विधिर्विधाता अन्योन्यस्य नास्ति स तथोक्तः ॥४६॥ विरिंचाय विशिष्टाय विशिष्टाति
तिहराय च ॥ विषण्णानां विषादाद्विनाशाय नमो नमः ॥४७॥ नमो हिरण्यगर्भाय हिरण्यगिरिवर्तिने ॥ हिरण्यदान
लभ्याय हिरण्यातिप्रियाय च ॥४८॥ हिरण्यदा अमृतत्वं भजंते इति श्रुतेः ॥ शतानंदाय शांताय शंकरज्ञानदायिने ॥ शमा
दिसहितस्यैव ज्ञानदाय नमो नमः ॥४९॥ शतानंदायेति ॥ शतगुणितं गुणितं आनंदो यस्य ॥ शतसंख्यसंसुरेचन जीवनं
यस्य स तथोक्तः ॥४९॥ शंभवे शंभुभक्तानां शंकराय शरीरिणां ॥ शंकरज्ञानहीनानां शत्रवे वै नमो नमः ॥५०॥ नमः
स्वयंभुवे निःसंस्वयंभुवस्त्रदायिने ॥ स्वयंप्रशस्तस्वरूपाय स्वतंत्राय परात्मने ॥५१॥ द्रुहिणाय दुराचारनिरतस्य दुरात्मनः ॥
दुःखदायान्यजंतूनामात्मदायै नमो नमः ॥५२॥ वंद्यहीनाय वंद्याय वरदाय परस्य च ॥ वरिष्ठाय वरिष्ठानां चतुर्वक्त्राय वै न
मः ॥५३॥ प्रजापतिसमाख्याय प्रजानां पतये सदा ॥ प्राजापत्यविरक्तस्य नमः प्रज्ञाप्रदायिने ॥५४॥ पितामहाय पित्रादि
कल्पनारहिताय च ॥ पिशुनागम्यदेहाय पेशलाय नमो नमः ॥५५॥ जगत्कर्त्रे जगद्गोप्त्रे जगद्धंत्रे परात्मने ॥ जगद्दृश्य
विहीनाय चिन्मात्रज्योतिषे नमः ॥५६॥ विश्वोत्तीर्णाय विश्वाय विश्वहीनाय साक्षिणे ॥ स्वप्रकाशैकमानाय नमः पूर्ण
परात्मने ॥५७॥ स्वप्रकाशैकमानायेति ॥ स्वप्रकाशः स्वरूपचैतन्यमेकमेव मानं यस्य स तथोक्तः ॥ स्वरूपप्रकाशो नै
व प्रकाशमानो नानुमानांतरगम्य इत्यर्थः ॥५७॥ स्तुत्याय स्तुतिहीनाय स्तोत्ररूपाय तत्त्वतः ॥ स्तोतॄणामपि स

॥२॥

र्वेषां सुखदायने नमो नमः ॥५७॥ स्तुतिहीनायेति । गुणिनो हि गुणाभिधानं हि स्तुतिः ॥ सा च परमार्थतो निर्गुणस्य न भ-
वतीति हीनः ॥५८॥ सूत उवाच । एवं ब्रह्माणमादित्याः स्तुत्वा भक्तिपुरःसरं । पृष्टवन्त स्तुतेस्त्वेषां वेदानामर्थ-
मादरात् ॥५९॥ वेदानामर्थमिति । समस्तैर्वेदैस्तात्पर्येण प्रतिपादितो योऽर्थः स कीदृग्विध इति पृष्टवंत इत्यर्थः ॥
॥५९॥ ब्रह्मापि ब्रह्मविन्मुख्याः सर्वदेवैरभिष्टुतः ॥ आह गंभीरया वाचा वेदानामर्थमुत्तमं ॥६०॥ इति श्रीस्कंदपु-
राणे सूतसंहितायां यज्ञवैभवखंडे इति श्रीमत्काशीविलासश्रीक्रियाशक्तिपरमभक्तश्रीमत्त्र्यंबक-
सेवापरायणेनोपनिषन्मार्गप्रवर्तकेन श्रीविद्यार्णवाउचार्येणोवाचार्येविरचितायां सूतसंहिताव्याख्याता-
त्पर्यदीपिकायां यज्ञवैभवखंडे उपरिभागे ॐ ब्रह्मगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे सूतर्षिसंवा-
दे प्रथमोऽध्यायः ॥१॥ ॐ नमो रामाय ॥ अथ ब्रह्मापि पृष्टः सकलवेदानामर्थं वक्तुमारभमाणस्तस्य विवक्षितस्या-
द्वितीयनिर्गुणब्रह्मस्वरूपात्मकस्य वेदार्थस्याभिधानस्याविषयत्वं तावदाह ॥ ब्रह्मोवाच ॥ अवाच्य एव वेदार्थः
सर्वथा सर्वचेतनैः ॥ तथापि वक्ष्ये भक्तानां युष्माकं भणुताऽऽदरात् ॥१॥ अवाच्य इति । उक्तविधब्रह्मलक्षणो वे-
दार्थः सोऽयं शब्देन सर्वप्रकारेणाप्यभिधातुं साक्षात्प्रतिपादयितुमशक्य एव ॥ तस्य निर्गुणत्वेन तत्र जातिगु-
णक्रियादीनां शब्दप्रवृत्तिनिमित्तानामभावात् ॥ अत एव श्रुतिस्तस्य वागगोचरत्वं दर्शयति । यतो वाचो नि-
वर्तंत इति । तथापीति । एवमभिधानस्याविषयत्वेऽपि लक्षणादस्य प्रतिपादयिष्याम इत्यर्थः ॥१॥ तत्र ताव-

मभा ६

भि २

नन्वृग्वेदस्याथर्वणीयोपनिषच्छ्रुतिप्रायमर्थं वक्तुकामः एष पंथा एतत्कर्मेत्यादि सगुणस्याध्ययनैकाग्र्यादि
जननद्वारा निर्गुणभागशेषत्वादनन्यशेषतया स्यात्तं त्रैगुण्यफलवत्तद्ब्रह्मात्मैक[illegible]त्वविज्ञानजनकस्या
त्मा वा इदमेक एवाग्र आसीदित्यादिनिर्गुणभागस्येवार्थं संगृह्णाति॥ आत्मसंज्ञ इत्यादिना॥ तत्र जल
विकारस्य तरंगबुद्बुदादेर्वस्तुतः कारणजलस्यैव [illegible] नातिरेकवन्नामरूपविकारात्मककार्यप्रपंचस्या
पि कारणभूतात्॥ अद्वितीयात्परमेश्वराद्व्यतिरिक्तसंसाध्यायेनुत्तत्सकाशात्सृष्टिराम्नायते॥ आत्मा वा
इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्स ईक्षत लोकान्नु सृजा इति स इमांल्लोकानसृजतेत्यस्याः
श्रुतेरर्थं ब्रूते॥ आत्मसंज्ञः शिवः शुद्ध एक एवाद्वयः सदा॥ अग्रे सर्वमिदं देवा आसीच्चिन्मात्रमास्ति
काः॥ २॥ आत्मेति॥ आत्मैवोपादानकारणतया स्वकार्यभूतं सर्वं जगदंतर्बहिश्च व्याप्नोतीत्यात्मा॥
उक्तं हि॥ यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह॥ यच्चास्य संततो भावस्तस्मादात्मेति गीयते॥ यच्चात्म
ज्ञः सच्चिदानंदलक्षणः परशिव एव॥ न तु प्रधानं परमाण्वादिकं वा परानभिमतं तत्स्याचेतनत्वेनानात्मत्वा
त्॥ यतो यं शिवः अत एव शुद्धः अशुद्धेः कर्मसंबंधहेतुकत्वाद्भगवति तस्मिंस्तत्संबंधस्य च प्रागेव नि
रस्तत्वात्॥ उक्तं हि॥ ब्रह्मणः कर्मसंबंधाभावं चाह परा श्रुतिरिति॥ तस्याद्वय इति विशेषणेन विजातीयभे
दनिरासः॥ एवकारेण सजातीयांतरनिरासः॥ एक इति स्वगतभेदनिरासः॥ सृष्टिप्राक्कालवत्सृष्ट्युत्त

॥४॥

रकालमपि निर्विकारतया तस्य परमेश्वरस्य दृग्रूपत्वमिति द्योतयितुं सदेति विशेषणं ॥ अग्रे सृष्टेः प्राक्काले इ
दं परिदृश्यमानं नामरूपात्मकं सर्वं जगत् उक्तलक्षणमेवासीत् । अव्यालक्षितात्मना तत्स्वरूप एव लीनमासीदित्य
र्थः ॥२॥ मात्र चोत्पन्नबद्धे द्वैदर्शयति । ततो नान्यन्निम X स्वरूप X यात्किंचित्स पुनः कालपाकतः ॥ प्राणिनां कर्मसंस्क
रात्स्वशक्तिगतसत्तः ॥३॥ ततस्तस्मादात्मस्वरूपादन्यन्नामरूपाभिन्नापृथग्भूतमपि पस्फुरत्स्वकाशमानं कि
मपि वस्तु नाभौसीदित्यर्थः ॥ एवं कारणात्मनासद्भाव प्रतिपादनाद् सदेव कार्यमुत्पद्यत इति पक्षो निरस्तः ॥ ननु
एवमसंगोदासीनस्य स्वप्रतिष्ठस्याद्वितीयस्याशरीरस्यात्मनः स्रष्टव्यपर्यालोचनरूपमीक्षणं कथं संभवतीत्या
शंक्याह । स पुनरिति । अतीतकल्पसंचितानि प्राणिकर्माणि स्वकारणभूतमायया सह संहृतिसमये परशिवस्व
रूपे वासनाशेषतया प्रलीनानि कालवशात्सृज्यंते । स्वफलप्रदानोन्मुखत्वलक्षणमतिशयं प्राप्नुवंति । तस्माच्च का
लकेतात्सा कालस्य खुः परमेश्वरस्य सिसृक्षा हेतुभूतः कर्मजनितः पूर्वोत्तरपर्यायः संस्कार उद्बुध्यते ॥ उद्बुद्धाच्च
तस्मात्संस्कारात् परशिवस्य या शक्तिस्त्रिगुणा माया तेन च रजस्तमोभ्यामसंस्पृष्टं यद्विशुद्धं सत्त्वं तस्मादुद्भूतात्तदुपाधिव
लात्सिसृक्षारूपमीक्षणं जायत इत्यर्थः ॥३॥ कथमीक्षितवानिति । तदुच्यते । सोऽरक्षत जगत्सर्वं नु सृजा इति शं

श्रीः

करः॥ नामरूपात्मकं यदिदं सर्वं जगदेतावंतं कौ विलीनमासीत्॥ तत्र नु सृजा इति नुशब्दो वितर्के तत्सृजा इ
तिकिमित्येवंरूपपालोचितवानित्यर्थः॥ अत्र सर्वं जगदिति वदता लोकान्नु सृजा इति लौकिकलोकसृष्टिप्रतिपा
दिकायाः श्रुतेराकाशादिभूतसृष्टिरपि विवक्षिता॥ सा तु उपसंहारन्यायेन सिद्धेति प्रयोजनाभावात्पृथगुक्ते
त्यभिप्रायो वर्णितः॥ एवमीक्षणानंतरं किं कृतवानिति तदाह॥ स पुनः सकलानेतांल्लोकानामधिपशक्तितः॥४॥
यथापूर्वं क्रमेणैव सुरानसृजत प्रभुः॥ स पुनरिति॥ अंभो मरीचिर्मरमाप इति ये लोकाः श्रुत्यानुक्रांतास्तानेता
न्सर्वान्लोकान्स परमेश्वरः प्रभुः स्वतंत्रोपि सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयदिति श्रुतेरतीतकल्प
क्रमानुसारेणैव आत्मीयशक्तितः॥ आत्मनश्च स्वसंबंधिनी जगदाकारेण विवर्त्तमानाया त्रिगुणा माया
शक्तिस्तद्बलात्सम्यक्सृष्टवानित्यर्थः॥ अंभः प्रभृतीनां निर्वचनं च श्रुत्यैव प्रतिपादितं॥ अदोंभः परेणा
दिवं द्यौः प्रतिष्ठांतरिक्षं मरीचयः पृथिवी मरो या अधस्तात्ता आप इति स्वर्लोकादिसत्यलोकांता अंभःशब्द
वाच्याः मरीचय इत्यंतरिक्षलोकः मर इति मर्त्याश्रितो भूर्लोकः तस्य अधस्तादतलाद्याः सप्त अप्शब्द
वाच्या इति तस्याः श्रुतेरर्थः॥ अत्र सृष्टृशब्देन परमेश्वरत्वमुक्तं॥ तथात्वं च त्रिगवज्ञाप्यकारैरव्याप्तस्मृष्टहि

१

तिरितिा इव कुलरादित्याधिकरणस्य प्रथमवर्णकेनिर्णीतं।तथाहि।किमत्रस्त्रष्टृत्वेनोक्त आत्मा विराट्।उत परमेश्व

६ रैति विषये आत्मन आकाशः संभूत इति परमेश्वरकर्तृकसृष्टेराकाशादिमहाभूतविषयत्वादत्र च स इमांल्लोकान

सृजतेति सृष्टेर्व्यतिरेकेण विराट्कर्तृकलोकसृष्टेरेवोपादानात्तत्प्रयोगामानात्मनो भौक्ष्यमानयदिति गवानयनादिश

ण रीरधारिव्यवहारदर्शनादेकएवेत्यद्वितीयत्वावधारणस्य च स्वविकारप्रपंचापेक्षयाप्युपपत्तेर्विराडेवात्रस्त्रष्टृत्वेनोक्तः।

अस्मेति प्राप्तेऽभिधीयते।उपरिष्टाद्धि पृथिवी वायुराकाश आपो ज्योतींषीत्यादिना महाभूतैः सह सर्वकार्यजातम

नुक्रम्य सर्वं तत्प्रज्ञानेत्रमिति प्रज्ञा ब्रह्मपरत्वश्रवणादुपक्रमेऽपि महाभूतसृष्टिरूपसंहर्तव्या।तथा च भूतसृष्टि

विषयत्वात्।परमेश्वर एवात्रस्त्रष्टा।एवं चैकत्वावधारणमपि न कदर्थितं भवति।गवाद्यानयनं तु विद्यास्तुत्यर्थं

त्वान्न विरुध्यते।तथा चोक्तं।आत्मा वा इदमित्यत्र विराट् स्यादथ वेश्वरः।भूतास्पष्टेर्नेश्वरः स्यात्कुवाद्यानयनाल्लो

द्विराट्।।भूतोपसंहृतेरीशः स्यादद्वैतावधारणात्।अर्थवादो गवाद्युक्तिर्ब्रह्मात्मत्वं विवक्षितमिति।।एवं लोकसृ

ष्टिप्रतिपादनेन परमेश्वरस्वरूपं तटस्थेन लक्षितं।अथ श्रुत्युक्तलोकपालादिसृष्टेरपि स्वरूपलक्षकत्वरूपस्य

प्रयोजनस्यैकत्वेन गतार्थत्वादन्यस्य च सर्वस्य।स एतमेव सीमानं विदार्येत्यादेः प्रज्ञाप्रतिष्ठा प्रज्ञानं ब्रह्मेति ब्र

त्मामैकश्चेलक्षणप्रतिपादकवाक्यद्वयमत्वा सर्वपरि सज्ज्ञकोयमात्मेत्यादिवाक्यसंदर्भप्रतिपादित
मर्थंविवक्षुकामस्तंप्रपद्याभ्यांप्राप्येतव्रलेमंपुरुषं ॥ एतमेवसीमानीविदार्यैतयाद्वारा प्रापद्यतेतिश्रुतिव
त्सासादाग्रा श्यांब्रह्मरंध्राच्च प्रविष्याः क्रियाशक्तिज्ञानशक्तिलक्षणयोर्वृत्त्योर्मध्ये कतरः स आत्मेति जा
यमानेसंशये ह्यात्मा द्विविप्रतिपत्तेरपि तद्वृत्तत्वात्तमुदाहरंति ॥ तेहरमित्यादिना । तेहरकेचिदिच्छंतिकेचि
द्दृष्ट्वा सुरोत्तमाः ॥ ५ ॥ केचिन्मामेवचेच्छंतिकेचिदिंद्रादिदेवताः ॥ केचित्प्रधानं त्रिगुणास्वतंत्रं केवलं जडं ॥ ६ ॥
यः स्रष्टृत्वेनोक्तमात्मानमिच्छंति ॥ ५ ॥ केचित्प्रधानमिति ॥ सांख्याहि अचेतनोपादानमितितस्यैवस्वतंत्रत्वमिच्छं
ति ॥ वेदांताभिमतमायातो वैलक्षण्यमाह ॥ स्वतंत्रमिति । सा हि परमेश्वराश्रितया न स्वतंत्रा ॥ ६ ॥ अणवः
केचिदिच्छंति मुद्गादिकेन वैभाषिताः ॥ क्षणप्रध्वंसिविज्ञानं केचनप्रोतत्वतः ॥ ७ ॥ अणवः केचिदिति ॥ न्यू
नपरिमाणोर्ध्व वयवेरधिकपरिमाणस्यघटादेरारंभे दर्शनात् सार्थिवादिपरमाणव एव द्व्यणुकादिप्रक्रिय
या प्राणस्य एव क्रमात् सर्वं जगदारंभंत इति नैयायिकाः ॥ शब्दं केचनेति ॥ वैयाकरणास्तु शब्दब्रह्मैवार्थप्रपंचा
त्मना विवर्त्तः ॥ इति शब्दस्य कारणत्वं वर्णयंति ॥ उक्तं हि । अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरं ॥ विवर्त्तते
र्थभावेन प्रक्रिया जगतो यत इति ॥ ॥ अन्यसंज्ञं सुराः केचिन्नीरूपं स्वस्यविमाहिताः ॥ केचिद्भूतानि चेच्छंति वि
सर्गं केचन कर्म्म तु ॥ ८ ॥ भूतानि चेच्छंतीति ॥ भूतेभ्य एव भौतिकस्य सर्वस्योत्पत्तिदर्शनात्तेषामेव स्रष्टृ
त्वे जगतो जडस्यानुपपत्तेस्तदनुरूपमचेतनं सत्त्वरजस्तमोगुणात्मकं प्रधानमेव जगदुपादान

ननु तद्व्यतिरिक्तः कश्चित्स्रष्टा विद्यत इति केषांचित्पक्षः। अपरे तु अश्वं तानन कदाचिदनीदृशं जगदिति सर्गं विदन्
स्तातिमन्यंते ॥ तथा श्रुतावपि जगत्करणवादिविप्रतिपत्तिर्दर्शिता ॥ कालस्वभावो नियतिर्यदृच्छा भूतानि योनिः
पुरुष इति चिंत्यमिति ॥८॥ तत्र तत्रैव तत्कर्तृत्वं प्रवदंतीत्यथावत् ॥ सर्ववादाः श्रुतिस्मृत्योर्विरुद्धा इति मम मतिः ॥९॥
श्रुतिस्मृत्योर्विरुद्धा इति। सोऽकामयत बहु स्यां प्रजायेयेति तदात्मानं स्वयमकुरुत ॥ मत्तः परतरं नान्यत्किं
चिदस्ति धनंजय ॥ मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ मया ध्यक्षेण प्रकृतिः सूयते सचराचरमित्या
दिश्रुतिस्मृतिभ्यां चेतनस्य परमेश्वरस्य जगदुपादानत्वं निमित्तत्वं च श्रवणात् नहि रहतया वादिविप्र
तिपत्तेरप्रामाणिकत्वाच्च अहेतुकः संज्ञायां जगत्कारणं नास्तीति सिद्धमात्मसंज्ञः शिव इति प्रतिज्ञातं ॥९॥
नन्वेवं श्रुतिस्मृतिविरोधात् सांख्यादिशास्त्राणामप्रामाण्ये कथं तत्र वेदानां तीर्थकराणां प्रवृत्तिरित्याशं
क्य तत्र प्रवृत्तौ पापमेव कारणमित्याह ॥ ॥ पापिष्ठानां तु जंतूनां तत्र तत्र सुरर्षभ सा ॥ प्राक्संस्कारवशा
देव जायते रुचिरास्तिकाः ॥१०॥ पापिष्ठानामित्यादिना ॥ तपि कालविपाकेन श्रद्धया च तया पुनः ॥ पुरात
चिरंतनं ॥१२॥ तत्सोपानक्रमत इति ॥ स्वशास्त्रादौ मानात्मविविवेकसामान्येन जनानां सांख्यादयस्तो हि
शेषप्रतिपादकमुपनिषन्मार्गं परंपरया समाश्रयंत इत्यर्थः ॥१२॥ प्राक्संस्कारवशादेव यो वैचित्र्यबलाबलं ॥

विवशा वेदमापन्नास्तेपि कैवल्यभागिनः॥१३॥ विविंस्यबव्लावव्ले इति। वेदमार्गमाश्रितास्तेस्वशास्त्रेवेदस्य
...वगावले विचार्य पुरुषबुद्धिप्रभवैस्येनैशास्त्रस्य दौर्बल्यं इत्यर्थः॥१४॥ वेदमार्गमिमंमुक्तामार्गम
न्यंसमाश्रिताः॥ हस्तस्थंपायसंत्यक्त्वा लिहेत्कूर्परमात्मनः॥१५॥ विनावेदेनजंतूनांमुक्तिमार्गांतरेणचेत्।तमसापि
विनालोकंतेपश्यंति घटादिकं॥१६॥ अपौरुषेयत्वेन वेदस्य चनिर्दिष्टंप्रामाण्यंनिश्चित्यनास्तिकसरतंत्राःस्वमा
र्गं परित्यज्य वेदमार्गमेव केवलमाश्रयंते। अतः सोपानक्रमेण तेषामपि वेदोदितामुक्तिर्भूयसाकालेन सिध्यतीती
त्यर्थः॥ तस्माद्वेदोदितोऽर्थः सत्यंसत्यंमयोदितं॥ अन्यैर्नैवोदितोऽप्यर्थो न सत्यः परमार्थतः॥१९॥ तस्मादिति।
यस्मादेवंमार्गांतराणामपि वेदे पर्यवसानं तस्मादपौरुषेयत्वेन निर्दुष्टवेदवाक्यप्रतिपादित एवार्थः सत्यः॥ ननु वेदव्य
तिरिक्तेनेत्यर्थः॥१९॥ ननु वेदप्रतिपादितोर्थः सत्यश्चेत्तर्हि क्रियाकारकादिभेदभिन्नस्य जगतोप्यास्माद्वेदादर्थतयास
त्यत्वं स्यादित्याशंक्य तस्य व्यावहारिकसत्यत्वं प्रतिपादयितुं वेदार्थस्य द्वैविध्यमाह परमार्थ इति। परमार्थो द्विधाप्रो
क्तो मया हे स्वर्गवासिनः॥ एकः स्वभावतः सोऽन्यः परमार्थः सदैव तु॥१७॥ वेदेहि कांडद्वयं।तत्रैककांडे सत्यज्ञानादि
लक्षणो योऽर्थः प्रतिपादितः स एव साक्षात्परमार्थः॥ कर्मकांडप्रतिपादितस्तु स्वर्गपश्वादिदेवतालक्षणः प्रपंचः स
त्यज्ञानादिलक्षणे परमात्मन्यध्यस्तमायया परिकल्पितः॥ तदेतत्कांडद्वयस्य कल्पिताकल्पितविषयत्वं मागपि
प्रपंचितं॥१७॥ साक्षीवः सत्यचैतन्यः सुखानंतस्वलक्षणः॥ अपरः कल्पितः साक्षाद्भूतपाण्यस्तमायया॥१८
सत्याद्वैतपरः कश्चिद्वेदभागः समासतः॥ कल्पितद्वैतनिष्ठस्तु वेदभागोपरस्तथेति॥१८॥ यद्येवं कल्पितद्वैतपरः

स्मान

॥१८॥

कर्मकांडस्तोर्हि सर्वोपि वेदार्थः सत्यइत्यु इति नियमो न स्यादित्यत आह ॥ कल्पितानामवस्तूनां मध्ये केचन मायया ॥
परमार्थतया क्लृप्ता व्यवहारे सुरर्षभाः ॥ १९ ॥ व्यवहारे तु संक्लृप्ताः केचनापरमार्थतः ॥ आकाशादि जगच्छुक्तिरूप्ये
ति कथितेमया ॥ २० ॥ कल्पितानामिति ॥ सर्वस्य मायापरिकल्पितत्वेनैनावस्तुत्वेप्याकाशादिकं व्यावहारिकं स
त्यत्वेनैव परिकल्प्यते ॥ शुक्तिरूप्यादिकं तु व्यवहारेप्यसत्यं तथैवेति ॥ २० ॥ जगतोपि व्यावहारिकसत्यत्वांगीकारेन
वेदार्थस्य सत्यत्वहानिरित्याह ॥ व्यावहारिकसत्यार्थं साक्षात्सत्यार्थं चिद्घनं ॥ उभयं वक्ति वेदस्तु मार्गा नैवं वदं
ति हि ॥ २१ ॥ व्यावहारिकेति ॥ सति प्रमातरि अबाध्यमानं जगद्व्यावहारिकसत्यं कदाचिदपि बाधविधुरं सत्यज्ञा
नानंदैकरसं ब्रह्म तद्धि परमार्थतः सत्यं ॥ तदुभयं वेदः प्रतिपादयति ॥ मार्गांतरं तु नैवमित्यर्थः ॥ २१ ॥ किं तर्हि मार्गां
तरैः प्रतिपादितमिति तदाह ॥ स्वप्नेस्वादिना ॥ स्वप्नावस्थाकसंक्लृप्तसत्यार्थेन समानिमान् ॥ अर्थान्नैवागमनं स्वन्ये
मार्गा हे स्वर्गवासिनः ॥ २२ ॥ जाग्रत्काले तु संक्लृप्तसत्यार्थेन समानिमान् ॥ मार्गा एवागमनं स्वर्थान्का कथा सत्य
सत्यचिद्घने ॥ २३ ॥ अन्ये सौगतनिर्मिता मार्गाः स्वप्नावस्थापरिकल्पितसत्यार्थसदृशान् जाग्रद्दर्भानेव केवलं प्र
तिपादयंति ॥ न तु वैदिकं साक्षात्सत्यमात्मानं ॥ अन्ये तु वैशेषिकादिमार्गा जाग्रदवस्थायां व्यावहारिकसत्त्वेन
मायापरिकल्पितो यो वेदांताभिमतस्तत्सदृशान् द्रव्यगुणकर्मलक्षणानर्थानेव केवलं प्रतिपादयंति ॥ अतो मा
र्गाणां सत्यचिद्घने पारमार्थिके वस्तुनि का कथा प्रतिपादनप्रसक्तिरपि नास्तीत्यर्थः ॥ २२ ॥ २३ ॥ तस्मादिति ॥

तस्मादेकैकपादद्वयमार्गाः सत्यार्थभाषिणः॥ द्वयंतरेण तेषां ताद्दृतिसम्यङ्निरूपणं॥२४॥ व्यावहारिकस
त्यस्य जगत एव प्रतिपादनात्पारमार्थिकसत्यापि द्वन वस्तुनो प्रतिपादनाच्चेत्यर्थः॥ एकैकपादद्वयेति व्यावहा
रिकदृष्ट्या॥ द्वयंतरेणेति पारमार्थिकदृष्ट्या इत्यर्थः॥ व्यावहारिकसत्यस्याकाशादिजगतः पारमार्थिकसत्वे
नान्यथाग्रहणात्तेषां भ्रांतत्वं॥२४॥ ननु व्यावहारिकसत्यत्वमेव पारमार्थिकसत्यत्वं न त्वेकमेव वस्तु दृष्टि
भेदमात्रेण सत्यमसत्यं च भवतीत्यत आह॥ चैतन्येति॥ चैतन्यापेक्षया चेतत्संव्योमादि सकलं जगत्॥ असत्यं
स्यं स सत्यं तत्त्वं कुंभकुड्याद्यपेक्षया॥२५॥ मल्लोहादिकारणेषु सत्कृतत्र घटादिकार्यलयदर्शनात्कारण
मात्रस्य सत्यत्वं कार्यस्य चासत्यत्वं प्रसिद्धं॥ तथा च कारणभूतं परब्रह्म चैतन्यमपेक्ष्य तत्कार्यं [illegible] चेत्यं
वियदादिभूतजातमसत्यं॥ तच्च घटकुड्यादिलक्षणस्वकार्यस्य कारणभूतं सत्तदपेक्षया सत्यं॥२५॥ कुंभ
कुड्यादयो भावाः अपि व्योमाद्यपेक्षया॥ असत्याः सत्यरूपास्ते शुक्तिरूप्याद्यपेक्षया॥२६॥ कुंभकुड्यादयो वि
स्वकारणभूतवियदादिमहाभूतापेक्षया असत्या अपि सत्यैव प्रमातरि बाध्यमानं शुक्तिरजतादिकमपेक्ष्य
सत्याः॥ सति प्रमातर्यबाध्यमानत्वात्॥२६॥ जाग्रदित्यादि तावस्थामपेक्ष्य स्वप्न नाभिधा॥ अवस्था सत्यरू
पिनेसत्या हि दीर्घकालः॥२७॥ तथा जाग्रदवस्थास्वकारणमपेक्ष्यासत्यापि सति प्रमातरि बाधविरहरूपाव
स्था वैलक्षण्यात्सत्या तामपेक्ष्य स्वप्नावस्थापि सत्ये च प्रमातरि बाधितत्वाद सत्येव॥ एवमेकस्यैव वस्तु॥२८॥

नोव्यवहारदृष्ट्या सत्यत्वं परमार्थोपाधावसत्यं तं च न विरुध्यत इत्यर्थः ॥ २७ ॥ यद्येवं परमार्थदृष्ट्या असत्यस्यैव स
त्यतया अध्यवसायान्मार्गाः श्रौतास्तर्हि मिथ्याभूतानीतेषां परं परस्परमपि कथं ॥ वेदमार्गा वासिद्धा परमार्थस
त्यचिद्घनपरशिवस्वरूपावाप्तिहेतुत्वं मिथ्यानां कथं सदृष्टान्तमुपपादयति ॥ तथापि स्वप्नदृष्टेनु वस्तुक स्वर्गनि
वासिनः ॥ स्रक्चंदनादिमवत्येव जाग्रत्स्वसाध्यसिद्धये ॥ २८ ॥ तथापीति ॥ यद्यपि स्वप्नावस्था मिथ्याभूता तथापि स्व
प्नदृष्टं वस्तु भाविनः सत्यस्य फलस्य सत्त्वं भवति ॥ सूचकश्च हि भगवता व्यासेनापि स्मृतेति ॥ सूचकस्य हि श्रुते
राचक्षते च तद्विद इति ॥ सा च श्रुतिरेवमाम्नाता यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति ॥ समृद्धिं तत्र जानीया
दिति ॥ २८ ॥ तथैव मार्गाः सुष्ठ्वाता अपि वेदोदितस्य तु ॥ अर्थस्य प्राप्तिसिद्ध्यर्था भवंत्येव न संशयः ॥ २९ ॥ तथा चै
वं तथैव मिथ्याभूता अपि मार्गा वेदप्रतिपादितस्य सच्चिदानंदानंदैकरसस्य परमार्थसत्यवस्तुनः सोपानक्रमे
ण प्राप्तिहेतवो भवंतीत्यर्थः ॥ २९ ॥ तस्माद्वेदेतरा मार्गा नैव ग्राह्या निरूपणे ॥ वेदनिष्ठस्तु तन्मार्गान्कदाचि
दपि न स्पृशेत ॥ ३० ॥ वेदनिष्ठस्तु मार्गांस्तान्मोहेनापि स्पृशेद्यदि ॥ प्रायश्चित्तं सवस्यैव नात्र कार्या विचारणा ॥ ३१ ॥
एकस्यामपि तैः सार्धं पंक्तौ चैकत्र संस्थितः ॥ मोहेनापि न भुंजीत भुक्त्वा चांद्रायणं चरेत् ॥ ३२ ॥ ईज्यादानविवा
हादि कार्यमध्ययनं श्रुतेः ॥ यदि तैर्मोहितैः कुर्यात्कुर्याच्चांद्रायणत्रयं ॥ ३३ ॥ धर्माधर्मादिविज्ञानेनादर्दीन श्रुतौ स्थि
तः ॥ तेषां मोहादपि प्राज्ञः श्रेयस्कामी कदाचन ॥ ३४ ॥ वेदबाह्येषु मार्गेषु संस्कृतायेन राक्षुराः ॥ नहि पापं विंडिनः

नार्चयिष्यंति ०॥३७॥

साक्षान्नथोते सहवासिनः॥३५॥ श्रौतस्मार्तविवेकानुष्ठानारः॥ कुकोजगद्रूह्निथा नारी शिवस्त्यादिलक्षणे॥ नार्च यिष्यंति वेदेन पाषंडोपहताजनाः॥३६॥ वेदसिद्धं महादेवं सांबं चंद्रार्धशेखरं॥ वेदोक्तेनैवमार्गेणाभस्मने वत्रिपुंड्रकं॥ धूलनेनार्चयिष्यंति ०॥३८॥ रुद्राक्षधारणेनैस्त्व्यावेदोक्तेनैव कर्मना॥ नकरिष्यंति मोहनः॥३९॥ लिंगे दिने दिने देवं शिवरुद्रादिसंज्ञितं॥ नार्चयिष्यंतिवेदेन ०॥४०॥ देवकार्यं नकुर्वंति पितृकार्यं विशेषतः॥ औप सनं नकुर्वंति ०॥४१॥ पंचयज्ञं नकुर्वंति तथैवातिथिपूजनं॥ वैश्वदेवं नकुर्वंति ०॥४२॥ वेदबाह्येनमार्गेणपूजयंति जनार्दनं॥ निंदंति निर्गीकरैमोहात् ०॥४३॥ ब्रह्माणं विष्णुं वं रुद्रं भेदभावनमोहिताः॥ पश्यंत्येकं नजानंति ०॥४४॥ अदक्षिणमनाघ्यंगामधोतचरणीतथा॥ कुर्वंत्यनग्निकं श्राद्धं ०॥४५॥ एकादश्यामथाष्टम्यां चतुर्दश्यां विशेषतः॥ उपवासं नकुर्वंति॥४६॥ शतरुद्रीयचमकेस्तथापौरुषसूक्तकैः॥ नाभिषिंचंति देवेशं ०॥४७॥ नमस्ते रुद्र इति शतरुद्रीयस्य सर्पं इति नैत्तिरीयशाखायां काठकश्रम श्रुतेः॥१२॥ असौ विष्णु इति वसोर्धारायाः काठ कश्रुतेः निगदव्याख्यानमन्यत्॥६६॥१६॥२॥२॥४॥८॥ षट्षष्टिर्नीलसूक्तं च पुनः षोडशमेवचा॥ एवंतेहनम स्तेहनतीविहृयमेवच॥ मादुष्टमेति चत्वारि वर्येसामाष्टजपेत्॥ ॥ सप्ताससत्यक्षप्रभूतायज्ञातसरवा का अर्धर्युशाखास्तासु सर्वासु गतमित्यर्थः॥ शतरुद्रीयमधीते सोऽग्निपूतो भवति इत्यादिवाक्यैः पूर्वोक्तं॥१००॥ चिरंतनानिरस्थान्नानिशिवस्यपरमात्मनः॥ नद्रक्ष्यंति महाभक्त्यापापा ०॥४८॥ श्रीमद्दक्षिणकैलासवक्तनेश्र ८

अन्येषु चाश्रमेषु शिवस्थानेषु वर्त्तनं ॥ वत्सरं न करिष्यंति पा० ५१ ॥

यासह वत्सरेन रिष्यंति पा० ॥ ४९ ॥ श्रीमद्व्याघ्रपुरे पुण्ये वर्त्तनं भुक्तिमुक्तिदं ॥ वत्सरेन० ॥ ५० ॥ दिने दिने तु वेदांत
महावाक्यार्थनिर्णयं ॥ आचार्यं न करिष्यंति० ॥ ५२ ॥ संन्यासं परहंसाख्यं नांगीकुर्वंति मोहिताः ॥ परद्वेषं करिष्यं
तिपा० ॥ ५३ ॥ वंचुळी चौर्यं दंडं ॥ अन्यानि यानि कर्माणि वेदेनैवोदितानि तु ॥ नाचरिष्यंति नान्यैव पा० ॥ ५४ ॥
तथा ॥ ऊर्ध्वपुंड्रं ललाटे तु वर्त्तुलं चंद्रकं च धारयिष्यंति मोहेन पा० ॥ ५६ ॥ स्मार्तान्यपि च कर्माणि यानि यानि स्मृतानि माः ॥
नाचरिष्यंति नान्यैव पा० ॥ ५७ ॥ शंखचक्रगदावज्रैरंकनं विग्रहे स्वके ॥ मोहेनैव करिष्यंति पा० ॥ ५७ ॥ मनुष्या
णीं च नाम्नां तु तेषामाकारतापि च ॥ लक्षिताश्च भविष्यंति पा० ॥ ५८ ॥ बहुनोक्तेन किं वेद मर्यादां सदनं
सुराः ॥ श्रद्धयैव करिष्यंति पा० ॥ ५९ ॥ धारा ... शोषाश्च महेश्वरस्य प्रसाद युक्ताश्च महत्तमाश्च वेदोदितं
छेद ॥ केवलमेव देवमुदा करिष्यंति विमुक्तिसिद्ध्यै ॥ ६० ॥ इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञवैभवखंडे उपरिभागे
ब्रह्मगीतासूपनिषत्सु द्वितीयोऽध्यायः ॥ २ ॥ इति श्रीमत्काशीविलासश्रीक्रियाशक्तिपरमभक्तश्रीमत्र्यंबकसेवा
परायणेनोपनिषन्मार्गप्रवर्त्तकेन माधवाचार्येण विरचितायां सूतसंहिताव्याख्यायां तात्पर्यदीपिकायां यज्ञवै
भवखंडे उपरिभागे ब्रह्मगीतासूपनिषत्सु द्वितीयोऽध्यायः ॥ २ ॥ तेह रंकोचादित्यादिना वादिविप्रतिपत्तिं निब
र्हस्य श्रुतिप्रसिद्ध एवात्मास्य सूक्तेनोक्तः ॥ इत्ययमर्थः प्रतिपादितः ॥ स एवं स्वसृष्टदेहे शुद्धक्रियाशक्त्यात्मानो
श्रवणरूपेणावस्थितः सन् प्रपद्यास्थाप्य प्रापयेत ब्रह्मनिर्गुणं परमिति श्रुतेः ॥ तथा चिच्छक्तिरूपेण च ब्रह्म रंध्रा

18

प्रविष्टः स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यतेति श्रुतेः॥ अनयोर्मध्ये कतरः स आत्मा यः प्रत्यगात्मस्वरूपत्वेन ज्ञातव्यः सः किं प्राणरूपः उत तद्व्यत्यासक इति हि प्रश्नः॥ श्रुता चैव तां रितस्तस्योत्तरभूतायेन येन वा पश्यतीति येन वा शृणोतीत्यादिका श्रुतिः॥ अथ तस्याः श्रुतेरर्थं वक्तुमात्मनः सर्वसाक्षित्वं साधयति। सर्वात्मेति। ब्रह्मोवाच।

सर्वात्मा सर्वभूतानां साक्ष्येव सकलस्य तु। साक्ष्यभावे जगत्साक्ष्यं कथं भाति सुरोत्तम॥१॥ सर्वेषु शरीरेषु आत्मत्वेनावस्थितो यः परमेश्वरः असौ सर्वस्य जडप्रपंचस्य भासकः साक्षी चिन्मात्रस्वरूप एवेष्टव्यः॥ विपक्षे बाधमाह। साक्ष्यभाव इति। यद्यसौ चिन्मात्ररूपः साक्षी न स्यात् केन तर्हि प्रकाशेन साक्ष्यं जगद्भासेत। अतः साक्षिरूपं भानमङ्गीकर्तव्यमित्यर्थः॥१॥ साक्षिस्वरूपवत्साक्ष्यस्यापि स्वत एव भानं कस्मान्न भवतीत्यत आह। स्वतो भानविहीनं हि जगत्सर्वं चराचरं। जडत्वाज्जडता चास्य जगतो भानवर्जया॥२॥ स्वत इति। जडं हि जगत्स्वाभाविकस्फुरणरहितम् अतः साक्षिस्फुरणाभावे तस्य भानं न स्यादित्यर्थः॥ ननु साक्षिणो भावेऽपि जडं जगदजडेन ज्ञानाधारेणास्य ना ज्ञायत एवेत्यत आह। जडेति। अनात्मनो जडत्वमात्मनश्चाजडत्वमिच्छेत् तदुभयमप्यस्य जगतो भानवर्जये वाधिगन्तव्यौ। यदि हि जगज्ज्ञानविषयः स्यात्तदा तस्य चिद्रूपस्याजडत्वं यस्कृतादृत्वाभावा अयः सो जड इति जडत्वाजडत्वे उभे अपि भानाधीननिरूपणे इत्यवश्यं साक्षिरूपं भानमङ्गीकर्तव्यमित्यर्थः॥३॥ ननु स्वभानं तु चक्षुरादिवदप्रकाशमानेन विज्ञानेन स्वविषये जन्यत इति साङ्ख्यमतमाशङ्क्य तो॥४॥ भाने

॥१०॥

विज्ञानतो जन्यमिति कैश्चिदुदीर्यते ॥ तन्नासंगतमेव स्याज्जन्यं चेज्जडमेव तत् ॥४॥ जडानामेव जन्यत्वं कुं-
भादीनां हि संमतं ॥ ज्ञानमिति ॥ तन्निरस्यति ॥ तन्नेति । यदि हि विषयस्फुरणरूपं ज्ञानं जन्यं स्यात् तर्हि मृज्जन्य-
घटादिवज्जन्यत्वहेतुना जडमेव स्यात् अतो विषयवज्ज्ञानस्यापि जडत्वाविशेषात् । तद्बलान्न तस्य स्फूर्तिसंभव इ-
त्यर्थः ॥ एतावदुक्तं विज्ञानेन ज्ञानं विषये जन्यत इति न युज्यत इत्याह ॥ विज्ञानं चेति ॥ विज्ञानं चापि ज्ञानस्य नैवोत्पा-
दकमिष्यते ।४॥ विज्ञानं चेति ॥४॥ ज्ञानस्य विज्ञानं जनकमिति वदन् वादी प्रष्टव्यः । किं विज्ञानं ज्ञानरूपेण परि-
णमते उत ज्ञानस्यारंभकमिति । नाद्य इत्याह ॥ ज्ञानस्य ज्ञानरूपेण परिणामो न सिध्यति । अविक्रियत्वाज्ज्ञानस्य
यदि तस्यापि विक्रिया ॥५॥ ज्ञानस्येति । विकारिण एव क्षीरादेर्दध्यादिरूपेण परिणामो दृष्टः । सत्त्वविक्रियत्वाज्ज्ञा-
नस्य न संभवति ॥ यदि ज्ञानस्यापि विक्रिया स्यात् तर्हि क्षीरादिवद्वैरस्यं भवेत् । तर्हि क्षीरादिवद्वैरस्यत्वेन नैव
वेदनं ॥ तथा ज्ञानस्य विज्ञानं नैवारंभकमिष्यते ॥६॥ अतो विक्रियावत्त्वे सति तस्य ज्ञानत्वमेव हीयेतेत्यर्थः ॥
६॥ आरंभकत्वमपि निराकरोति ॥ तथेति ॥ द्रव्यं हि द्रव्यांतरारंभकं तंतुपटादौ तथा दृष्टत्वात् ॥६॥ अद्रव्यत्व-
गुणत्वेन परैरंगीकृतत्वतः ॥ असद्रूपस्य ज्ञानस्य ज्ञानं नारंभकं भवेत् ॥७॥ वंध्यासूनोरपि ज्ञानं तदा त्वोर

नकंनवेत्॥ विज्ञानंतु न द्रव्यं गुणत्वेन परैरंगीकारात्॥ अतो ज्ञानद्रव्यस्याद्रव्येणासता ज्ञानेनारंभो न युक्तः॥८॥
असद्रूपस्येति। आरंभवादे ह्यसदेव कार्यमुत्पद्यत इति स्थितिः। तथा चासद्रूपस्य ज्ञानस्य ज्ञानमारंभकमिति न युक्तं।
यदि ह्यसौ ज्ञानमारभेत तर्हि तत्र ज्ञानं वंध्यापुत्रादेरप्यारंभकं स्यादसत्त्वाविशेषादित्यर्थः॥ नागसं ज्ञानस्य ज्ञानं
नारंभकं न वेत्॥ ननु नुगागसंलः सत्तारूपसंबंध उत्पत्तिरिति संगीकाराद्वंध्यासुतादेश्चासत्तासत्त्वात्। कथं तद्दा
रंभकं च सक्रिरिसतआत। असतः प्राक्कारवर्णो विशेषणाभावतः॥ अतो विज्ञानजन्यत्वं नास्ति ज्ञानस्य सर्वदा॥९॥
असतः प्राक्कर्वीणामिति। प्राक्कनस्यैतासत्त्वमित्येवमादिस्वावरूपधर्मविशेषाश्रयत्वाभावात्तदाश्रयत्वे च ज्ञा
वे त्वघसंगादसतस्तत्त्वतो दोषो न युक्त इत्यर्थः॥ परिणामारंभकत्वव्यतिरेकेणोत्पादकनिर्वाह्यरूपणा। विज्ञानं ज्ञान
स्य न जनकमित्युपसंहरति। अत इति॥९॥ उक्तमर्थमन्यथा प्रतिदिशति॥ ज्ञानस्यापि न जन्यत्वमस्ति हेत्वगो
चासिनः॥ उक्तन्यायेन जन्यत्वप्रतीतिर्भ्रांतिरेव हि॥१०॥ ज्ञानस्येति॥ उक्तन्यायेनेति। यदि हि ज्ञानं जन्यं स्यात्त
र्हि जन्यत्वहेतुना घटवज्जडमेव स्यादित्यनेन न्यायेनेत्यर्थः॥ ननु रूपादिविषयेषु चक्षुरादीन्द्रियसंप्रयोगानंत
रं रूपादिविषयज्ञानं जायमानं दृश्यते। कोऽतो हि तस्य गतिरित्यत आह॥ जन्यत्वेति। विषयाकारपरिणातातःकरण

दृष्टिर्हि तत्र जन्यते॥ अतस्तद्दीयं जन्यत्वं तदवच्छिन्नेऽचैतन्येऽपि स्फटिके लौहित्यादिवद् अवभासते॥ अतो भ्रान्ति
रेव ज्ञाने जन्यत्वप्रतीतिरित्यर्थः॥१०॥ ज्ञानस्यापीति। ज्ञानस्यापि तथा भ्रान्तिजन्यत्वं प्रतिज्ञोऽसुराः॥ घटादिवि
षयस्फुरणरूपस्य ज्ञानस्यापि जन्यत्वप्रतीतिर्भ्रान्तिरेव। तस्याप्युत्पत्तिमद्वृत्तिज्ञानान्वयव्यतिरेकानुविधा
यित्वेन तस्यैव जन्यत्वस्य तत्राध्यवसानात्। एवं ज्ञानस्याजन्यत्वं प्रसाध्य नित्यत्वं साधयति॥ ज्ञानत्वेति॥
ज्ञानत्वे सत्यजन्यत्वात् ज्ञानं नित्यं सुरोत्तमाः॥११॥ अजन्यस्यापि प्रागभावस्यानित्यत्वदर्शनात् व्याहत्यर्थं विशि
नष्टि। ज्ञानत्वे सतीति॥ विमतं नित्यं ज्ञानत्वे सत्यजन्यत्वादात्मवदित्यभिप्रायः॥११॥ एवं ज्ञानस्य नित्यत्वं साध्य
तदन्ते दात्परमेश्वरस्य प्रतिज्ञातं साक्षिचिन्मात्ररूपत्वं निगमयति। यज्जगदिति। यज्जगद्भासकं ज्ञानं नित्यं ज्ञा
नित्वतः सुराः॥ स एव जगतः साक्षी सर्वात्मा शंकरो निधः॥१२॥ यदेतत्सर्वजगतोऽवभासकं नित्यं ज्ञानं स्वगतं
तोज्ञानान्तरनैरपेक्ष्येण भाति स एव सर्वस्य जगतः साक्षी द्रष्टा सर्वदेहेष्वात्मत्वेनावस्थितः परमेश्वरः॥ य
ज्ञानमित्युद्देश्यस्य नपुंसकलिंगत्वेऽपि स एवेति पुंल्लिंगनिर्देशो विधेयापेक्षया॥ उक्तं हि। निर्दिश्यमानप्रति
निर्दिश्यमानयोरेकत्वमापादयन्ति सर्वनामानि पर्यायेण तल्लिंगमुपाददत इति॥ तादृशज्ञानात्मको यः स एव

ज्ञा

अ कार्त्ने स्पर्थ। अज्ञानजन्यमिति॥ अस्तानजन्यौ चेतौ च रागद्वेषादयस्तथा॥ १२ तेन

साक्षिरूपेण स्थितः॥ शिवो परे न तु अहंरूप इत्यर्थः॥ १२॥ तस्य च नित्यस्य प्रकाशमात्र रूपस्याज्ञानं तत्कार्यं
रूपं सर्वमगत्साक्षि त्वमुपपादयति॥ तेन कल्पित संबंधाद् ज्ञानं भाति न स्वतः॥ तेन कल्पितसंबंधादिति॥
असंगो ह्ययं पुरुष इति असंगश्रुतेः॥ ज्ञानमात्र रूपस्य परशिवस्य न केनचिदपि पारमार्थिकः संबंधः
शक्यते वक्तुं। अतश्चास ज्ञानसंबंधोपि साक्षिणि परिकल्पितो विघत इति॥ तत्संबंधवशात्तेन साक्षिणा
वनतत्स्वरूपेध्यस्तमज्ञानं भाति न तु स्वाभाविकेन अन्यं यत्सत्त्वपरिणामरूपमंतःकरणं ये च रागादयस्तद्
र्मास्तत्सर्वं स्वोपादानभूताज्ञानसंबंधच्चैतन्यादेव भाति न तु स्वभावतः॥ अज्ञानस्य च चैतन्यसंबंधवशा
देव भाति न तु स्वत इत्यर्थः॥ १४॥ चित्तसंबंधद्वारेणैव दृगन्वयात्॥ विभाति न स्वतो बाह्यविषया
श्चतथैव च॥ १५॥ बाह्यविषया इति॥ [illegible] बाह्यघटपटादिविषयजातमपि स्वसंप्रयुक्त चक्षु
रादीन्द्रियसंबंधाच्चित्संवलितत द्विषयाकारांतःकरणवृत्तिव्याप्ततया परंपरया साक्षिचैतन्यसंबंधादेव भाति॥ १५॥
अनुमानादि वृत्तिस्थं चैतन्यं सुरसत्तम॥ अर्थानामपि केषांचित्प्रकाशकं तेन शंकरः॥ १६॥ अनुमानादि वृत्तिस्थ
देव भांति न च स्वतः॥ प्राणव्यापितया वा स्पुरणाने बहुरुस्तथा॥ १७॥ प्राणव्यापीति॥ आगेन्द्रिय देहादिकं प्राणोपादानभूताज्ञा
नसंबंधद्वारा चित्संवलितया चित्तवृत्ति व्याप्ततया परंपरया स्वरूपसाक्षिचैतन्य - ८५

मिति॥ आदिशब्देनोपमानादिसंग्रहः॥ धूमवत्त्वादित्यादिना व्याप्तिहेतुजनितायांतः करणवृत्तिस्तस्य प्रागुक्तरीत्याय-
दवस्थितं चैतन्यं तदपि स्वाश्रयप्रतीतेः करणवृत्तिजनकधूमवत्त्वादिहेतुव्यापकानामग्निमत्त्वादीनां केषांचिदर्था-
नां परंपरया सर्वावभासकं भवति॥ अपरोक्षज्ञानविषयेषु हि अधिष्ठानस्फुरणसंभावात् वृत्तिव्याप्यत्ववत् फ-
लव्याप्तित्वमप्यस्ति॥ अनुमानादिपरोक्षज्ञानविषयेषु नैतादृशं फलव्याप्तित्वमस्तीति वृत्तिस्थमितिवदतोभिप्रा-
यः॥ भानमात्ररूपस्य परशिवस्योपपादितं सर्वज्ञसाक्षित्वं निगमयति॥ तेनेति॥ सर्वावभासकः प्रोक्तस्तेन भातमि-
दं जगत्॥ एवं जीवभावेन प्रविश्यावस्थितस्य परशिवस्य साक्षिचिन्मात्ररूपत्वं प्रसाधितं तथा च कतरः स आत्मेति श्रु-
त्या प्रागवतारितस्य प्रश्नस्य सर्वसाक्षी चिद्रूप एव स आत्मा न तु प्राण इति प्रतिवचनं जातं॥ इममेवार्थं श्रुतिरुत्तर-
रूपेण प्रतिपादयति॥ येन वा पश्यति येन वा शृणोति येन वा गंधानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु चा-
स्वादु च विजानातीत्यस्याः श्रुतेरर्थं संगृह्य प्रतिपादयति॥ अतो रूपाणीत्यादिना॥ अतो रूपाणि तेनैव पश्यती ज्ञोन
मानवः॥१७॥ शृणोत्यनेन नादांश्च गंधा[illegible]नाजिघ्रति प्रियान्॥ अनेनैव सदा वाचं व्याकरोति तु मानवः॥१८॥ अ-
नेन स्वादु चास्वादु विजाना[illegible]ति च मानवः॥ यत उक्तयुक्तिबलात्तस्य भासा सर्वमिदं विभातीति श्रुतेश्चात्मा सा-
क्षिरूपेण सर्ववस्त्ववभासकः॥ अतः कारणात्तेनैव सर्वावभासकपरशिवस्वरूपेणानेन सर्वसाक्षितया हृ

ह्यय मध्येव स्थितेन चक्षुःसंप्रयुक्तरूपजनितमनोवृत्त्यभिव्यक्तेन चित्स्वकाशेनैव रूपाणि पश्यति। तथा
श्रोत्रसंप्रयुक्तशब्दजनितमनोवृत्त्यभिव्यक्तेनानेन चित्स्वकाशेनैव शब्दं जानाति। गंधानाजिघ्रतीत्या
द्यप्येवं मोध्यं॥ स दा वाचमिति॥ व्याकर्तृशब्दविषयमनोवृत्त्यभिव्यक्तेनानेनैव चित्स्वकाशेनैव वागिंद्रिय
द्वारा वाच्यं व्यवहरति॥ एतच्चान्यस्य पाणिपादादेरपि कर्मेंद्रियस्योपलक्षणं॥ अनेनेस्वादु चेति॥ रसनेंद्रि
यसंप्रयुक्तमधुरादिरसजनितमनोवृत्त्यभिव्यक्तेनानेनैव चित्स्वकाशेन स्वादु स्वादु विभागं विजा
नाति॥ श्रुतिगतो वा शब्दश्चार्थः॥ १८॥ एतदुक्तं भवति॥ चक्षुःश्रोत्रादिभिन्नभिन्नकरणजनितेषु रूपा
दिज्ञानेषु योयमनुगतश्चित्स्वकाशः॥ स एव साक्षिरूप आत्मेति॥ नन्वेष द्रष्टा श्रोतेत्यादिश्रुतेर
दनेनेति कथं तृतीयांतनिर्देशः नैष दोषः॥ अंतःकरणासंघलितपरिकल्पितकर्त्रे दोपजीवनेन करण
त्वोपचारात्॥ अत एव कठवल्लिष्वप्याम्नातं॥ येन रूपं रसं गंधं शब्दान् स्पर्शांश्च मैथुनान्॥ एतेनैव
विजानाति किमत्र परिशिष्यते। एतद्वैतदिति॥ आचार्यास्तु प्रकृत्या वाचा समारुह्य नाचा सर्वाणि नामा

न्याप्नोतीति प्रज्ञया च चक्षुः समारुह्य चक्षुषा सर्वाणि रूपाण्याप्नोतीति ॥ कौषीतकिश्रुतेरेकस्यैव प्रज्ञा शब्द
सिद्धेर्यान्तःकरणस्यैव चक्षुरादिनानाविधकरणभावेनावस्थानात्तस्यैवान्तःकरणस्य प्रपदर्श्या
भिधि... स्य चायो वै प्राणः सा प्रज्ञा या प्रज्ञा स प्राण इति एकत्वश्रुतेरुपलब्धिकरणत्वेन गुणभूतत्वात्स्वा
पोनात्मेति दर्शयितुं येन वा पश्यतीत्यादौ तृतीयान्तपदं चक्षुरादिभेदभिन्नान्तःकरणपरतया व्याख्यायैतदेत
हृदयं मनश्चेति हृदयमनःशब्दाभ्यां निश्चयरूपं संकल्पविकल्पात्मकमन्तःकरणं सकलेन्द्रियसाधारणं
प्रतिपाद्यत इति चक्षुरादीन्यनितरमनोवृत्तिलक्षणोपाधिप्राधान्यविवक्षया व्याचख्युः ॥ यथाहुः ॥ एतेना
न्तःकरणेनैकेन चक्षुर्भूतेन रूपं पश्यति श्रोत्ररूपेण शृणोति घ्राणरूपेण जिघ्रति वाग्भूतेन वदति जिह्वा
रूपेण रसयति । स्वेनैव कल्पनारूपेण मनसा संकल्पयति हृदयरूपेणाध्यवस्यति तस्मात्सर्ववि
षयव्यापकमेकमिदं करणमिति ॥ अत्र तु हृदयमनःशब्दावपि संज्ञानादिशब्दवन्नामत्वेन प्रतिपाद्यते
उपधेयविस्ताराधान्यविवक्षया तानि नामानि ... न्येव नाम्नातानि ॥ यदेतद्धृदयं मनश्चैतत्संज्ञान
माज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः संकल्पः क्रतुरसुः कामो वश इति सर्वा

१ ण्यवेतानि प्रज्ञानस्य नामधेयानि भवन्तीति एतानि च ... नामानि चिन्मात्रस्य स्वरूपस्य परिणामस्य चक्षुरादेरु
पमेयापेक्षये वैनायौ तीति तत्तत्स्य हृदादेरुपसंबंधितयैव तानि नामानि संगच्छन्ति। ओंकाराख्यीं तु विज्ञा
नमित्यादिना। ओंकाराख्यीं तु विज्ञानं वकुर्यान्नाप्यन्ये तु बुधैः॥ केचिद्धृदयमित्याहुर्ब्राह्मणा हि सुरोत्तमाः॥१९
तु वाक्यो वैयारणे॥ यदेतान्निस्स्वप्रकाशसाक्षिचिदात्मकं सर्वदा सर्व वस्त्ववभासकं भानं ओंकाराख्यीं आ
गुपन्यस्तं तदेव हृदयं मनः संज्ञानादिना वै स्ततदुपाधिसंबंधवलात्तत्तन्नाम्ना वकुर्याद्विबुद्धिगच्छति।
न तस्मात् चिदात्मनो हृदयं मनः प्रभृति भैतन्त्यांतरमित्यर्थः॥ हृदयमिति कुरीति॥ हृदयमिति व्युत्सत्त्याहृन्मध्य
ण ६ नस्यं तः करणं हृदयमीतं तु॥ तच्चात्राध्यवसायात्मकं बिवक्षितं॥ हृदयरूपेणाध्यवस्यतीति तथात्व प्रतिपादकत्वा स्या द
स्य ५ यं भोस्य च प्रागुदाहृतत्वात् एवं निश्चयरूपांतःकरणोपधानवत्त्वेन तदुपाहितं प्रज्ञानमात्रं ब्रह्मस्वरूपमपि स्य ५
हृदयशब्देन व्यवहरंतीत्यर्थः॥१९॥ मन इत्यपरे स्तंतः संज्ञानमिति केचन। आज्ञानमिति विद्वांसः केचिद्धि स्व
र्गवासिनः॥२०॥ विज्ञानमिति चाप्यन्ये प्रज्ञानमिति केचन। मेधेति ब्राह्मणाः केचिद् दृष्टिरित्यपरे बुधाः॥२१॥
धृतिरित्यपरे प्राज्ञाः मतिरित्यपि केचन। मनीषेति महाप्राज्ञाः ऊतिरित्यपरे बुधाः॥२२॥ एवं मनः संज्ञानादयो
पि स्वस्वपरिणामरूपांतःकरणस्य वृत्तिभेदादच्चिन्मात्रस्य साक्षिण उपाधिभूताः अतस्तदुपाधानवशात्तस्य
१२८

श्री

तानि नामधेयानीति योजनीयं ॥ उक्तं चाचार्यैः ॥ इत्येवमाद्या अंतःकरणस्य वृत्तयः उपलब्धुः शुद्धज्ञानरूपस्य
प्रज्ञानस्य उपाधिभूतास्तदुपाधिजनितगुणनामधेयानि संज्ञानादीनि ॥ तत्र चादावंतःकरणस्य संकल्पविकल्पस्
पार्वचिर्मनः ॥ संज्ञानं संज्ञप्तिर्यद्योगाद्देसौ चेतन इति व्यपदिश्यते ॥ आज्ञानमाज्ञप्तिः आज्ञाज्ञानिरूपा वृत्तिः ॥
विज्ञानं लौकिकसूक्ष्मवस्तुविषया वृत्तिः ॥ प्रज्ञानं प्रज्ञप्तिः प्रज्ञा ॥ यथोक्तं ॥ स्मृतिर्व्यतीतविषया मतिरागामिगो
चरा ॥ बुद्धिस्तात्कालिकी प्रोक्ता प्रज्ञा त्रैकालिकी मतेति ॥ मेधा ग्रंथधारणसामर्थ्यं दृष्टिः ॥ चक्षुरादींद्रियद्वारा
घटपटादिविषयाकारपरिणता या वृत्तिः ॥ धृतिर्देहेंद्रियादिधारणसामर्थ्यं मतिर्मननं आगामिविषया वृत्तिः मनी
षा ॥ मनस्यूप तत्र स्वातंत्र्यमितियावत् ॥ जूतिः रोगादिभिश्चेतसो दुःखित्वभावना ॥२२॥ स्मृतिरित्यास्तिकाः
केचित्संकल्प इति केचन ॥ क्रतुरित्यपरे प्राज्ञाः काम इत्यपरे जनाः ॥२३॥ वशा इत्यास्तिकाः केचित्सर्वाण्येता
नि संततौ ॥ प्रज्ञानस्य शिवस्यास्य नामधेयान्यसंशयी ॥२४॥ स्मृतिरनुभूतविषया संस्कारजा वृत्तिः संकल्पः ॥
इदं शुक्लमिदं कृष्णमिति भेदेन सम्यक्कल्पनरूपः ॥ क्रतुरिदमित्थमेवेत्यध्यवसायः ॥ कामः संनिहितविषयाका
क्षा ॥ वशः संनिहितस्रक्चंदनस्त्र्यन्नपानादिविषयोऽभिलाषः ॥ अत्रासुर्वित्तिश्च कुके नामप्राणवाचकतया
प्रसिद्धत्वात्तदुपाधिकस्य प्रज्ञानब्रह्मणः प्रसिद्धमिति न पृथगुक्तं ॥ एवमंतःकरणतद्वृत्त्युपहितं रूपं ज्ञात्वा दिसर्व
व्यवस्थेव भासकं नित्यस्वप्रकाशसाक्षिचैतन्यमेवात्मेति प्रतिपादितं ॥ तस्य च ब्रह्मादिस्तंबांतस्थावरजंग

मात्मकेन गतिज्ञावक्तावेनोपादानत्वेन च सर्वत्रावस्थानाभिप्रायेण परिच्छेदत्वमंग्युदर्शितं श्रुतिः।।सर्वात्मत्वं प्रतिपा
दयति।।एष ब्रह्मैष इंद्रः एष प्रजापतिरेते सर्वे देवा इमानि च पंचमहाभूतानि पृथिवी वायुराकाशज्योतींषीत्येतानीमा इ
नि च क्षुद्रमिश्राणीव बीजानीतराणि चेतराणि चांडजानि च जारजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरुषा
हस्तिनो यत्किंचेदं प्राणि जंगमं च पतत्रि च यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितमित्यामोक्षमिति संगृह्य
एष ब्रह्मेत्यादिना।एष ब्रह्मैष एवेंद्रः एष एव प्रजापतिः।।एष एव हि देवा भूतानि भुवनानि च।।२५।।यः श्रीकृष्णः
त्वमकाशः साक्षी चिद्रूपश्चात्मा एष एव ब्रह्मा च पंचीकृतपंचमहाभूतकार्यलिंगशरीरं समष्टिरूपहतः सन्नीह
रण्यगर्भापरपर्यायो ब्रह्मा स भवतीत्यर्थः।।यद्वा ब्रह्मेति नपुंसकलिंगत्वात् पदविभागः।।परं ब्रह्म सत्यज्ञानादि
लक्षणं जलतरंगबुद्बुदेष्वनुप्रविष्टरूपः प्रतिबिंबवत्सर्वप्राण्यंतःकरणप्रविष्टोपाधिभूतश्चिद्रूपः एष एव तद्ब्र
नान्यदित्यर्थः।एवमुत्तरत्रापि योजना।।परमैश्वर्ययोगादिंद्रः।यद्वा इदंकारास्पदघटादिवदिदमीत्या परोक्षेण
यः साक्षीत्वात्मभूतं ब्रह्म साक्षात्करोति स इंद्रः कथ्यते हि।।इदमदर्शमिति तस्मादिंद्रो नामेदंद्रो ह वै नाम तमिदं
द्रं संतमिंद्र इत्याचक्षते परोक्षेणेति।।यद्वा देवानामपि पतिरिंद्रः स एवैह देहेपि साक्षिरूपेणावस्थानादेष एव
स इंद्र इत्यर्थः।।प्रजापतिः।पंचीकृतस्थूलभूतारब्धब्रह्मांडांतर्वर्ती प्रथमशरीरी विराट्।।देवाश्चान्यादयः
योयमन्तर्देहेवस्थितश्चिदात्मा एष एव ब्रह्मेंद्रादिदेहेष्वपि साक्षिरूपेणावस्थितश्चिदेकाशसाम्येनैक्य

।।१५।।

दै ४ ।।१५।।

श्चेप्रतिसंधानात्तत्तद्रूपेक्षतीति स्थूलउपाधिरसावित्यर्थः॥ भूतानि भुवनानि चेति॥ सर्वशारीरोपादानभूतानि यानि मानि पृ
थ्व्यादीनि पंचमहाभूतानि तत्कार्यरूपाणि यानि च भुवनानि लोकास्तन्मध्ये वर्तमाना ये। [illegible]॥ अंडजा जारजाश्चैव स्वेदजा
उद्भिज्जा अपि॥ अश्वा गावश्च मर्त्याश्च हस्तिनः पक्षिणस्तथैव च॥२९॥ अंडजाः पक्ष्यादयः॥ ये च जारजा जरायुजा मनुष्यादयः॥
ये च स्वेदजाः स्वेदबिंदुपरिणामरूपा यूकाद्याः॥ ये च उद्भिज्जा भूमिमुद्भिद्य जायमाना वृक्षगुल्माद्याः॥ एवं सामान्यतश्चतुर्विधे
न सर्वं जगन्निर्दिश्य विशेषतोऽपि निर्दिशति॥ अश्वा इति॥ हस्तिपर्वा इति प्रमुखाः प्राणिन इत्यर्थः॥२९॥ स्थावरं जंगमं चैव तथा
न्यदपि किंचन॥ सर्वमेतदयं विभुः प्रज्ञानघनलक्षणः॥३०॥ स्थावरमचलं वृक्षादिकं॥ जंगमं पादगमनशीलं तथा अन्यदपीति
पक्षाभ्यामाकाशे पतनशीलं पतत्रि चेति श्रुत्युक्तं॥ तदन्यशब्देन विवक्षितं॥ एवं यदेतद्भूतं भौतिकरूपं स्थावरजंगमात्मकं॥

न९ सर्वं जगत्सर्वं प्रज्ञाब्रह्मरूपे सर्वसाक्षिणि उत्पत्तिस्थितिलयाधिष्ठाने अज्ञानपरिकल्पितत्वात्तद्रूपेण तेनैव प्रतीतिपथं नीय
मानं सच्चैव तत्स्वरूपतानतिरिक्तत्वान्नेतरप्रज्ञानलक्षणः परमेश्वर एव न तु ततोऽतिरिच्यत इत्यर्थः॥ सर्वं तत्प्रज्ञानेत्र
मिति प्रज्ञातार्थस्य प्रतिपादनाय प्रज्ञाने त्रो लोक इति वाक्यं यतः सर्वोऽपि लोकः प्रज्ञाने चक्षुरादीनि प्रहरति करणानि तं प्र
ज्ञादिरूपसाक्षिणे त्रकएव परिदृश्यते अतस्तत्सर्वं जगत्प्रज्ञाने त्रमित्यर्थः॥ प्रज्ञाने प्रतिष्ठितमिति यत्सर्वसाक्षिभूतं प्रज्ञानमा
धेयप्राधान्येन गुणभूततयाधिकरणत्वेनं निर्दिष्टं तस्याधेयस्य कृत्स्नजगदुपलक्षितस्य प्रज्ञानमात्रस्य मुख्यतयाधेयसंबो
तयितुं पुनराधारप्राधान्येन निर्दिश्य तदनन्यतत्स्य ब्रह्मात्मत्वं प्रतिपादयति श्रुतिः॥३१॥ प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्मेति तदर्थं सं

हस्तिप

घो

रस्त्वाति॥ प्रतिष्ठेति॥ प्रतिष्ठा सर्वभूतवस्तूनां प्रज्ञैवा पारमेश्वरी॥ प्रज्ञानमेव तद्ब्रह्म शिवरुद्रादिसंज्ञितं॥ २८॥ पारमेश्वरी॥ परमेश्वरस्यै
वजीवभावेनावस्थानात्तत्संबंधिनी या सर्वसाक्षिणी चित्सैषा प्रागुदीरितरीत्या सर्ववस्तूनां प्रतिष्ठा आश्रयः॥ स्वाज्ञानपरिकल्पित
तत्सकलजगदुत्पत्तिस्थितिलयाधिकरणत्वात्तत एव तैत्तिरीयकैः समाम्नातं॥ यतो वा इमानि भूतानि जायंते येन जातानि जीवंति॥ य
त्प्रयंत्यभिसंविशंतीति॥ एवं सकलकल्पनास्पदं सर्वदा सर्ववस्तुवभासकं यत्साक्षिरूपं प्रज्ञानं साधकस्य हृदयमध्ये उपलभ्य
मेतदेव शिवरुद्रादिसंज्ञितं तज्जगत्कारणं ब्रह्म यदस्मात्पूर्वमेकमेवाग्र आसीत्॥ इत्याम्नायेन निर्दिष्टं॥ अयमर्थः॥ सोयं दे
वदत्त इत्यत्र परस्परविरुद्धतत्तद्देशकालसंबंधवैशिष्ट्यपरित्यज्याविरुद्धस्य देवदत्तस्वरूपमात्रस्य यथैक्यप्रतिपत्तिस्तथै
वात्र प्रत्यक्स्वरूपप्रकाशसाक्षिचिद्वाचिना प्रज्ञानशब्देन जगत्कारणपराशिववाचिना ब्रह्मशब्देन च सामानाधिकरण्यान्यथानुपप
त्त्या संसारसाक्षित्वं जगत्कर्तृत्वादिविरुद्धधर्मवैशिष्ट्यत्यागेनोभयत्रानुगतं यच्चिदेकरसं प्रत्यक्तत्त्वमितस्तयोः पाधिविशेषं प्रैक्य
स्तुनोः पारमार्थिकं स्वरूपं तस्यैक्यं प्रतिपाद्यते॥ अज्ञानपरिकल्पितभेदभ्रमनिरासायेति॥ २८॥ अतोऽस्य एतेन प्रज्ञानात्मनास्मा
द्वैकादशवर्ष्यादिना ब्रह्मात्मैक्यविज्ञानस्य यदमृतत्वसाधनं प्रतिपादितं तत्संगच्छते॥ एवंरूपेति॥ एवंरूपपरिज्ञान
नादेव मर्त्योऽमृतो भवेत्॥ न कर्मणा न प्रजया धनेनान्येन नापि केनचित्॥ २९॥ वस्तुतः परशिवरूपस्य प्रत्यगात्मनः संसारित्वस्य
स्वस्वरूपयाथात्म्यापरिज्ञानमूलत्वादज्ञानस्य ज्ञानैकनिवर्त्यत्वात्॥ ज्ञानमेव ब्रह्मात्मैक्यलक्षणाया मुक्तेः साधनं न कर्मा
दि तस्याज्ञानकार्यत्वादविरुद्धत्वेन तन्निवर्तकत्वाभावात्॥ अत एव श्रुतिः॥ कर्मादेरमृतत्वावाप्तिसाधनत्वं निषेधति॥ न कर्म

१२८

भा

णान प्रजया धनेनेति ॥२९॥ ब्रह्मवेदनमात्रेण ब्रह्माप्नोत्येव मानवः ॥ अत्र नास्त्येव संदेहस्त्रिविधः शपथयाम्यहं
॥३०॥ मात्रग्रहणेन ज्ञानकर्मसमुच्चयस्यामृतत्वसाधनत्वनिरासः ॥ अयमात्मनो ब्रह्मात्मैकत्वज्ञानमात्रेणैवा-
विद्यानिवृत्तौ निरतिशयानंदरूपतया युगपत्सर्वकामनास्पदं ब्रह्मस्वरूपं प्राप्नोत्येव ॥ एतेन सर्वान्कामानाप्त्वा-
मृतः समभवदिति श्रुतेरर्थो विवृतो भवति । अन्यत्राप्याम्नातं ब्रह्मवेद ब्रह्मैव भवतीति ॥ ब्रह्मविदाप्नोति परमि-
ति च ॥ ऐतरेयकश्रुतिव्याख्याने समाप्ते ॥३०॥ एवमैतरेयोपनिषदर्थपर्यालोचनया कर्मादिनिरपेक्षेण ब्रह्मा-
त्मैकत्वसाक्षात्कारस्य परममुक्तिसाधनत्वं प्रतिपाद्य तैत्तिरीयोपनिषदर्थपर्यालोचनया तथात्वं प्रतिपादयितुं तत्
दर्थसंग्रहं च कुमारभते ॥ तद्विद्याविषयमित्यादिना ॥ तैत्तिरीयके हि ब्रह्मविदाप्नोति परमिति ब्रह्मप्रतिपा-
दयिष्यन्नस्या उपनिषदर्थसूचनास्तत्र भवता नानेन वाक्येन अज्ञानतत्कार्योपाधिसंबंधवशाज्जीवतामाप-
न्नस्य साधनचतुष्टयसंपन्नस्य मुमुक्षोः प्रत्यक्चैतन्यस्य ब्रह्मवेदनमात्रेणाविद्यानिवृत्तिद्वारा निरतिशया-
नंदाद्वितीयब्रह्मत्वावाप्तिरिति जिज्ञासाजननार्थं सूत्रितोऽर्थः संग्रहविस्तराभ्यां व्याख्यातः ॥ तत्र श्रुतिरेवासु-
खावबोधाय संग्रहव्याख्यानमप्युदाहरणेन प्रदर्शितौ ॥ सा चैवमाम्नाता ॥ सत्यं ज्ञानमनंतं ब्रह्म यो वेद नि-
हितं गुहायां परमे व्योमन् ॥ सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति ॥ तत्र जिज्ञासूनां देवानां पुनर्जि-
ज्ञासाजननेन प्रयोजनाभावात् ज्ञानकं सत्रास्ते वाक्यमुत्को उक्तवक्ष्यमाणसंगत्यभिधानपुरःसरं तस्या-
र्थं चार्थं संगृह्णाति ॥ तदिति ॥ तद्विद्याविषयं ब्रह्म सत्यज्ञानसुखाद्वयं ॥ सर्वसाक्षिप्रत्यक्तदज्ञानतद्ब्रह्मात्मप

रा

पि

तत्वसाधनभूतपराविद्या॥ विषयतया यद्ब्रह्म निर्दिष्टं तद्ब्रह्म सत्यादिलक्षणं॥ बृहतिधात्वर्थस्यानुगमात्॥
तथा हि॥ बृहत् बृंहि वृद्धौ॥ इति॥ धातुर्वृद्धिमाचष्टे॥ सा चात्र प्रतियोगिविशेषानुपादानान्निरतिशया व
विवक्षिता॥ सा तत्त्वं च स्वेतरतत्त्वपरिच्छेदात्किंचिन्निरतिशयत्वं भजते तथा च वस्त्वंतरकृतपरिच्छेदरहि
तमेव ब्रह्मशब्दवाच्यं भवितुमर्हति॥ द्वैतप्रपंचस्य तत्स्वरूपे ध्यस्ततयैव प्रतीतेर्वस्तुतस्तस्य तत्स्वरूपान
तिरिक्तत्वात्॥ तथा च वस्तुकृतपरिच्छेदनिराकरणेनैव देशकालकृतपरिच्छेदोपि निरस्तो वेदितव्यः॥ देशकालयोरपि
परिकल्पितत्वेन वस्तुस्वरूपानतिरेकात्॥ एवं द्वैतारोपस्याधिष्ठानत्वेन तद्बाध्यावधित्वेन च त्रिविधपरिच्छेदरहि
तं यदद्वितीयं तत्सत्यमेवेष्टव्यं॥ इतरथा निरधिष्ठानभ्रमनिरवधिकबाधयोः प्रसंगात्॥ असतश्च सर्वप्रकारे
णापि निरूपाख्यत्वेनाधिष्ठानावधित्वानुपपत्तेः॥ तच्च सत्यं सर्वदा प्रतिभातं चेन्नरविषाणसमं स्यात् अतस्तत्प्रति
भातमेवेत्यर्थादापन्नं॥ तथा च स्वप्रकाशमेव॥ तत्स्वप्रकाशत्वपरेण वस्त्वंतरेण परिच्छेदान्निरतिशयवृद्धिवा
चकब्रह्मपदव्याकोपः स्यात्॥ एवं ब्रह्मपदेन निरतिशयवृद्धिप्रतिपादनद्वारा यदानंत्यादिकं सूचितं तच्छ्रुति
र्विविनक्त्यादरे॥ सत्यं ज्ञानमनंतं ब्रह्मेति॥ एवंरूपस्य ब्रह्मणोनन्यशेषतया वेद्यत्वप्रतिपादनानंदरूपस्य तथा
त्वानुपपत्तेर्निरतिशयसुखात्मत्वमपि तस्य सिध्यति॥ एवमाम्नायते॥ आनंदो ब्रह्मेति व्यजानात्॥ विज्ञानमानंदं

तस्त

अत

ब्रह्मेति च ॥ तदिदमुक्तं सत्यज्ञानानन्दसुखाद्वयमिति ॥ नन्वेतद्ब्रह्मणः स्वरूपलक्षणं सत्यादिशब्दाभ्यां सत्यत्वा
दिपरापरजातिप्रवृत्तिनिमित्तकाः कथं निर्भेदमेकरसमुक्तविधब्रह्मस्वरूपं प्रतिपादयितुं शक्नुवन्तीति ॥ नैष दोषः ॥
सच्चिदानन्दैकरसे ब्रह्मणि परिकल्पितलौकिकसत्यज्ञानादिषु सत्यत्वादिपरापरजातिप्रवृत्तिनिमित्तकैरपि
सत्यादिशब्दैः सत्यज्ञानानन्दैकरसं व्यक्तं लक्षयितुं शक्यत्वात् ॥ अनृतपदार्थवैलक्षण्यव्यतिरेकावच्छिन्नतया
तत्स्वरूपं लक्षयति ॥ न चैकैकेनैव पदेन लक्ष्यस्वरूपस्य विज्ञातत्वात् पदान्तरवैयर्थ्यमिति वाच्यं ॥ अनृतजडदुः
खवीतत्वस्य व्यावृत्तिपरत्वेन सप्रयोजनत्वात् ॥ यथा कुर्वन्निर्विकाराः ॥ तत्रानन्तो वृहत्त्वाद्व्याप्त्यैव विशेषणं ॥ मं १ त ६
स्वार्थार्पणप्रणाल्यां तु परिशिष्टो विशेषणमिति ॥ एवं ज्ञेयस्य स्वरूपं प्रतिपाद्य वेदनप्रकारमाह ॥ संसारक इति ॥
संसारकं गुहाख्यमायास्थानादि संज्ञिते ॥ ७१ ॥ निहितं ब्रह्म यो वेद परमव्योमसंज्ञिते ॥ संसरत्यनेनेति सं
सारः संसार एव संसारकं ॥ अव्याकृतं ॥ कारणभूते तस्मिन् कार्यभूताः सर्वे पदार्थाः भूतभविष्यद्वर्तमानल
क्षणेषु त्रिषु कालेषु वर्तितानागतवर्तमानाव्यपदेशैर्निगूढत्वर्तमाना गुह्यन्ते ॥ संव्रियन्तेऽस्मिन्निति गु
हा स्यात् तदव्याकृतं अन्तर्गतगुहाभावेन वाच्यं ॥ तदेवाचित्रदुर्घटकार्यकारणात्मप्रकाशानिःप्रपंच ब्रह्म

स्वरूपज्ञानेन निवर्त्यत्वाद्यमायाज्ञानादिसंभवति॥ आदिशब्देनाविद्याजडत्वानित्यत्वादीनामपि संग्रहः। एतदू
दिव्याव्याहृतं परमव्योमसंज्ञितं॥ एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च यो वै स बहिर्धा पुरुषादाकाशो यो
वै सोऽन्तः पुरुष आकाश इत्यादिश्रुतेः तत्प्रसिद्धौ अव्याकृतस्य व्योमशब्दाभिधेयत्वात् तादृशाकाशापेक्षया पर
मत्वं च वेदितव्यं॥ एवं गुहायां परमे व्योम्नीति स्थितिगते समानाधिकरणे सप्तम्यौ तत्पदौ यथा कुंभाभ्यकाशः॥ गुहा
यां परमे व्योम्नीति समानाधिकरणाद्व्याकृताकाशमेव गुहा। तत्र चापि निगूढाः सर्वे पदार्थास्त्रिषु कालेषु
कारणत्वादिति तथा च॥ कार्यकारणात्मना देहेंद्रियादिरूपेण च परिणतात्पंचकोशात्मके तस्मिन्नव्याकृते नि
हितं स्थितमस्य यो भवति। उपलब्ध्यभिप्रायमेतत्॥ सर्वांतरस्य निर्विशेषस्य ब्रह्मणो विशिष्टदेशसंब
धानुपपत्तेः। एवमन्नमयप्राणमयादिवक्ष्यमाणपंचकोशरूपेणावस्थिते सत्वरजस्तमोगुणात्मके अव्याकृते
तन्निहितमुपलभ्यमानं सत्यज्ञानानंदैकरसमद्वितीयं ब्रह्म यः प्रत्यगात्मस्वरूपत्वेन वेद श्रवणमननादिसाध
नजनितया तादृग्ब्रह्माकारमनोवृत्त्या साक्षात्करोतीति। सेद्रूपरिहारार्थस्संबंधः॥ एवंभूतस्य ब्रह्मवेदनस्य
फलमाह॥ सोऽश्नुत इति॥ सोऽश्नुते सर्वान् कामान्॥ ३३॥ विदितब्रह्मरूपेण जीवन्मुक्तेन संशयः॥ काम्यं
त इति कामाः सुखोपभोगाः सर्वांदितान् सर्वान् कामान् क्रमेण युगपदेकक्षणोपारूढान् अश्नुते प्राप्नोति॥ के

॥१८॥

नरूपणवेद्यते॥ विदितब्रह्मरूपेण स्खलितयासाक्षात्कृतेन निवृरणतया सर्वदा सर्वत्र सवितृप्रकाशवत्सर्ववस्तु
वभासकेन स्वयंप्रकाशमानेन चिद्रूपेण ब्रह्मणो रूपेण। ब्रह्मविदेवंभूतसर्वज्ञब्रह्मात्मकः सन्तच्चज्ञानेनभ
दग्रमहितोविद्यायाः समूलमुन्मूलितत्वाच्चात्मनो निरतिशयानंदाविर्भावेन नच्छेराभूतान्सर्वान्सुखविशे
षानपि स्थूलप्रकारेण धर्मादिनिरपेक्षेण युगपद्याप्नोतीत्यर्थः॥ अक्रमेणेति वदता श्रुतिगतसहशब्दस्य
साहित्यमित्यर्थः॥ अपितु यौगपद्यमेवेत्यभिप्रायो वर्णितो भवति। तथा विदितब्रह्मरूपेणेति वदता ब्रह्मणाविप
श्चितेति श्रुतिगततृतीयापि पुत्रेण सहागत इतिवन्न सहयोगलक्षणा॥ अपितु चैत छत्रेण राजानमद्राक्षीदि
त्यादिवदित्थंभावे तृतीयाव्यवस्था भवति। श्रुतय एव। आत्मावाइदमेकएवाग्रआसीत्॥ एकोदेवः सर्वभूतेषुगू
ढः सर्वव्यापीत्यादि श्रुतिशिरांसि नः पारमार्थिकैकत्वप्रतिपादनान्नानाविधशरीरेषु तन्नानात्वमतोतेऽपिघ
टाकाशो मठाकाश इवदोपाधिकभेदकल्पनयाप्युपपत्तेस्सात्र छत्रदृष्टान्तप्रसिद्धिशब्देनानेन जीवेनात्मनानुप्रवे
स्य नामरूपे व्याकरवाणीत्यादिश्रुत्या एकस्यैव स्रष्टुरात्मनो जीवतया नानाविधदेहप्रवेशाङ्गीकारास्त
वाज्ञोव परमात्मनोऽविद्यते। अतो न भेदोपजीविनी सहयोगलक्षणा तृतीया न युक्तेत्यभिप्रेत्य भाष्यकार
रैवं व्याख्यातं। तथाहुः॥ किमस्मदादिवत्पुत्रस्वर्गादीन् पर्यायेणेत्याह॥ सह युगपदेकक्षणोपारूढानिति
तेन सर्वज्ञरूपेण ब्रह्मणास्तु तदीजीवन्मुक्त इति। उक्तब्रह्मात्मभावं प्रारब्धकर्मशेषेण प्राणेन्द्रिये

प त

॥१९॥

देहादिकं धारयन्नात्मा जन्तुवदवस्थितोऽपि मुक्त एव न पुनस्तस्य बंधशंकेत्यर्थः एवमक्षरस्यानुसारेणान्तर
र्थं प्रतिपादयन्फलितमर्थमाह ॥ प्रत्यगिति ॥ प्रत्यगज्ञानविज्ञानमायायाश्च स्वसाक्षिणी ॥ २३ ॥ एकं ब्र
ह्म च संपन्नपूर्णसाक्षाद्ब्रह्मविदुत्तमः ॥ प्रत्यगात्मनो ब्रह्मस्वरूपत्वाच्छादकमज्ञानं प्रत्यगज्ञानं विविधं ज्ञा
पनं ननेति विज्ञानमंतःकरणं तदुभयरूपेणावस्थिता सत्त्वरजस्तमोगुणात्मिका माया सा शक्तिः कार
णशरीरमित्याख्यायते तस्याः साक्षित्वेन पंचकोशान्तवर्तमानोऽप्यक्रियमात्रस्वरूपमात्मा ॥ यच्च स
त्यं ज्ञानमनन्तं ब्रह्मेति सत्यज्ञानानन्तानंदैकरसं ब्रह्म तदुभयमभेदेन संपन्नमुक्तं करोति यः संशयविप
र्यासविरहेण सम्यक् साक्षात्करोति स ब्रह्मविदामुत्तम इति परमित्यादि श्रुत्युक्त ब्रह्मविद्भवतीत्यर्थः ॥ श्रुतौ सूचितस्यार्थ
स्य संग्रहव्याख्यानानंतरं संग्रहे कृतिनिराकासार्थं विसर्गव्याख्यानमपि कृतं तस्माद्वा इत्यादिनानुसुपनिषदु
क्तमतेन । तदितः परसंगस्य प्रतिपाद्यते । तत्र तावत्सत्यं ज्ञानमनंतं ब्रह्मेति यदानन्त्यं प्रतिज्ञातं तन्नोपपद्यते
वियदादिकृत्स्नभौतिकप्रपंचलक्षणस्य परिच्छेदकस्यान्तरस्य विद्यमानत्वादित्याशंक्य तदुपपादयितुं तस्मा
कारणात्सृष्टिमाह । ब्रह्मरूपत्वादिना ब्रह्मस्वरूपात्मनस्तस्मादतस्माच्छ्रुतिमभिप्रेतान् ॥ २४ ॥ एवं व्याख्यान्नो
पते तस्माद्वा एतस्मादात्मन आकाशः संभूतः ॥ आकाशाद्वायुः ॥ वायोरग्निः ॥ अग्नेरापः ॥ अद्भ्यः पृथि
वीति अस्याः श्रुतेरर्थं प्रतिपादयति । ब्रह्मेति ॥ तस्माच्छब्देन श्रुतौ ब्रह्मविदाप्नोति परमिति प्रयविहितस्त्र

॥१९॥

दो

वाक्यनिर्दिष्टं ब्रह्म परामृश्यते। एतस्मादित्येतच्छब्देन सत्यं ज्ञानमनन्तं ब्रह्मेति सन्निहितमन्त्रवाक्ये निर्दिष्टं। अस्योदा
सीनस्य परमार्थतो निरवद्यस्य स्वच्छत्वात् सर्वमित्यादिश्रुतेः संततं भावनायाह॥ शक्तिमिश्रितादिति प्राणिकर्मपरि
पाकवशेन सिसृक्षितकार्यप्रपञ्चोन्मुखो। तत्स्वरूपपरिकल्पितत्वेन तदाश्रिता मायाशक्तिस्तन्मिश्रिताच्च उपाधिक
दित्यर्थः॥२४॥ एवं मायाशक्तिशबलादुक्तरूपादात्मनः सकाशादपञ्चीकृतसूक्ष्मः शब्दगुणोऽवकाशात्म
कश्च आकाशः संभूतः समुत्पन्नः पञ्चीकरणेन हि भूतानि स्थूलत्वं यान्ति तत्प्रकारं चाग्रे छान्दोग्योपनिषदर्थकथन
प्रस्तावे प्रतिपादयिष्यते॥ अपञ्चीकृत आकाशः संभूतो रज्जुसर्पवत्॥ निमित्तकारणवाचिशब्दा
दपि पञ्चमी स्यादिति। हेतौ विधानात्तथा उपादानकारणवाचिशब्दादपि जनिकर्तुः प्रकृतिरिति स्मरणात्॥ एवं
चात्रास्मादिति पञ्चमी तु उभयरूपा तन्त्रेणोपात्ता द्रष्टव्या॥ ब्रह्मैव हि कार्यस्य जगतो निमित्तमुपादानं च। सो
कामयत बहु स्यां प्रजायेयेति। कामयितृत्वेन स्रष्टृत्वेन बहुभावेन चाभिन्ननिमित्तोपादानस्य प्रतिपादितत्वात्।
बादरायणोऽपि ब्रह्मणः स्वयंरूपत्वं सूत्रयामास प्रकृतिश्च प्रतिज्ञादृष्टान्तानुरोधादिति॥ ये त्वस्पर्शद्रव्यत्वा
दात्मवदाकाशस्य नित्यत्वं मन्यमानाः संभूत इत्यस्य स्थितिपरतयोत्क्रममन्यथार्थयन्ति ते बादरायणेनैव न
वियदश्रुतेरित्यधिकरणे निराकृताः। ननु वियदादिकार्यप्रपञ्चेनैव वस्तुना ब्रह्मणः परिच्छेदः स्यात्॥ तथा
ब्रह्मोपादानं सत् क्षीरदधिन्यायेन जगदाकारेण परिणमते। अथवा मृद्घटन्यायेन जगदारम्भकं स्यात् इत्य
तयोरन्यतरदङ्गीकर्तव्यं तथा च ब्रह्मणोऽनित्यत्वादिप्रसक्तिरित्याशङ्क्याह रज्जुसर्पवदिति। न खल्वत्रारे

र

सवादः परिणामवादो वा विवक्षितः येनैव ब्रह्मसज्येत । अपि तु विवर्तवाद एव विवक्षितः ॥ तथा रज्जुः स्वयमविकृतैव सती मायया स
र्पाकारेण विवर्तते ॥ कारणस्वरूपाविरोधेन कार्यप्रतिभासो विवर्तः । एवं ब्रह्मापि निर्विकारमेव सत्स्वमायया शक्तिविलासेन
[illegible]दादिकारेण विवर्तते ॥ कारणस्वरूपाविरोधेन कार्यप्रतिभासो विवर्तः । अतो ब्रह्मणो निर्विकारित्वावि
घातान्नानिष्टप्रसक्तिरित्यर्थः । अयमेवार्थो बादरायणेनापि कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वेत्यत्र निर्णीतः ॥ ए
वं ब्रह्माकारस्याप्याकाशादिभूतभौतिकप्रपञ्चस्याधिष्ठाने ब्रह्मणि कारणमायापरिकल्पितत्वेन रज्जुसर्पवदधिष्ठाना
दप्यतिरिक्तत्वात् । यथा मृत्कार्यं घटशरावोदञ्चनादिकं कारणभूतमृद्व्यतिरेकेणालब्धसत्ताकत्वात् पृथुबुध्नोदरा
कारादिरूपविशेषस्य तद्वाचकघटादिशब्दस्य च वाचारम्भणमात्रत्वात् कारणमृन्मात्रमेव सत्तथा न्यथैवं ब्रह्मकार्य
स्यापि कारणानन्यत्वात् [illegible] परिच्छेदानवकल्पनीय इत्यर्थः ॥ आकाशादिति आकाशाद् [illegible] स्य
२०॥ नेपञ्चीकृतः पुनः [illegible] वायोरग्निस्तथाग्नेरापश्च अद्भ्यो वसुंधरा ॥ आरोपितस्य आकाशादेरनिर्वाच्यत्वेन कार्यो ॥२०॥
तिराधिष्ठानस्यायोगात् ॥ इदं सर्वमसृजत यदिदं किंच ॥ एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योति
रापः पृथिवी विश्वस्य धारिणी ॥ इत्यविशेषेण सर्वस्यापि दृश्यप्रपञ्चस्य ब्रह्मकार्यत्वश्रवणात्प्रोक्तोदितकार्यविशेषा शाप
रोपाधिष्ठानभूतं तदुपाधिकं ब्रह्मैवोपादानं तेनाकाशादिरन्यादिभिः पञ्चभूतैर्निर्दिश्यते ॥ तस्मादात्मन आकाशरूपा
पन्ना[illegible] सकाशात्स्पर्शतन्मात्रापरपर्यायः सूक्ष्मो वायुः स्वकारणगुणेन शब्देन स्वगुणेन स्पर्शेन च गुणद्वयवा
न्समुत्पन्नः । वायोरग्निरिति ॥ एवं वायुरूपापन्नात् [illegible] स्वस्वकारणगुणाभ्यां शब्दस्पर्शाभ्यां स्वगुणेन रूपेण च गु
णत्रयवान् सूक्ष्मोऽग्निः समुत्पन्नः । तथा च वायोरग्निरिति तृतीयैकतेजसो वायूपादानत्वश्रवणात् छान्दोग्ये च तत्ते

= तत्तत्क्रमनुसारेण मया सृष्टं शिवाज्ञया ॥ ५ ॥

गोऽसृजतेति सद्रूपब्रह्मोपादानत्वश्रवणाच्च श्रुत्योर्मिथो विरोधादप्रामाण्यमिति चेत्का निरवकाशत्वात्तैत्तिरीयके स्फुटतरीत्या
ब्रह्मोपादानत्वस्याभिधानात् ॥ अत एव भगवान् व्यासोऽपि अमुमर्थमसूत्रयत् । तेजोऽतस्तथा ह्याहेति ॥ अप इति ।
तस्माच्चाग्निरूपापन्नाद्ब्रह्मणः स्वकारणगतैः शब्दाद्यैस्त्रिभिर्गुणैः स्वगुणेन च रसेन च गुणचतुष्टयवत्य आपो जा
ताः ॥ अद्भ्यो वसुंधरेति । अबूपापन्नात्तस्मादेव ब्रह्मणः कारणगतचतुष्टयगुणेन स्वगुणेन च गन्धेन पञ्चगुणा पृथिवी
समुत्पन्ना ॥ अतो पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् अन्नात्पुरुष इति भौतिकभोग्यप्रपञ्चसृष्टिर्गम्या तानीसीमगाति
तानीति ॥ तानि भूतानि सूक्ष्माणि पञ्चीकृत्य शिवाज्ञया ॥ ६ ॥ तेभ्य एव सुराः सृष्टा ब्रह्माण्डमिदं तथा । भुवनानि विचि
त्राणि निर्मितानि शिवाज्ञया । ब्रह्माण्डस्योदरे देवा दैत्याश्च सुरा अपि । देवादयो मनुष्याश्च तथा पश्वादयो जनाः ॥ ७ ॥
परमेश्वरस्याज्ञानिवियदादिसूक्ष्मभूतानि तानि तदाज्ञया पञ्चीकरणेन स्थूलीकृत्य तत्कार्यभूतं ब्रह्माण्डादिकं म
या निर्मितमिति ब्रह्मणोक्तिः ॥ परात्परो हि स्वसृष्टवियदादिसूक्ष्मभूतोपाधिकः सन् हिरण्यगर्भः यः प्रथमः शरीरी
प्रजापतिर्ब्रह्मेति चशब्देभ्योऽपदिश्यते ॥ तत्कर्तृक एव हि सर्वो भौतिकः सर्गः ॥ ब्रह्माण्डस्योदरे मध्ये पृथिव्यादिलोके सं
सु चौषधिवनस्पत्यादिकं सर्वं भोग्यजातं देवासुरमनुष्यादिभोक्तृभ्यो सृष्टवानस्मीत्यर्थः ॥ देवादय इत्यादिबोध्य
नं । देवादय इति अत्र देवशब्दः कर्मदेवाभिप्रायः ॥ अन्येषां देवानां देवा इति पदेन पृथक्प्रतिपादितत्वात् ॥ तत्तत्कर्म
णानुरूपेणेति । ननु प्राणिकृतपरिपक्वपुण्यपापानि बलस्य वैचित्र्येण तत्फलभूतविचित्रसुखदुःखोपभोगाय
देवमनुष्यादिभेदेन नानाविधभोगाय तानि निर्मितानीत्यर्थः ॥ सत्यं पि सर्वेषु प्राणिषु तत्पक्षपाते वैषम्यप्रकार इति

नि॰

तस्यैव सृष्टिः। असाप्रतिपादिता॥ अत एव तैत्तिरीयकेषु पुरुषाकारपरिणतदेहमध्येव स्थितस्यैवात्मनो ज्ञानविशे
षाविर्भावेन विद्याधिकारः श्रूयते॥ पुरुषे त्वेवाविस्तरामात्मा स हि प्रज्ञानेन संपन्नतमो विज्ञातं वदति विज्ञा
तं पश्यति वेद श्वः वेद लोकालोकौ मर्त्येनामृतमीप्सतीति॥ अन्नपरिणामरूपपुरुषशरीरतादा
त्म्यापन्नस्यात्मनः सबाह्याभ्यन्तरस्वरूपस्य शिरःपादादिविभागस्य तदन्तरभावेन अन्नमयप्राणमयमनोमयविज्ञानमया
नंदमयाख्याः पंच कोशाः प्रतिपत्तिसौकर्याय स वा एष पुरुषोऽन्नरसमयः इत्यादिना श्रुतौ प्रतिपादितास्ता
न्संगृह्णाति। अस्येत्यादिना॥ तत्र तावज्जीवभावेनैव स्थितस्य त्रीणि शरीराणि भवंति स्थूलसूक्ष्मका
रणात्मना। तत्रान्नरसपरिणामरूपषाट्कौशिकस्य स्थूलशरीरस्य तादात्म्यापन्नोऽन्नमयकोश इति प्रसि
द्धः स वा एष पुरुषोऽन्नरसमय इति श्रुतौ तच्छब्देन प्रकृतमस्मानंदपरामृष्टस्यान्नमयत्वप्रतिपादनात्॥ ए
वं प्राणादिवत्स्यमनकोशतादात्म्येन प्राणमयादित्वमपि तस्यात्मनो धिगंतव्यं॥ तस्यान्नमयपरिणामरूप
स्य स्थूलशरीरस्यात्मत्वोपदेशेन स्थूलशरीरादन्यस्य पुत्रमित्रकलत्रादेरहंममत्वभ्रमो निवर्तितः॥ तस्य मध्ये प
सूक्ष्मभूतारब्धं यच्च सप्तदशाङ्कं लिंगं तदात्मनः सूक्ष्मशरीरं तत्र सूक्ष्मशरीरे प्राणमयमनोमयविज्ञानमयाख्य
कोशत्रयमंतर्भावः॥ आनंदमयस्तु कारणशरीरमित्यविवेकः॥ सत्त्वरजस्तमोगुणात्मिकाया कार्यस्याज्ञानस्य गुण
त्रयात्मकानि। तत्र वियदादिसूक्ष्मभूतानां ये पंच रजोंऽशास्तेभ्यो रचितो निःश्वासनादिक्रियाहेतुः क्रियात्मास्यात्मकः
प्राणः तस्य प्राणापानाद्याः पंच वृत्तयः॥ एवं पंचप्राणकर्मेन्द्रियरूपे प्राणमयकोशो वा विज्ञेयः तस्यात्मन उपदेशेन

+ तदुभयस्य हेतुभूतायामविलीनसत्त्वप्रधानाविद्यासु सुषुप्तावव + ॥२१
भासते। सा तस्यात्मनः कारणशरीरं

बाह्यस्यानात्मत्वं प्रतिपादयति श्रुतिः ॥ तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तर आत्मा प्राणमय इति ॥ तदेतदाह ॥ अस्थीति ॥
अस्थिस्नाय्वादिरूपं यच्छरीरं सातिदेहिनां ॥ ३८ ॥ ॥ तस्माद्वा यायोधात्मा ॥ विभिन्नश्चान्तरोयतः ॥ अन्नमयस्यात्म-
नः उपाधिभूतं पदस्थिस्नाय्वादिरूपमन्नकार्यं षाट्कौशिकं शरीरं तस्मात्स कोशादुदरितप्राणमयकोशविशिष्ट
आत्मा विभिन्न एव ज्ञातव्यः ॥ यतः कारणादयमांतरः ॥ अंतरे देहमध्ये वर्त्तमानोनुभूयते ॥ अतो बाह्यदेहात्प्राण-
मय आत्मा विवेकेन ग्रहीतव्य इत्यर्थः ॥ अतएव सिकाशब्द हिराछादकत्वसामान्यादत्र विकारस्य देहस्य कोश-
तो एवमुत्तरत्रापि मनोमयाद्यात्मोपदेशेन पूर्वपूर्वस्य बाह्यतया विविक्तत्वेन आत्मत्वभ्रमनिरासो कोशरूप-
त्वमवगंतव्यो ॥ एवं प्राणमयोपदेशेन बाह्यस्यान्नमयस्यानात्मत्वं प्रतिपाद्य प्राणमयस्यापि कोशरूपत्वेनानात्मत्वं
प्रतिपादयितुं तस्मादप्यांतरं मनोमयमात्मानमुपदिशति श्रुतिः ॥ तस्माद्वा एतस्मात्प्राणमयादन्योंतर आत्मा
मनोमय इति तत्संग्रहाति ॥ योयमिति ॥ सोयं प्राणमयो ह्यात्मा मनि सर्वशरीरिणां ॥ ४० ॥ ततो मनोमयात्मा ह्यात्मा विभि-
न्नश्चांतरस्त्वतः ॥ वियदादिपंच सूक्ष्मभूततत्त्वारारब्धानि श्रोत्रादीनि पंचज्ञानेंद्रियाणि तत्सर्वांशसमुदाय-
परिणामरूपमंतःकरणं तदुपादानभूतस्य सत्वस्यात्मस्वरूपभूतसुखप्रकाशाभिव्यंजकसामर्थ्यसाद्भावा-
त्कार्यमंतःकरणमपि स्वरूपसुखाभिव्यंजकत्वात्मनास्वरूपप्रकाशाभिव्यंजकत्वयात्मनाद्विधापरिण-
मते ॥ तत्र प्रकाशाभिव्यंजकावृत्तिः पर्युषज्ञानुबंधा संकल्पात्मके मनः संज्ञां लभते ॥ एवं मनो बुद्धिभेदभिन्न-
वृत्तिमदंतःकरणसहकृतानां चक्षुरादींद्रियाण्यपि विमर्शनिश्चयरूपद्विविधज्ञानकेन से नद्विविधानि भवंति ॥ ०न १

न ५ विकल्पा २ रजः संस्पर्शविरहाच्चेनेर्मलसति निश्चयरूपासती बुध्यारव्यो लु-
ते ॥ २

तत्रविमर्शज्ञानजनकपंचज्ञानेंद्रियसहितंमनःसंज्ञकं तन्निमदुक्तः करणोपाधिविशिष्टआत्मामनोमयः।सच
प्रागुक्तात्प्राणाद्यान्नादिसंघात्प्राणमयादांतरत्वेन विभिन्नः॥ तत्रहेतुमाहस्वत इति॥ अंतरवस्थितात्मस्व
रूपश्चैतन्याभिव्यंजकत्वलक्षणात्स्वभावभेदादांतरत्वमित्यर्थः॥ प्राणमयस्तु रजःपरिणामस्वरूपत्वा
न्नादीरितिचित्स्वकार्यमभिव्यनक्ति॥ अतएव सुषुप्त्यामपि प्राणवृत्तौ जाग्रच्चैतन्यस्य विशेषाभिव्य
क्तिर्नदृश्यते॥ उच्छ्वासनिश्वासादिक्रियाप्रवर्त्तनेन सल्लनमम देहस्य धारणामेव केवलंकरोति॥ तथाचप्रा
णवाक्यं॥ अहमेवैतत्पंचधात्मानं विभज्येन प्राणमवष्टभ्य विधारयामीति॥ एवमनयोर्विविक्तस्वरूपत्वा
न्मनोमय आत्मा प्राणमयादांतरो विविक्तश्च श्रयितव्य इति भावः॥ एवं प्राणमयस्य पञ्चात्मत्वेन कोशरूपत्वा
नात्मत्वं प्रसाध्य मनोमयस्यापि तथात्वं प्रतिपादयितुं तस्मादप्यांतरं विज्ञानमयमात्मानमुपदिशति श्लोकेनेति
तस्माद्धेतोः तस्मान्मनोमयादन्योंतर आत्मा विज्ञानमय इति तत्संगच्छति॥ योयंमनोमयइति॥ योयंम
॥२२॥ नोमयइति॥ योयंमनोमयाख्यात्मा भातिसर्वशरीरिणां॥४१॥ विज्ञानमय आत्मावतत्तान्यश्चांतरोवत
प्रागुदीरितशरीरस्यानिश्चयजनकचक्षुरादीन्द्रियसहितबुध्याख्यवृत्तिमत् अंतःकरणविशिष्ट आत्मावि
नं२ तोमयः॥ विज्ञायतेनेनेति विज्ञानमुक्तंविधमंतःकरणं तन्मयस्तद्विकारः सत्त्वविमर्शरूपात्तन्मनोमया
दांतरत्वेनाविभिन्नः॥ आतंतंचजडेरसस्पर्शविरहणांतरवस्थितात्मनै नन्यस्यानिश्चयरूपणाविशे
षेतस्तत्राभिधाने॥ अनुष्ठेयपदार्थविषयानिश्चयज्ञानवत्तरत्वविधाकर्मणामधिकारइत्यभिप्रेत्यविज्ञान

२२

मयात्मनो यजुरादिक्रियाहेतुत्वमाम्नायते ॥ विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि चेति ॥ मनोमयवद्विज्ञानमयस्यापि बाह्य
त्वेनानात्मत्वं प्रतिपादयितुमस्मादथांतरमानंदमयमात्मानं श्रुतिरुपदिशति ॥ तस्माद्वा एतस्माद्विज्ञानमयादन्यो
ऽन्तर आत्मानंदमय इति तत्संगृह्णाति ॥ विज्ञानेति ॥ विज्ञानमय आत्मायं विभाति सकलात्मना ॥ ४२ ॥ आनंद
सू ४ मयश्चासौ च ततोऽन्यश्चांतरो फलं ॥ विद्याकर्मणोः फलं फलं तदुपभुक्तमानंदं तदभिव्यंजकोऽधिविशिष्ट आत्मा आनं
दमयः स च फलरूपत्वेनांतरंगत्वात् फलरूपाद्विज्ञानमयादंतरो विविक्तश्च स एवात्मत्वेन बोद्धव्यः ॥ विज्ञानमय
स्तु न फलसाधनं स तु विद्याकर्मनिष्पादकतया बहिरंगत्वाद्धीनोऽनात्मा एवं प्राणमयादिकोशत्रयस्य विवेकेना
त्मनः सूक्ष्मशरीरादिविवेकः सिद्धो भवति ॥ ज्ञानेन्द्रियाणि पंचैव तथा कर्मेन्द्रियाण्यपि ॥ वायवः पंच बुद्धिश्च मनः स
सप्त प्तदशं विदुरिति लिंगसूक्ष्मशरीरस्वरूपं ॥ एतस्यैव सप्तदशकस्य प्राणमयादिकोशत्रयेणावस्थितस्य प्रतिपा
दितत्वात् ॥ एवं स्थूलसूक्ष्मशरीराभ्यामात्मनः सिद्धेऽपि विवेके कारणशरीरादपि तस्य विवेकेन भवितव्यं ॥ तद
र्थमिदं चिंतनीयं ॥ किमानंदमय एव सर्वांतर आत्मा उत ततोऽप्यंतरमन्यदस्ति किं तदेव सर्वांतरमात्मतत्त्वे नास्तिम
तं ॥ आनंदमयस्तु अन्नमयादिवत्सोपाधिक एवेति ॥ तन्नान्योऽन्तर आत्मानंदमय इति यदन्यस्मादन्यस्यांतरस्यात्म
नोऽनुपदेशात् ॥ मयट् विकारप्रायपठितस्य तद्बाधेन प्राचुर्यार्थतया ह्युपपत्तेः ॥ प्रियशिरस्त्वादिनांतोपाधिकत्वे
नाप्यस्मिन्नसंभवात् ॥ यदेष आकाश आनंदो न स्यात् सैषानंदस्य मीमांसा भवति ॥ इत्याद्यानंदशब्दाभ्यासस्य

वसंतेऽपेतिषा यजेतेति ज्योतिःशब्दस्य ज्योतिष्टोमप्रतिपादकत्ववदानंदमयपरत्वेन योजयितुं शक्यत्वाद् अभ्यस्यमानः स
एव सर्वांतर आत्मेति चेन्नैवं। ब्रह्मपुच्छं प्रतिष्ठा आनंदमयादिसर्वाधारस्य सर्वांतरस्य ब्रह्मण उपदेशात्। तत्र तत्त्व
पञ्चाधारत्वे न विरुध्यते॥ ब्रह्मविदाप्नोति परमिति। फलवद्ब्रह्मोपक्रमस्य सत्यं ज्ञानमनंतं ब्रह्म॥ ब्रह्मणा वि
पश्चितेति। अस्ति ब्रह्मेति वेदेत्यस्य ब्रह्मण्यभ्यस्यमानत्वात्। अभ्यासो हि तात्पर्यलिंगं। उपक्रमोपसंहारावभ्यासो
ऽपूर्वता फलं। अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये इत्युक्तत्वात्॥ ब्रह्मशब्दोऽप्यपरिच्छिन्ने निर्विकारे ब्रह्मणि मु
ख्यः॥ ननु सावयवे आनंदमये। नैव तस्य ब्रह्म पुच्छं प्रतिष्ठेत्यानंदमयावयवत्वश्रवणादंगाधान्यमिति मंतव्यं। ब्र
ह्मपुच्छमिति पदद्वयरूपाद्वाक्यात् प्रतीयमानस्यावयवत्वस्य ब्रह्मपदश्रुत्या बाधात्॥ श्रुतेर्हि वाक्याद्बलीयस्त्वा
त्॥ आनंदशब्दाभ्यासः सोऽपि निरतिशयनिर्विकारसुखस्वरूपे ब्रह्मणि मुख्यः॥ विज्ञानमानंदं ब्रह्म। आनंदो ब्रह्मे
ति व्यजानात् इत्यादिश्रुतिप्रसिद्धेः॥ यद्यानंदमय एव सर्वांतर आत्मा स्यात्॥ असन्नेव स भवति। असद्ब्रह्मे
ति वेद चेदिति श्लोकोदाहरणमसंगतं स्यात्॥ तथा। एतमानंदमयमात्मानमुपसंक्रामतीत्यन्नमयादिवदुपसं ॥२२॥
॥२३॥ क्रमितव्यत्वप्रतिपादनं नोपपद्येत अन्यस्योपसंक्रमितस्याभावात्॥ तस्माद्ब्रह्मैव सर्वांतरं स्वप्राधान्येनैव निर्दि
ष्टमिति मंतव्यं॥ पुच्छशब्दस्त्ववयववाचकत्वेनापठितोऽप्याधारत्वमात्रलक्षणः॥ एवं चानंदमयपदे मयट् विकारार्थो
यपाठाद्गृहीतो भवति। तस्मादन्नमयादिवदानंदमयोऽप्युपाधिविशिष्ट इति सिद्धं॥ एतत्त्वानंदमयोऽभ्यासा

दिस्यापि चकरणेनानिर्णीता ॥ सचोपाधिः आगुडी रितसात्त्विकोतः करणपरिणामरूपा आत्मस्वरूपसुखाभिव्यंजकावृत्तिः सा
प्रियमोदादिभेदेन बहुधा भिद्यते ॥ निरतिशयानंदो ह्यस्यात्मनः स्वरूपीतद्यमुष्मिकमपि स्थापितेषु पुत्रादिभिःकच्च
न्नादिदर्शनेन तद्भोपभोगजनितैः प्रियमोदादिसंज्ञकैरेतैः करणवृत्तिविशेषेणाभिव्यज्यते । अतएव यत्किंचित्तद्विष
यसुखमितिलोके व्यवहरति । तत्रक्षणिकत्वप्रतीतिस्तु व्यंजकोपाधिकृता ॥ तथाविद्याश्रवणमननयः स्वापप्रकृया
दौ स्वकरणेस्वस्वलीयीनेतथाच कारणात्मनोवस्थितत तथाविधवृत्तिक्रमं मलिनसत्त्वप्रधानमविद्यापरपर्या
यं ॥ भा वरूपाज्ञानमेवानंदमयोपाधिर्विवक्षितः ॥ सचानंदवृत्तिः करणवृत्तिविशेषेऽभिव्यज्यते । तथाविधविक्षेपस
न्नेतः करणेआनंद इति च यदतोभाष्यकारस्यापि कारणसत्त्वपरत्वमेवाभिप्रेतोऽर्थ इति व्याख्येयं ॥ येत्वन्यथाव्या
चक्षते तेषां तथाविधज्ञानादिव्येवनद्भूतः स्यात् ॥ ईदृग्विधोपाधिविशिष्टोयमानंदमयः सोयं प्रागुक्तरीत्या
विज्ञानमयात्कोशांतरो ज्ञातव्य इत्यर्थः ॥ एवं पंचकोशाः प्रतिपादिताः ॥ तत्र बाह्यस्यान्नमयादेरांतरेणांतरेण कोशेन
यत्पूर्णत्वं श्रुतिः प्रतिपादयति ॥ तेनैष पूर्णः सवा एष पुरुषविध एवेति तस्य ग ह्वाति ॥ योयमिति ॥ योयमन्नमयः सो
यं पूर्णः प्राणमयेन तु ॥ ४७ ॥ मनोमयेन प्राणोपि तथा पूर्णः स्वभावतः ॥ तथा मनोमनोमयो ज्ञानाख्यात्मा पूर्णो ज्ञानमये
न तु ॥ ४८ ॥ आनंदेनैवं पूर्णस्तथा ज्ञानमयः स्फुरः ॥ तथानंदमयश्चापि ब्रह्मणान्येन साक्षिणा ॥ ४९ ॥ सर्वांतरे

आ

पा

सपा

णत्वं प्रत्येकं ब्रह्मणान्येन केनचित्॥ योयं प्रतिपत्तिसौकर्याय शिरःपुच्छपक्षोत्तरादिभेदेन परिकल्पितोन्नमयः कोशः सोयं स्व
स्मादंतरेण तथाविध्यपरिकल्पितावयवेन प्राणमयेन पूर्णः॥ तथा मूषाकाराप्रतिमास्यास्मान्निषिक्तद्रुतताम्रेणरस
र्वथाः पूर्यते तद्वत्॥ एवमुत्तरत्रापि योजना॥ ब्रह्मणाऽन्येनेति॥ यद्यपान्नमयादन्योंतर आत्मेति पृथक् देशोना
स्ति तथापि ब्रह्मपुच्छं प्रतिष्ठेत्यानंदमयाधारत्वेन निर्दिष्टो सत्यज्ञानादिलक्षणं स्यात्मनि मायोपरिकल्पितान्नम
यादि सकलकोशस्य वस्तुसाक्षिभूतं पंचकोशगर्भितं सर्वांतरं च ब्रह्म तस्य च तादात्म्याध्यासादन्नमयादयोध्यात्मा
नः स्युः तेन सर्वोपि प्रधानेन साक्षिचैतन्यरूपेण ब्रह्मणा आनंदमयोपि पूर्णो व्याप्तः॥ ब्रह्मणान्येनेति॥ उक्तविधं ब्र
ह्म तु देशकालवस्तुकृतत्रिविधपरिच्छेदराहित्येनाद्वितीयत्वादन्येन केनचिदपि वस्तुना न व्याप्तोस्ति यमेव सर्व
मापूर्णापरिच्छिन्नो सद्वर्तत इत्यर्थः॥ एतावतानिहितं गुहायामिति मंत्रवाक्ये यदुक्तं निहितत्वं ब्रह्मणः प्रदर्शितं तद्व्या
ख्यातं भवति॥ तथाविध्यस्य सर्वांतरस्य ब्रह्मणः प्रतिपत्त्युपायत्वेनान्नमयादिपंचकोशाः प्रतिपादिताः॥ न
तूपासनार्थाः ननु येन्नं ब्रह्मोपासते ये प्राणं ब्रह्मोपासते इत्यादिमंत्रवाक्यादन्नमयादीनामुपासनांगत्वं प्रतीय
त इति चेत् मैवं शीर्षोत्तरादयस्योपासनाप्रकरणस्थस्य अन्नाद्वै प्रजाः प्रजायंते इत्यादिमंत्रस्य अन्नस्य कोशत्वेन
प्रतिपादितान्नप्राणादिस्वरूपावं द्रढयितुं तत्तत्कोशावसाने संवादनोदाहृतत्वात्॥ यद्यत्रैवोपासनाविध्यपरं

रवां स० ॥२८

प्राणमनोमयकोशोदाहृतश्लोके भूपासितिचोदनाभ्यस्तौ। अन्नमनोमयकोशस्य। तावदत्र पदेशार्थत्वमेव न तत्पासनार्थत्वं तत्स्मा
सामान्यादत्रापि तथैव संगतिः कार्यो। इतरथा पासनोपदेशरूपश्रुतिप्राधान्यार्थभेदाद्वाक्यभेदः स्यात्। संसोतिमदेकवाक्यतत्र
दोनयुक्तः संत्तवसे कवाप्यत्वेवाक्यस्तेदस्तुनेत्यतत्तन्निन्यायात्। एवं सर्वत्र ब्रह्मोपदिश्यते तस्य निर्विशेषत्वेन वाङ्मनसा
तीतत्वादसत्वमाशंक्यतन्निरासाय मंत्रोयमुदाहृतः॥ असन्नेव स भवति। असद्ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद।
संतमेनं ततो विदुरिति। तत्र यद्यपसदेव ब्रह्म तथापि न तदस्तीति वेदनीयमित्येवं विधार्थस्य स्फुरणात् ब्रह्मस्यसं
शयोभवति। किमसदेव ब्रह्म उत सदेवेति। तथा तस्य ब्रह्मणः सर्वगतत्वात्॥ अविद्वानपि तद्ब्रह्म गामोतिनवा॥ य

द्वा७ दि न प्राप्नोति तत्सामान्याद्विद्वानपि तद्ब्रह्म न प्राप्नोति प्राप्नोति वेति तावेतौ विद्वदविद्वद्विषयौ प्रश्नौ अनुप्रश्नरूपौ दर्शितौ।
उत। अविद्वानमुं लोकं प्रेत्य। कश्चन गच्छती३। आहो विद्वानमुं लोकं प्रेत्य कश्चित्समश्नुता३ उ इत्यत्र पूर्वोक्तविचारार्था
एषां प्रश्नाणामुत्तरभूता श्रुतिः सोकामयेतेत्यादिका॥ तत्र रसस्वरूपता ब्रह्मणो यदिस्ति त्वं तत्सनीतिपादितं श्रुतौ॥
रसो वै सः। रसं ह्येवायं लब्ध्वानंदी भवतीति तत्संग्रहमाह॥ यदिदमिति॥ यदिदं ब्रह्मपुच्छाख्यं सत्यज्ञानं द्वया
त्मकं॥ ४६॥ स रसः सर्वदा साक्षान्नान्यथा सुरपुंगवाः। एतमेव रसं साक्षाल्लब्ध्वा देही सनातनं॥ ४७॥ सुखी त
भवति सर्वत्र नान्यथा सुरसत्तमाः॥ ब्रह्मपुच्छप्रतिष्ठेति यदिदं पंचकोशांतरं अपरोक्षतया भासमानं सत्यज्ञानमनं
तं ब्रह्मेति उदारितलक्षणं ब्रह्म सोयं सोयं मधुरादिरसवत्सुखदामसग्दृष्टिस्त्रियेगिसि सा स्वादव्यवधाने नास्वा
द्यत्वाद्रसः। एतद्रसालकृतमुपपादयति॥ एवमेवेति॥ आत्मज्ञो हि देही सनातनमनाद्यंतमेतमेवात्मान

निरतिशयानंदरूपत[illegible]पारसाल्लं कृत्वा लानिसाक्षात्कृत्य सर्वेष्वपि देहेषु सर्वेष्वपि कालेषु सुखी भवति ॥ एतद्व्यतिरिक्तमपु
राञ्च घनित्यवा[illegible] रसलाभेनेदुःखं चित्कदाचिदेव सुखियते ॥ अतो विद्वदनुभवबलादस्य रसरूपकत्वमनोरसत्वाद्ब
ह्मणोऽस्तित्वं सिद्धमित्यर्थः ॥ पुनरपि तत्ता घनार्थं श्रूयते ॥ को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनंदो न स्यात् ॥
एष ह्येवानंदयातीति तत्संगृह्णाति ॥ असत्यस्मिन्निति ॥ अत्यस्मिन्परानंदे स्यात्सभृतोखिलात्मनां ॥ ४९ ॥ कोऽजी
वति नरो देवाः को वा नित्यं विचेष्टते ॥ तस्मात्सर्वात्मना चित्ते सा समानो रसो हरः ॥ ४० ॥ आनंदयति दुःखार्तं जीव
मानेकरूपावत्वात् ॥ यदि प्राणिनां शरीरमध्ये परमव्योमसंज्ञके [illegible] निरतिशयानंदरूपोऽयमा
त्मा न स्यात् । तर्हि को वा जंतुर्जीवति प्राणधारणं करोति को वा प्राणादिचेष्टां नित्यं कुर्यात् ॥ तस्मात्[illegible]
रोपित्तस्य[illegible]लानुपपत्तेः ॥ अतं [illegible]पितकार्यस्य[illegible]नुपपत्त्या तत्कारणस्य ब्रह्मणः सत्यत्वमंगीकर्तव्यमित्यर्थः ॥ वे
स्मादिति ॥ यस्मादेवमानंदरूपो विद्यते तस्मात्सर्वप्राणिहृदये आपरोक्ष्येण भासमानं ब्रह्म रसशब्दाभिधेयं भव
ति ॥ कुतोऽस्यानंदरूपतेत्यत आह ॥ आनंदयतीति ॥ यस्मादसौ संसारदुःखाभिभूतजीवात्मानं तत्कर्मानुरूपे
ण सुखयति ॥ तस्मादस्यानंदरूपत्वं ॥ अत एव चान्यत्राम्नायते ॥ एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजी
वंतीति [illegible]पि ब्रह्मणः सत्त्वं समर्थितं ॥ तो ॥ यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्ते
निलयनेऽभयं प्रतिष्ठां विंदते ॥ अथ सोऽभयं गतो भवति ॥ यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते ॥ अथ तस्य भ
यं भवतीति तत्संगृह्णाति ॥ यदेति ॥ यदा ह्येवैष एतस्मिन्नदृश्यतादिलक्षणे ॥ निर्भेदे परमेश्वरे [illegible] ॥ १०

गतोर

२०८

॥२५०॥

॥२५१॥

हि २

तदेवाभयमत्यंतकल्याणं परमामृतं ॥ स्वात्मभूतं परं ब्रह्म समाप्नोति स्वर्गवासिनः ॥५१॥ अ
हं रूपत्वादित्यादि निरूपे अद्वये द्वयप्रपंचरहिते अनात्म्य आत्मनः संबंधित्वादौ त्यं स्थू
लशरीरं तद्रहितो अनिरुक्तौ सूक्ष्मभूतारब्धत्वात्स्य मेपि तन्निरुच्यत इति निरुक्तौ लिंग
शरीरं तद्रहितेश्च यतो हि न तस्य कार्यकारणं विघत इति ज्ञानिच्छयने निलीयते स्मिनु कार्यकारण
प्रपंच इति निलयनं भावरूपमज्ञानं कारणशरीरं तद्रहिते ॥ एवंभूते ब्रह्मणि निर्भेदमहमन्यः ब्रह्मान्य
दित्येवं विधभेदरहितं पारमार्थिकमेकत्वं श्रवणमननादिसाधनैः साधको विंदते लभ
ते ॥ तदेव तस्मिन्नेव समये अभयं भयरहितं भयहेतोर्भेदस्य निवृत्तत्वाद्धुदो हि भयहे
तुः द्वितीयाद्वै भयं भवतीति श्रुतेः निरतिशय निर्विकारानंदरूपतयात्यंतशोभनं परमं
सर्वोत्कृष्टं अमृतं कदाचिदपि नश्वरं एवंभूतं परं ब्रह्म सः ब्रह्मात्मैकत्वविद्याति प्राप्नो
ति ॥५१॥ ॐ रामचंद्राय नमः ॥ यदा ह्येवैष एतस्मिन्नल्पमप्यंतरं न वेद ॥ विजानाति तदा
तस्य भयं स्यान्नात्र संशयः ॥५२॥ यदा ह्येवैतस्मिन्नुक्तलक्षणे ब्रह्मणि अल्पमप्यंतरं

॥

ते दंपश्यति। तत्तस्य अहमन्यः संसारी मत्तोऽन्यद्ब्रह्मेत्येवं भेददर्शिनस्तद्ब्रह्म भयं भयहेतुः स्यादित्यर्थः॥ ५२॥ ननु ब्रह्मणः
सर्वगतसामान्येनावस्थानात् सुषुप्तावयोगाच्च भेददर्शिनोऽप्यभयप्राप्तिः किं न स्यादिति तत्राह। सर्वेषामिति। सर्वेषामात्मभू
तं यद्ब्रह्म सत्यादिलक्षणं। उक्तस्तैत्तरश्रुत्ये यथाजातजनैर्द्विति॥ ५३॥ भेददर्शिनामभेददर्शिनां च सर्वेषां हृ
दयमध्ये आत्मत्वेनोपलभ्यमानं सत्यादिलक्षणं यद्ब्रह्म तन्मूर्खजनं प्रत्यक्षस्तैउदासीनमेव भवति। तस्य ब्रह्म
जिज्ञासापराङ्मुखत्वात् न प्रकाशत इत्यर्थः॥ ५४॥ सम्यग्ज्ञानैकनिष्ठानां तदेव परमं पदं। तदात्मतया भाति के
वलं रूपमासुराः॥ ५५॥ ये तु अद्वितीयानंदरतिनिष्ठानां द्रष्टुमात्मैकत्वविषयानिर्विवेकि तत्साक्षात्कारज्ञानैकनि
ष्ठास्तेषां परं पदं। यं परमं सर्वोत्कृष्टं मायातत्कार्यातीतं तदेव केवलं ब्रह्म तदा तस्मिन् साक्षात्कारसमये स्वात्मभा
वेन रूपया भाति प्रकाशते। अत एवाम्नायते। नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणु
ते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वामिति। अनधिकारिणं प्रत्युदासीनमेव ब्रह्म॥ ५६॥ यस्तस्य यद्यपि
ज्ञाने मननादिसाधनेन तत्स्वरूपं न साक्षात्करोति तत्स्याल्पस्योपहतस्य ब्रह्म भयकारणं स्यादित्याम्नातं। तत्त्वेव भ
यं विदुषोऽमन्वानस्येति तत्तैत्तिरीयश्रुतिः। तत्त्वेवेति तदेव ब्रह्म तु सांगवेदाध्यायिनोऽपि ब्रह्मसाक्षात्काररहितं मन

न्यत्रा ८

॥

नमकुर्वाणस्य भयहेतुर्भवतीत्यर्थः॥तस्येबाधीतवेदस्य सहोगैः सुरपुंगवाः॥मननेन विहीनस्य भयहे
तुः सदा रासरभवत्॥५५॥उक्तं ब्रह्मणो भयहेतुत्वं दृढयितुं कैतिमंत्रान् समुदाहरति॥भीषास्मात्ववतेवा
युर्भीषोदेति दिवाकरः॥भीषास्मादग्निरिंद्रश्च मृत्युर्धावति पंचमः॥५६॥भीषास्माद्वातः पवते भी
षोदेति सूर्यः॥भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति यत् तत्र संगृह्णाति॥भीषेति॥वातादी
नामखिलजगद्व्यवहारनिर्वर्तनेऽधिकृतानां महाप्रभाववतां देवानामपि ब्रह्म हेतुः किमु वक्तव्यमन्ये
षां प्राणिनां भयहेतुरिति भावः॥५६॥एवं स्वयाऽभयहेतुत्वादपि ब्रह्मणोऽस्तित्वं सिद्धं॥यदेष आकाश
आनंदो न स्यात् एष ह्येवानंदयातीति यन्निरतिशयानंदरूपत्वं ब्रह्मणोऽस्तित्वसाधनायोपन्यस्तं
तदुपपादनाय तद्विशेषं सार्वभौमादिहिरण्यगर्भांतमुत्तरोत्तरं शतगुणभावेनावस्थितमानंदं प्र
तिपादयति श्रुतिः॥सैषानंदस्य मीमांसा भवतीत्यादिना सएको ब्रह्मण आनंद इत्येवमंतेन तत्संगृ
ह्णाति॥अस्यैवेति॥अस्यैवानंदलेशान् स्तंबांता विष्णुपूर्वकाः॥भवंति सुखिनो देवास्तारतम्यक्रमेणा
नु॥५७॥ब्रह्मस्वरूपभूतायां निरतिशयानंद अस्यैवानंदस्यैकदेशान् ब्रह्मादिस्तंबांताः सर्वे दे
हिनः स्वस्वरूपानंदाऽभिव्यंजकोपाधिमहत्त्वाल्पीयस्त्वाभ्यां तरतमभावेनावस्थितमानंदमाप्य
सुखिनो भवंतीत्यर्थः॥५७॥अतो सार्वभौमाद्यानंदविशेषमुपन्यस्य तत्र तत्र श्रोत्रियस्याकामहत

प्र॰

स्येत्याम्नातं ॥ तदभिप्रायं संगृह्णाति ॥ तत्रादिति ॥ तत्र सर्वविरक्तस्य श्रोत्रियस्य ब्रह्मनिष्ठस्य हि नः ॥ स्वरूपभूत आनंदः स्वयं भाति प्र
त्यग्रूपया ॥ ५७ ॥ तेषु तेषु सार्वभौमादिपदेषु उत्तरोत्तरं सातिशयत्वादनित्यत्वपरिज्ञानात् ततो विरक्तस्य एषणात्रयविनि
र्मुक्तस्य प्रसन्नचित्तस्य श्रवणमननादिसाधनकलापमनुष्ठितवतः श्रोत्रियस्य ब्रह्मविदो नवधिकानंदप्रा
प्तस्य श्रवणात्तत्त्वे शास्त्रतः सार्वभौमादिष्वेतेषु उत्तरोत्तरभावे नावस्थितः सर्वोप्यानंदस्तस्य विदुषः स्वरूपभू
त इति तत्पदे वस्थितस्य सार्वभौमादेर्यथानंदविशेषोऽवभासते ॥ तथा विदुषोऽपि स्वयं साधनान्तरेण प्रत्यक्ष्येण
तदपि घटानंदो भवतीत्यर्थः ॥ ५८ ॥ एतेन सार्वभौमादिहिरण्यगर्भांतोत्तरोत्तरमन्नाद्येनावस्थित आनंदविशे
षा जन्यतारतम्ये दुरस्य समुद्रस्य वयस्ते भ्यंगतास्तादृ द्वितीयं बलपरिच्छेदस्का सावान्निरतिशयानंदरूपं त्वविद्यते
त्यभिप्रेत्याह स च यश्चायं पुरुषे यश्चासावादित्ये स एक इति
तेति श्रुतिरुच्यते ॥ स य आयं पुरुषे ॥ यश्चासावादित्ये ॥ स एक इति
सांग्रहणाति ॥ अयमेवेति ॥ अयमेव शिवः साक्षादादित्यहृदयतया ॥ अन्येषां हृदयेष्वेव भाति साक्षितया स्वयं ॥२८
नि॥५ ॥ ५९ ॥ योयमाकादिकारणत्वेन दिष्टो विदुषां स्वस्य रूपतया साक्षात्क्रियमाणो निरतिशयानंदरूपः परशिव एव
चा॥१ एष आदित्यहृदये ॥ आदित्यो हिरण्यगर्भः ॥ सर्वे धात्मानं स्वयं व्यकुरुत आदित्यस्त्रेयुवाभ्युत तायमिति श्रुतेः ॥ तस्यम
॥२४॥ ग॥१ थमशरीरिणो हिरण्यगर्भस्य हृदये विशुद्धसत्त्वप्रधानमायोपाधिकः सन्सोऽसावादित्यस्थ एव स्थानमाह ॥ अनावृत
ज्ञानतया सर्वज्ञ ईश्वरो भातीत्यर्थः ॥ ५९ ॥ तेषामेष एव परशिवोऽन्येषां जीवानां हृदये प्रत्यक्तया मध्ये मेनसत्त्व
धानाविद्योपाधिकः किंचिज्ज्ञः संसारी साक्षितया भातीत्यर्थः ॥ ५९ ॥ एवं विरुद्धस्वभावयोरप्यनयोरुभयोर्भि

न॰

त ४

रयोरैक्यमभिप्रेत्य निष्कर्षमाह ॥ विहायेति ॥ विहायसा स्थूलदेहादिमायान्तं विवेकतः । सर्वसाक्षिणमात्मानं यः प
श्यति स पश्यति ॥ ६० ॥ मायानाम माया सत्त्वरजस्तमोगुणात्मिका प्रकृतिः सा च दोषरिरतजीवेश्वरोपाधिद्वयसा
रणरूपा अव्यक्तशब्देनगतं सत्यमत्र विवक्षितं ॥ तथा चोक्तम् अत्र स्थूलशरीरादितत्कारणभूतमायापर्यन्तं सर्व
दृश्यं किंचिज्ज्ञत्वादि विरुद्धधर्महेतुभूतसाक्ष्यत्वादनात्मेति विविच्य तत्त्यज्येयत् भयत्रानुगतं साक्षिचिन्मा
त्ररूपमत एव परिच्छेदशून्यत्वात् सर्वसाक्षिभूतं तदेकमेवेत्येवमैक्येन यः आत्मानं पश्यति स यथार्थदर्शी ॥ ६० ॥
रुद्रनारायणादीनामिति ॥ रुद्रनारायणादीनीत्त्वाबानां नानात्वसाक्षिणी । एवं तर्कप्रमाणाभ्यां यः पश्यति
स पश्यति ॥ ६१ ॥ ते हि पराशिवस्यावतारविशेषा लीलाविग्रहधारिणस्तेषामन्येषां जीवानां च साक्षिभूतं
चिन्मात्रमुक्तरीत्या स्वात्मभावेन यः पश्यति स एव ब्रह्मविद् ॥ एतेन सच्चिदानन्दरूपस्य परशिवस्य जीवेश्व
रोपाधिकृतपरिच्छेदनिरासेन तस्यापरिच्छिन्ननिरतिशयज्ञानानन्दैकरसत्व [illegible] मुपपादितं भवति
यद्यप्येतत्सोत्रपरतात्पर्यप्रतिपादकस्य सर्वान्कामानिति मन्त्रभागस्य व्याख्यानरूपत्वादत्र समाम्नातव्यं
तथापि यदेतदाकाश आनन्दो न स्यादिति रूपन्यस्त तर्कसमर्थनार्थमत्रैव प्रसंगादाम्नातमिति द्रष्टव्यं
एवमद्वितीयनिरतिशयनिर्विकारसच्चिदानन्दैकरसस्य ब्रह्मणोऽस्तित्वप्रतिपादनात् अस्ति नास्तीति संशयो
निराकृतः ॥ ६२ ॥ विद्वानपि न प्राप्नोति वेति प्रश्नस्योत्तरभूता श्रुतिः ॥ स य एवं विद्वान्निखादि कारतमानं द
मयमात्मानमुप [illegible] संक्रामतीत्येवमंतात् तदर्थं संगृह्णाति ॥ यस्यैवं तर्कमानाभ्यामस्ति विज्ञानमास्तिका

54

का. त्रा.

खलौ दर्विवद्रसमादिवत्सिद्धास्वानमास्वना ॥ ६२ ॥ अन्नादानंदवल्यन्तकोशानां तासेन विज्ञासिता न ॥ उपसंक्रामतीत्यस्य प्र
सादस्यैवकेवलात् ॥ ६३ ॥ यस्य परवस्तु विदुषः एवमुक्तप्रकारेण निरतिशयानंदब्रह्मात्मैकत्वज्ञानमस्ति स ब्रह्मवि
दस्मादस्मैवयसमुदायरूपादस्मिन्नादस्माल्लोकात् । प्रेत्यं तरिक्षस्वर्गादिभेदभिन्नादनात्मप्रपंचाद्दासानमात्म
ना बुद्ध्या विविच्यान्नमयात्मानं कृत्वा पुनरपि विवेकेनांतरं प्राणमयाद्यात्मानमवलंब्य निदिध्यासेन धारितान्त
बाह्यस्यान्नमयादेरात्मत्वं जानानो नामयादिकोशेभ्यो प्यांतरं सर्वजगत्कल्पस्पदं सत्यज्ञानानंतानंदैकर
सं ब्रह्म पुच्छं प्रतिष्ठेति सर्वाधारत्वेन यन्निर्दिष्टं ब्रह्म तदुपसंक्रामतीति साधकः परीशावार्पणबुद्ध्या अनुष्ठितैर्यज्ञदाना
दिभिः आराधितस्य परमेश्वरस्य प्रसादेन विद्योदये सति भेदहेतोरविद्याया निवृत्तत्वेन स्वस्वभेदभ्रमनिरासात्सर्व
गतत्वेन नित्यप्राप्तमपि ब्रह्म कंठगतचामीकरन्यायेन पुनः प्राप्नोतीत्यर्थः ॥ एवं चाविद्वानेव प्राप्नोतीति निष्प्रति
पादनादविदुषोपि ब्रह्मप्राप्तिरस्ति न वेति शंकातिनिरासितो वेदितव्यः ॥ ६३ ॥ एवं वेदनमात्राद्ब्रह्मप्राप्तिप्रति
पादनेन ब्रह्मविदाप्नोति परमित्यस्य वाक्यस्य सा गतस्तद्व्याख्यानरूपो यो वेद सोश्नुते इति मंत्र सांगश्च व्याख्या
तो स्ववृत्ति ॥ अद्वितीयनिरतिशयानंदरूपब्रह्मप्राप्तिर्ज्ञानमात्रसाध्येत्यस्मिन्नर्थप्रतिपादिते र्थे श्रुतिः सं
वादार्थकं चिन्मंत्रमुदाजहार ॥ स चैवमाम्नातः ॥ यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । आनंदं ब्रह्मणो वि
द्वान्न बिभेति कुतश्चनेति ॥ तत्संगृह्णाति ॥ यतो वाचो निवर्तंते निमित्तानामभावतः ॥ निर्विशेषे शिवे
शब्दैः प्रत्यंदेवोः अवर्तत ॥ ६४ ॥ यतो स्मादुक्तलक्षणात्स्वप्रतिनिर्विकल्पब्रह्मणः सकाशाद्धर्मोनिवर्तंते ॥ आसिद्धा
ये

५२ ना ५ त ॥२८

उभयशक्त्या परावर्त्तत इत्यर्थः ॥ कुत इत्यत आह ॥ निमित्तानामिति ॥ जात्यादीनि हि शब्दानां प्रवृत्तिनिमित्तानि तेषां प्रवृत्तिनिमित्ता-
नां ब्रह्मण्यभावादित्यर्थः ॥ एतदेवोपपादयति ॥ निर्विशेषमिति । यस्मादस्थूलमनण्वह्रस्वमित्यादिश्रुत्या ब्रह्म निर्विशेष-
मवगम्यते ॥ अतस्तथाविधे जात्यादिसकलधर्मरहिते कथमभिधायकत्वेन शब्दः प्रवर्त्तेत नैव प्रवर्त्तितुं शक्नोतीत्यर्थः ॥ ६ ॥
६५ विशेषवत्किंचिदर्थमाश्रित्य खलु शब्दः प्रवर्त्तते ॥ यस्मादेतन्मनः सूक्ष्मं व्याप्तं सर्वगोचरं ॥ ६५ ॥ अभिधेयगतजात्यादिकं के-
चिद्विशेषं प्रवृत्तिनिमित्तत्वेनोपादायैव लोके शब्दः प्रवर्त्तते । अतस्तद्रहिते ब्रह्मणि शब्दप्रवृत्तिरयुक्तेत्यर्थः ॥ सूक्ष्मं सू-
प्रस्तो क्ष्मार्थग्राहकं केवलेन्द्रियसहकारितया सर्वविषयगोचरमन्तःकरणमपि स्ववृत्तिभिः सह यस्मान्निर्विकल्पकाद्ब्र-
ह्मणो निवर्त्तते ॥ ननु तन्निरस्तसर्वोपाधिकं वाङ्मनसातीतं चेत्तर्हि वेदैकप्रमाणाविषयत्वाच्छशशृंगवदसदेव स्यादि-
रि ति नैष दोषः । अविषयस्यापि तस्य लक्षयितुं शक्यत्वात् । तथाहि । सत्यज्ञानादिवाक्यं तावल्लोकसिद्धसत्यादिप्रतिपा-
दनद्वारा यथोदितं निर्विशेषं ब्रह्म विधिमुखेन लक्षणया प्रतिपादयति ॥ अथात आदेशो नेति नेत्यादिकं तु व्यतिरिक्त-
सकलनिषेधेन प्रपंचव्यतिरेकावच्छिन्नं तद्व्यतिरेकमुखेनाभिदधत्तद्व्यतिरेकविनिर्मुक्तं तत्स्वरूपं लक्षयति ॥ न चैत-
स्य वेदान्तवाक्यस्याज्ञातज्ञापनत्वेनोत्पत्तिविधिरूपत्वाद्विधौ लक्षणा न न्याय्येति स्थिते सा च लक्षणा न युक्तेति वाच्यं
प्रतिनियतवाच्यार्थत्यागेन विधौ लक्षणास्वीकारे लक्ष्यार्थस्यानियतत्वादनेकत्वेन संदेहः ॥ इत्यादिसन्निप्रायेण हि विधौ
लक्षणा न न्याय्येत्युच्यते ॥ यत्र तु मुख्येतरेण संदेहो निवार्यते तत्र विधावपि लक्षणा न दुष्यति ॥ यथार्थ्यं मैत्रवेदिस्पर्शबर्हि-
र्वेदीति ॥ एवमत्रापि व्यतिरिक्तसकलनिषेधादनेकत्वसंदेहाभावाद्विशेषेण तस्यैव लक्ष्यत्वसिद्धेर्विधावपि लक्षणा न

दुष्टा॥ नचलक्ष्यस्य सविशिष्टस्यैव ग्रहणान्निरूपाधिकस्य शब्दविषयत्वमिति मन्तव्यं॥ लक्ष्यवस्तूपलक्षणत्वेनयावत्कोपाव
ननुप्रवेशात्॥ अतोऽवाग्विषयत्वोक्तिरभिधावृत्त्यभिप्राया॥ अतएवौपनिषदं कर्मैकत्वसमप्याम्नातं॥ तं त्वौपनिषदं पु
रुषं पृच्छामीति॥ विधिनिषेधमुखवाक्यद्वैविध्यात्तज्जनिताब्रह्माकारमनोवृत्तिरपि द्वैविध्यं भजति॥ तत्र विधिरूपवाक्यजनि
तामनोवृत्तिः सोपाधिनमुक्तेन निरूपाधिकं ब्रह्मविषयीकुर्वती तदवगमयति॥ नचैतावता निरूपाधिकस्य मनोवृत्त्यवि
षयत्वभंगः॥ मनोवृत्तेरेवोपाधेः सद्भावेनास्य सोपाधिकत्वात्॥ नाप्यवस्तुत्वं उपाधेरुपलक्षणत्वेन विषयकोटावननु
प्रवेशात्॥ ६५॥ एवं निषेधमुखेन प्रवृत्तवाक्यजनितमनोवृत्तिरपि समस्तोपाधिव्यतिरेकावच्छिन्नं तत्र ब्रह्मगोचरयन्ती
तदवच्छेदकं व्यतिरेकं स्वात्मानं च कतकरजोन्यायेन निवर्तयति॥ एतदेवाभिप्रेत्याम्नायते॥ मनसैवेदमाप्तव्यमिति॥
यस्मात्क्रोधगतस्यापि वानि कर्मेंद्रियाणि च॥ व्यावृत्तानि पराग्वस्तुविषयाणि सुरोत्तम॥ ६६॥ एवं तु स्वरी सोपाधि
संस्पर्शी विधुरस्य निरस्तसमस्तोपाधिकस्यासंतनिर्विकल्पस्य वाङ्मनसातीतत्वं [illegible] पुराग्वस्तुविषयाणीति॥ पराग्व
स्तूनि इदंकारास्पदानि शब्दादीनि विषया येषां तानि तथोक्तानि॥ ६६॥ तथा च कठैराम्नायते तद्ब्रह्मानंदमद्वंद्वं निर्गु
णं सत्यचिद्घनं॥ विदित्वा स्वात्मरूपेण न बिभेति कुतश्चन॥ ६७॥ परोक्षस्यापि व्यलक्षणत्वयंभूरिति॥ स्वयं ब्रह्म वा
ङ्मनसातीतं तदद्वंद्वमश्रुती यत्र स्तोत्मादि सकलद्वंद्वनिर्मुक्तं वा अतएव निर्गुणं [illegible] स सद्ज्ञानानंदैकरसमेवं रूपं ब्र
ह्मस्वात्मभावेनाविदित्वा॥ ननु कथं तस्य वेदनं संभवति॥ बुद्ध्यविषयत्वात्॥ नैष दोषः॥ व्यतिरेकावच्छिन्नं तद्विषयी

स

॥२९

कुर्वतामनसाऽऽत्मरविप्रकर्षेण व्यवस्थापयितुं वाक्यत्वस्योपपादितत्वात्॥ एवं ज्ञाने नाद्वितीयनिष्प्रपंचस्य प्रकाशाच्चिदानंद
घ स्वात्मभावेनावस्थितो विद्वान् कस्माच्चिदपि न बिभेतीति॥ भयहेतोः स्वातिरिक्तस्याद्वितीयस्य वस्तुनोऽभावात्॥ च न तत्राध्याप्य
र्थेऽकृतो॥ ९॥ उक्तब्रह्मविदो य रूपत्वमाम्नातं॥ एतं ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवमिति तद
र्थं संगृह्णाति॥ एवं ब्रह्म विजानाति स्वगुरोरुपदेशतः॥ स साध्वसाधुकर्मभ्यां सदा न तपति प्रभुः॥ १०॥ यो यमुक्तरीत्या
गुरूपदेशक्रमेण द्वितीयब्रह्मात्मस्वित्स ब्रह्मीभूतः अकृतेन साधुकर्मणा पुण्येन कृतेन वाऽसाधुकर्मणा पापेन न तपति
स्वात्मानमिति शेषः॥ मूढाज्ञाननिष्ठस्य तद्विलसितस्य क्रियाकारकफलात्मकस्य प्रपंचस्यापि बाधितत्वात्॥ अज्ञानी
मुमूर्षावस्थायां यज्ञदानादिशुभकर्माकरणात् स्वर्गाद्यप्राप्तिं स्वकृतपापफलनरकप्राप्तिं च मनसा स्मालोकयन् ताभ्यां
बिभेति॥ ज्ञानी तु भाविजन्मापादककर्मसंचयस्य ज्ञानाग्निना दग्धत्वात्॥ भाविजन्माभावेन न तपतीत्यर्थः॥ ११॥ स
यएवं विद्वानेते आत्मानं स्पृणुत इति वाक्यस्यार्थमाह॥ तप्यतापकरूपेण विभातमखिलं जगत्॥ प्रत्यगात्मतया भाति
ज्ञानाद्वेदान्तवाक्यजात्॥ १२॥ तप्यस्तापि क्रियाविषयो भोक्ता प्रपंचस्तापकानि साध्वसाधुकर्मादीनीत्येवं द्वैविध्येनावस्थितमपि सर्वं
जगदद्वितीयब्रह्मात्मैक्यज्ञानाद्विदुषः स्वस्वरूपतयैव भाति न तत्स्वातिरिक्तं किंचिदस्तीति प्रकाशतेऽपीत्यर्थः॥ १३॥ अल्पमिदमुच्यते॥ क्रि
याकारकलक्षणः सर्वोऽपि प्रपंचः स्वात्ममात्रतयैव तस्य भातीत्याह॥ तर्कस्यादिना॥ कर्ता कारयिता कर्म करणं कार्यं नास्ति क॥ ० ॥ १४

॥३०॥

सर्वमात्मतया भाति प्रसादात्तु रमेश्वरात् ॥ ७० ॥ प्रमाता च प्रमाणं च प्रमेयं प्रमितिस्तथा ॥ सर्वं ॥ ७१ ॥ नियोज्यश्च नियोगश्च साधनानि नियोजकाः ॥
७३ ॥ भोक्ता भोजयिता भोग्यो भोगोपकरणानि च ॥ ७२ ॥ ग्राहकश्च तथा ग्राह्यं ग्रहणं सर्वतो मुखी ॥ ७४ ॥ अन्यथा ज्ञानमज्ञानं संशयज्ञानमेव च ॥ ७५ ॥ षट्ज्ञानं
पञ्चज्ञानं कुदृष्टिज्ञानमेव च ॥ ७६ ॥ घटकुड्यकुसूलं च पटपात्रं च पर्वताः ॥ ७७ ॥ पातालाद्याश्च लोकाश्च सप्तलोकादयोपि च ॥ ७८ ॥ ब्रह्माण्डं तत्र कूस्थानानि …
… ॥ ७९ ॥ समुद्राश्च … सर्वे नदाश्चापि ॥ ८० ॥ मेरुमंदरश्चाश्च पर्वताश्च … ॥ ८१ ॥ वनानि वनदेशाश्च वन्यानि विविधानि च ॥ ८२
… विविधा … दयोपि च ॥ ८३ ॥ आकाशादीनि भूतानि भौतिकान्यखिलान्यपि ॥ ८४ ॥ शब्दस्पर्शादितन्मात्रारूपाणि सकलानि च ॥ ८५
क्रमिकीटपतंगाश्च … अपि च … ॥ ८६ ॥ पशवश्च मृगाश्चैव पन्नगाः … ॥ ८७ ॥ मनुष्याश्चैव मातंगा … स्वरा … पि ॥ ८८ ॥
यक्षराक्षसगंधर्वकिन्नराः … नराः ॥ ८९ ॥ कर्मदेवाश्च देवाश्च देवराजो विराट् … ॥ ९० ॥ अहं त्वमादि … मम … ॥ ९१ ॥
विष्णुर्विधिः शिवः … महा … ॥ ९२ ॥ सदाशिवसमाख्यस्तु … वस्तु … ॥ दिशश्च विदिशश्चैव … क्षत्रमंडली ॥ ९६
वासुदेवस्संकर्षणः प्रद्युम्नश्चानिरुद्धकः ॥ ९७ ॥ मत्स्यकूर्मौ वराहश्च नारसिंहोथ वामनः … तथा भाति प्रसादात्परमेश्वरात् ॥ ९८
आश्रमाश्च तथा वर्णा … विविधा अपि ॥ ९९ ॥ निमेषं चानिमेषं च निषेधा विषयोपि च ॥ १०० ॥ शरीरमिन्द्रियं प्राणो मनो बुद्धिरहंकृतिः ॥ १
कामक्रोधादयस्सर्वे तथा … योपि च ॥ सर्वमात्मतया भाति प्रसादात्परमेश्वरात् ॥ २ ॥ जीवात्मा परमात्मा त्वत्तयो भेदश्च … कथा ॥ ३ ॥
… शक्तिः … अपि च ॥ ४ ॥ अस्तित्वा … दिता अर्था नास्तित्वा … दिता अपि ॥ अनन्ते विविधं सर्वं जगदिदं … नयाः

॥३०॥

नीयतें चेदात्मनः सविशेषता प्रसज्येत । कूटस्थ आत्मा नामरूपात्मकत्वेन भासते प्रतीयते ॥ नेह नाना इति श्रुतेः स्वस्मिन्ना
रोपितसर्पस्य भासकस्य घनीभूतस्य निरपेक्षेण स्वयमेव प्रकाशानंदसाक्षिचिन्मात्रस्य एकात्मा सोऽहं जगद्धारकः रज्जुरिव रूपेण मिथ्या
प्रतीतिः सत्यस्य । नन्वेवमात्मा स्वयंप्रकाशस्तर्हि विद्वत्साक्षि विद्वत्सामर्थ्यं स्वप्रकाशमानत्वे यथार्थतः स्वस्य वेत्ति चेत्तन्न इत्याह नमिति । स्वप्रकाश
मपि तं नर्मलिनितिरोहितं न तदर्थाविषयमनो दृश्यात्वाद्दर्शकत्वे विशिष्टो नैव जानाति लोकिकाः ब्रह्मविदस्तु विजानंति न जानंति एवं तद्वशंजयति ह्यस्य
वेत्तारो न विद्यंते इत्यतस्तथा ॥ एवमात्मा नमद्वैतमात्मा न वेद यः स्थिरः ॥ परमार्थतो निरस्तसमस्तोपाधिकमद्वितीयं चिन्मात्रस्वरूपं नैव जानंति
आत्मतत्त्वं तं इति ॥ अद्वितीयस्यादेवास्यात्मनः परमार्थतो विदितारो न विद्यंते वेदनस्य प्रमाणस्य प्रमाणादि भेदसापेक्षत्वात्तर्हि विद्वानपि
कथं वेद इत्यत आह एवमिति । एवमुक्तप्रकारेण श्रवणादिसाधनजनितया निरस्तसमस्तोपाधिकब्रह्मालंबविषयमनोवृत्त्यावरण
रूपनाशने सति द्वितीयमात्मानं स्वस्वरूपप्रकाशेनैव विद्वान्साक्षात्करोति । एवं विद्वत्प्रायस्य ज्ञानं प्रदर्शितं एतदेतत्साम गायन्नास्ते
इत्यादिना सुवर्णज्योतिरित्यंतेन । तदन्यथा प्रयोजनकथनं नोपपद्यते ॥ सोयमित्यादिना सोयमर्थः निर्मीनिर्लीनं गायन्नास्ते
इत्यावर्तते ॥ हा३वु हा३वु हा३वु इत्यादि सुवर्णज्योतिरित्यंतं साम तस्यचायमर्थः पदेनाविदितकाले भाव्ययोन्यत्रोपात्तं ॥ अहमन्नम्
अहं जगदिदमन्नमाम्नातं सर्वं मत्तो नान्यत्किंचिदस्ति अहो इदं महदाश्चर्यं स्वप्रकाशविलक्षणपरमज्योतिस्वरूपोऽहमेवेति तात्पर्यं

मव्य भवामित्युक्त्वा मम गाय गास्त इतीममर्थमनुसंदधानो विद्वान्निक्षेपस्ये नोरभावादव्याकुलमास्तस्यार्थः॥ एतद् दृष्टांतेनोपपादयति॥ यथानर्तन्
मीश्वरस्य सभा लोकरक्षणी॥ तथा विद्याविनोदाख्या गीतिर्लोकोपकारिणी॥ यथा परमेश्वरस्य नर्तनं वादित्रविज्ञानमपि लोकरक्षाहेतुरित्युपपाद्य
परमेश्वरप्रतिपत्त्युपायतामपि तस्य दृष्टांतेनोपपादयति॥ यथैवेति॥ यथैव वादित्ररोगी तिर्लोकानां हितकारिणी॥ तथैवास्य छंदोगीतिर्लोकानां
हितकाम्यया॥ ११०॥ आ इ काम्यस्य ब्रह्मस्य गीतिर्व्याख्यानलक्षणा॥ परोपकारिणी तद्गीतिरस्यापि सद्गुरोः॥ आदिगुरोः परमेश्वरस्य
कर्तरि षष्ठी॥ तत्कर्तृका गीतिः परतत्त्वव्याख्यानरूपायाईश्वरगीतेति कूर्मपुराणे प्रसिद्धा सा यथा परतत्त्वोपदेशेन गीतिर्लोकोपकारि
णी॥ एवमस्यापि द्वयोर्गीतिरपि परतत्त्वप्रतिपादनेन जगदुद्धरणायेत्यर्थः॥ १११॥ नन्वयं छंदोपदेशो वाक्यांतरादपि प्रसिद्ध इति विद्वद्योगान
मयुक्तमित्यत आह॥ लौकिके॥ इति॥ लौकिके ध्रुपगानेषु प्रसादं कुरुते शिवः॥ किं पुनर्वैदिके गाने ततो गानं समाश्रयेत्॥ ११२॥ व्याख्यागा
नेच्छति॥ व्याख्यागानेष्वधिकारो वस्तु शिवस्तु अद्वितीयभक्तितः लौकिकीमपि वा गीतिं कुर्यान्निसमतीद्रितया॥ श्रीसंस्कृतंशद्रूपं गघप
घा मिश्रं व्याख्यागानात्मना देशी संभावया परमेश्वरविषया गीति लौकिकी॥ ११३॥ गीतिर्ज्ञानिनां शिवप्रसादस्य कारणं भवेत्॥ गीतिज्ञानेन
वागव्ययाद्योगादेवाशिवं क्ष्यते॥ ११४॥ गीतिज्ञो यदि योगेन नयाति परमेश्वरं॥ प्रतिबंधकबाहुल्यात्तस्यैवानुचरो भवेत्॥ ११५॥ केवलं लौकि
कं गानं न कुर्यान्मोहतोपि वा॥ यदि कुर्यात्प्रमादेन प्रायश्चित्ती भवेद्द्विजः॥ ११६॥ अतस्तु संसारविनाशनेरतः श्रुतिप्रमाणेन च तर्कवर्त्मना॥
संबोधमासाद्य शिवस्य ते पुनः स्वं देव गायन्विचरेदिमां महीं॥ ११७॥ श्रुतीरुपनिषदितो॥ ११८॥ यदि ब्रह्मविद्यानिगमनेन तत्र गुह्या तु॥ ११९

ह्मोपनिषत्सु तत्तद्विषया वक्ष्यस्तु उदिता सकलं तु वेदनिर्दिष्टं । कष्टहृत्स्यस्य मकुजस्य नदेया भक्तिसहितस्य शिक्षस्य बल्लवेया ॥ ३७ ॥ अने
नयोक्तप्रकारेण परतत्त्वविषया उपनिषदुपदिष्टा उपनिषन्नामब्रह्मविद्या प्रत्यगात्मनो निरस्तसमस्तोपाधिकब्रह्मोपनीयभेदत्वमहेतुक्त
नमविद्यातत्कार्यं निवर्तयतीति तेन छंदःसु संतः । उक्तं चाचार्यैः । उपनीयेममात्मानं ब्रह्मापास्तद्वयं यतः । निहंत्यविद्यां तज्जं च तस्मादुपनि
षन्मतेति ॥ ३८ ॥ इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञवैभवखंडे उपरिभागे ब्रह्मगीतासूपनिषत्सु ब्रह्मगीतायां तृतीयोध्यायः ॥ ३ ॥
इति श्रीमत्र्यंबकपादाब्जसेवापरायणेन माधवाचार्येण विरचितायां सूतसंहिताव्याख्यायां तात्पर्यदीपिकायां यज्ञवैभवखंडस्योपरिभागे
ब्रह्मगीतासूपनिषत्सु ब्रह्मविद्याव्याख्यायां तृतीयोध्यायः ॥ ३ ॥ श्रीरामचंद्राय नमः ॥ तपःकृतो ऽपततु पर्वतान्नन्तु तीर्थानि पृथक्त्वा
गमान्माप्नुयागैर्विविधैरपि योगैर्हरिं विना नैव मुक्तिं तरति ॥ १ ॥ न प्राप्नोति गमं ... पलं ... ते वैकुंठं चिन्मयमनसो ऽन्यथा गतिः ॥ न मे त्वी
फाणि पतिसत्ससत्यं ये पन्ने ... भुवना ... तो हरिः ॥ २ ॥ एवमैतरेयकतैत्तिरीयकस्थापि ऐदं पर्यं प्रतिपादितं अथ सामवेदोपनिषदो ब्रह्मसे
कसीव कुमारभमाणः ... जैमिनिसामशाखोपनिषदर्थं संगृह्णाति चतुर्थेनाध्यायेन । यद्यदीदं न ब्रह्मत्वव्यपदेशागम्यमेवन
उ तर्कगम्यमिति अहमर्थं चोदयितुं श्रावयामास प्रश्नप्रतिवचनाभ्यां ब्रह्मोपदिश्यते । केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः
प्रैति युक्तः । केनेषितां वाचमिमां वदंति चक्षुः श्रोत्रं क उ देवो युनक्ति इति प्रश्नः । श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ
प्राणस्य प्राणश्चक्षुषश्चक्षुरिति प्रतिवचनं ॥ तदेतदुभयमर्थतः संगृह्णाति ॥ ब्रह्मोवाच ॥ अस्ति देवः स्वतः सिद्धः साक्षी सर्वस्य

सर्वगः॥ संसारार्णवमग्नानां साक्षात्संसारमोचकः॥ ७॥ स्वतःसिद्ध इति॥ वकालिकं पारमार्थिकं सत्यत्वं विवक्षितं॥ साक्षीति॥
स्वपरव्यवहारे हेतुभूता चित्सका नानारूपत्वं साक्ष्यप्रपंचानां तद्भावेन कूटस्थनित्यत्वं चास्य सर्वेषां॥ मनस्तेन प्रेरितं नियमेन॥ विषये
गच्छति प्राणश्रेष्ठस्तेन वाग्वदत्यपि॥ ८॥ चक्षुः पश्यति रूपाणि श्रोत्रं शब्दं शृणोत्यपि॥ अन्यानि खानि सर्वाणि तेनैव प्रेरितानि तु॥
९॥ स्वं स्वं विषयमुद्दिश्य प्रवर्तंते निरंतरं॥ प्रवर्तकत्वं चास्य मायया न स्वभावतः॥ १०॥ तेन सर्वसाक्षिणा स्वतंत्रेण परमेश्वरे-
ण सर्वप्राणिहृदये जीवभावेनानुप्रविश्यावस्थितेनेच्छामात्रात्प्रेरितं प्रवर्तितं सत्स्वविषये मंतव्यं मनः प्रवर्तते न च देहेंद्रि-
यादिसंघातलक्षणसेरकः इति वाच्यं तस्य प्रसिद्धत्वेनोपदेशवैयर्थ्यप्रसंगात्॥ अतस्तदतिरिक्तेन चिन्मात्रज्योतिषा केन
चित्प्रेरितमेव मनः स्वविषयं प्रत्याययतीति युक्तमस्तु पगंतुं प्राणापानादिपंचवृत्तिसालकोप्युख्यप्राणश्च तेन प्रेरित एव
प्राणनादिचेष्टां करोति तथा सर्वशब्दव्यवहारहेतुभूतवागिंद्रियमपि चिन्मात्रस्वरूपेणैतेन प्रेरितमेवाभिवादनरूपं स्व-
कार्यं करोति। चक्षुःश्रोत्रयोरप्येवं योज्यं॥ अन्यानीति॥ उक्तव्यतिरिक्तानि बुद्धींद्रियाणि कर्मेंद्रियाणि चेत्यर्थः॥ ननु असंगोदा-
सीनस्य कूटस्थनिर्लेपस्य निस्तरंगस्य कल्पस्य चिन्मात्रस्वरूपस्यात्मनः कथमीदृग्विधं प्रेरकत्वं संभवतीत्यत आह॥ प्रवर्त-
कत्वमिति मायया इति॥ सत्वप्रधानमायापरिणामरूपदेहेंद्रियाद्युपाधिसंपर्कविशेषेण सुखेन प्रेरकत्वमात्मनः स्तातोन्यं स्वयं
मन आदिकमिति द्वैतापत्तिर्जा चेत्सत आह॥ इंद्रियाणीति॥ सत्राचनैवस्वाभाविकी मता॥ तथा पंचपिंडकस्य सत्तथैवकस्य आप्य

३२

श्रोत्रम्। आत्मनिर्बाधस्फूर्तिः स्वयंदेवो महेश्वरः॥ अनुप्रविश्य श्रोत्रस्य ददाति श्रोत्रतां हरः॥ श्रीमनःप्रभृतीनामिन्द्रियाणां सद्रूपेणास्मिन्न
ध्यस्तत्वात्तन्मायः पिण्डमा येनाधिष्ठानसत्त्वमेवारोपितेषु मनःप्रभृतिषु धर्मत्वेन प्रतिभाति। न चैतेषां स्वाभाविकं सत्त्वमस्ती
त्यर्थः। एवं मनआदिकं यस्येच्छामात्रात्स्वस्वव्यापारे प्रेर्यते स किंरूप इति प्रश्नोत्तु क्तोऽप्यर्थो विवेक्तव्यः। अस्योत्तरमाह।
श्रोत्रमिति। श्रोत्रं तावदितरप्रपञ्चवत्स्वरूपतः सर्वाधिष्ठानभूते चिन्मात्रे आत्मन्यध्यस्तमित्यविवादी। तच्च श्रूयते अनेनेति व्यु
त्पत्त्या श्रवणसाधनमिन्द्रियमधिष्ठानत्वेन तदनुप्रविष्टस्य स्वप्रकाशचिद्रूपस्य परशिवस्य तस्य श्रोत्रस्य श्रोत्रत्वं श्रवणसामर्थ्यं प्रय
च्छति। संवित्स्वप्रकाशात्मकचैतन्यज्योतिस्समवधानेन हि तत्स्वविषयशब्दाभिव्यंजनसमर्थं भवति॥ अतः श्रोत्रस्या
पि श्रवणसामर्थ्यप्रदानात्तथाविधं संविद्रूपं चैतन्यं श्रोत्रस्य श्रोत्रमिति निरुक्त्या निर्दिश्यते॥ एवं मन आत्मनीत्यादावपि यो
ज्यं॥ श्रीमन आत्मनिर्बाधस्फूर्तिः अविरूपपरमेश्वरः मनस्त्वं तस्य सत्त्वस्योद्ददाति नियमेन हि॥७॥ सत्त्वस्थ इति॥ कार्यतः क
णगतं यत्कारणभूतसत्त्वं तस्य चैतन्यप्रकाशाभिव्यंजनसामर्थ्यातिनाविच्छिन्न इत्यर्थः॥७॥ मननसामर्थ्ययुक्तं हि मनस्त्वं
सामर्थ्यमुदीरितरीत्या तस्य चैतन्येनाधीयत इति तन्मनसो मन इत्युपदिश्यते॥ वाचो वाचमिति॥ वाचो वाचमनुप्राप्य प्राणस्य

प्रापणीं हरणादधातीति नियमेनैव चक्षुर्दृष्टं चक्षुषस्तथा॥ न। स्वालम्बनं प्राप्तं वागिन्द्रियमनुआप्य तस्य स्वस्य समाधानेनाभिवदनसामर्थ्य
रूपं वाक्यं प्रयच्छतीत्यर्थः तथा स्वालम्बनं प्राप्तस्य पञ्चवृत्तेर्घ्राणस्यापि प्राणनादिक्रियासामर्थ्यरूपं प्राणं तत्र गच्छति। अत एवान्यत्राप्याम्नायते
ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति। मध्ये वामनमासीनं विश्वेदेवा उपासते॥ इति चक्षुर्दृष्टं चक्षुषस्तथेति। यथा श्रोत्रं तथैवेत्यर्थः। न श्रो
त्रघ्राणयोस्त्योपलक्षणार्थत्वादन्यानतीन्द्रियसंग्रहणायाह। अन्येषामिति। अन्येषामिन्द्रियाणामपि कल्पितानामपीत्यर्थः तत्तद्रूपमनुप्र
प्यददातीति नियमेनतु॥ एवं श्रोत्रादिपरिकल्पनास्पदं कल्पितानां तेषां श्रवणादिसामर्थ्यप्रदं संवर्तितं विवेकसर्वस्वं लक्षणं पदिष्टं
वतीधनन्वीदृशी वस्तु यदिदं विविक्ततया स्पष्टं कस्मान्नानुभूयत इति मामाशंक्य निरस्यति आम्नायतो। न तत्र चक्षुर्गच्छति न वाग्ग
च्छति नो मन इति तत्सुगमम्॥ तेनेति। न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः। अविज्ञानासि वा न विद्मो। न गच्छति स्वयंज्योतिः स्वस्वभावे परमात्मनि॥ १०॥ स
दिवाविदितादन्यस्तथैवाविदितादपि॥ वाक्येति वाच्छब्दिनी कर्मेन्द्रियं तदभिव्यंग्यः शब्दश्चोपपन्नं वाक्शब्देन विवक्षितौ। तस्मा
नादिचक्षुरादीनि ब्रह्मणि माप्य अप्यस्तत्वात्तदासुकानि। अतस्वात्मस्थे ब्रह्मणि कथं तेषां प्रवृत्तिर्विषयविषयीभावस्य
न्योन्यसापेक्षत्वात्तदविषयत्वसमर्थनायाह॥ स्वयंज्योतिरिति॥ स्वप्रकाशचित्स्वरूपस्य सर्वात्मस्य चक्षुरादिकरणं जातिसापेक्षे
पास्त्वद्विषयत्वानुपपत्तिरित्यभिप्रायः॥ एवं चक्षुरादिसर्वप्रमाणविषये परशिवस्वरूपमागमोपि कथं प्रसाधयेदित्याशंक्य
विदिताविदितव्यतिरिक्तावच्छिन्नं तत्प्रतिपादयितुं शक्यमित्यभिप्रेत्याम्नायतो। अन्यदेव तद्विदितादथो अविदितादधीति न तत्

गृह्णातीति स इति। श्रोत्रस्य श्रोत्रमित्यादिना निर्दिष्टः श्रवणादिसामर्थ्यप्रदो यस्सर्वान्तरः स्वप्रकाशः साक्षी चिद्रूप आत्मा स विदिताद्वि
दितक्रियाफलव्याप्याद्विषयादन्यो विलक्षणः। तथा अविदितादपि अज्ञायमानादपि विलक्षणः स्वयंप्रकाशमानत्वात्। एवं
विदिताविदिताभ्यामन्यत्वेनागमप्रमाणात् प्रतिपत्तुं शक्य इत्यर्थः। एवमात्मन्युपदिष्टेऽपि ततोऽन्यं देवं किंचिदुपासनीयं ब्रह्मेति शिष्य
बुद्धिनिरासार्थमाम्नायते। यद्वाचानभ्युदितं येन वागभ्युद्यते। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते। यन्मनसा न मनुते येनाहुर्मनो
मतम्। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते। यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते। यच्छ्रो
त्रेण न शृणोति येन श्रोत्रमिदं श्रुतम्। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते। यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते। तदेव ब्रह्म
त्वं विद्धि नेदं यदिदमुपासते। इति संगृह्णाति। वाचा चेति। वाचा च मनसा चैव चक्षुषा च तथैव च। १०। श्रोत्रेणापि सुरश्रेष्ठ प्राणेनान्ये
न केनचिद्यो न शक्यो गोचरीकर्तुं स त्वमेव मयोदितः। ११। यस्येदमखिलं नित्यं संगोचरं रूपवद्वेथ। तदेव परमं ब्रह्म लक्षितस्वप्रकाश
नातनम्। १२। अथ वागादिभिरिन्द्रियैर्विषयीकर्तुमशक्यं विदिताविदिताभ्यामन्यत्वेन निर्दिष्टं स्वप्रकाशं साक्षिचिद्रूपं यस्य च
सर्वान्तरस्यात्मनः स्वप्रकाशेन वाङ्मनसाद्यखिलं जगत् सूर्यप्रकाशेन रूपमिव प्रकाश्यते स्वव्यापारे प्रेर्यते च तदेव सर्वान्तरं
ब्रह्म किं जानीतेति तस्मादन्यादिकं कारास्पदमित्येकाकारार्थः। १३। एवमिन्द्रियादिविविक्तस्य तत्साक्षिणः प्रत्यगात्मनो यद्ब्रह्म

रूपत्वं ज्ञानस्य प्रतिपादितं तस्य फलमाह्यापते॥ आत्मेत्यत्र धीराः॥४॥ अथास्माल्लोकात्प्रेत्यामृता भवंतीति तदर्थं ब्रूते॥ स्वामिन्॥ एवं जानंति ये धीरा
स्तुकृतिश्च प्रमापातथा गुरुभक्त्या स्वानुभूत्या भवंति खलु ते मुक्ताः॥१४॥ धीरा धीमंतो विद्वांसः॥ एवमुक्तप्रकारेण देहेंद्रियादिकमात्म
नो विविच्य ततो विविक्तं द्वितीयं ब्रह्मात्मतत्त्वं प्रमाणतः श्रीमद्गुरुमुखादधिगम्य मनननिदिध्यासनजनितानिर्विचिकित्ससा
क्षात्कारलक्षणेन स्वानुभवेन ये जानंति ते अमृता खलु क्षणात्तु मुक्तिमाप्नुवंतीत्यर्थः॥ इत्थं स्वात्मतयोपदिष्टस्य ब्रह्मणो जगतिस
मयेऽपि ध्यायस्याहं मां ब्रह्म जानामीति कर्मकर्तृभावलक्षणभेदावभासस्यावस्तुविषयत्वं प्रतिपादयितुं तथाविधभेदविनिर्मु

३८ क्तमखंडैकरसं ब्रह्मात्मतत्त्वस्वरूपं प्रकाशयितुं चगुरुशिष्ययुक्तोक्तिगर्भोक्तिरूपेणाह॥ इति॥४ प्रवदतोपदिष्ट ३८

न्यस्य सत्यं वेदं ददस्व तत्त्वमेवापि नूनं ब्रह्मणो रूपमिति गुरुवाक्यं नाहं मन्ये सुवेदेति नानवेदवेदेति श्रुतिकंपनरूप शि
ष्यवाक्यं तदेतदाकर्ण्य त्वयाभिप्रेतमर्थं संगृह्य ब्रह्मादेवान्प्रत्युपदिशति॥ स्फुरज्ञातमिति॥ सुज्ञातमिति॥ तद्ब्रह्ममनुभवेय
दि हेस्फुरा॥४ दह्रमेवहितत्साक्षिब्रह्मलेवर्षं कथं भवेत्॥१५॥ हे देवाः यत्तत्स्वात्मभूतं ब्रह्म सुज्ञातं सुष्ठु ज्ञातमस्माभिर्बुद्धिवृ
त्ता विषयीकृतमिति यदि जानीयात्तदा अनवच्छिन्नस्वभावं तद्ब्रह्म बुद्धिवृत्तिपरिच्छेदाद्दह्रमल्पमेव भवेत्॥ तथा चावस्तु
गोचरमितद्ज्ञानं स्यादित्यर्थः॥ तथाविधबुद्धिकोऽसाक्षित्वेन भासकं तद्ब्रह्म कथं तत्प्रकाश्यं भवेत्॥ अतः स्वप्रकाशसाक्षिरूपस्य

ब्रह्मणोयेयत्वसंभवाद्बुद्धिवृत्तिविषयं सोपाधिकमेवरूपं॥ नतुनिरुपाधिकमितिवेदस्य दहरविद्यायां खलुतद्ब्रह्मविदितक्रियाजन्यफलं॥ भाति
तु मतांतरेणैवस्वात्मतयाप्रत्यक्षमात्रसाक्षिरूपेण विदितंस्वरूपप्रकाशेनैवभातंभवतिसचप्रकाशोनित्यइतितज्ज्ञानिकर्तृत्वमपिनास्तितस्यविदुषस्तद
नवच्छिन्नंनिरस्तसमस्तोपाधिकंब्रह्मज्ञातंभवति॥१५॥ शिष्याचार्यसंवादेननिर्णीतमर्थंश्रुतिरवधारयति॥ यस्यामतंतस्यमतंमतंयस्यनवेदसः॥ अविज्ञातंवि
जानतांविज्ञातमविजानतामितितासंगृह्णाति॥ यस्येति॥ यस्यस्वात्मतयाब्रह्मविदितंकर्मतांविना॥ तस्यज्ञानकर्तृत्वविहीनस्यमतंहितत्॥१६॥ यस्यसाधु
कस्यतस्यात्मस्वरूपंब्रह्म ज्ञानंतमिनोवस्था अविषयीकृतंकेवलंस्वरूपप्रकाशेनैवप्रकाशितंतस्यतद्ब्रह्ममतंज्ञातंभवति॥१६॥ यस्यामतंतस्यमतं
मतंयस्यनवेदसः॥ अविज्ञातंविजानतांविज्ञातमविजानतां॥ यस्यतद्ब्रह्मतंमनसाविषयीकृतंनासौतज्ज्ञानातितस्मात्तद्ब्रह्मवर्यंज्ञानीमशति

स

बुद्धिवृत्तिविषयरूपेणाज्ञानतामनवगतमेवसर्वदा॥ बुद्धिवृत्त्यविषयत्वेननज्ञानातिस्वस्वरूपप्रकाशेनैवतज्ज्ञातंभवतीत्यर्थः॥१७॥ नतुयस्यखलुमतं
तस्यतन्मतंस्यात्परस्परविरुद्धवादित्वादीदृशमतत्वाद्बृहस्पत्यादीनामर्थप्रतिपादनेसमर्थमितिप्रतीयते॥ प्रतिबोधविदितंमतमितिबुद्धिवृत्तेर्बोधः॥ सर्वा
स्वपिवृत्तिषुतत्ससाक्षिरूपेणावस्थितमनुगतंस्वप्रकाशचैतन्यंप्रकाशमव्यभिचारमतमितिस्फुटमितिश्रुतेरर्थमिर्णीतं॥ संगृह्णाति॥ ब्रह्मेति॥ ब्रह्मरू
नेत्यज्ञानेनोंतिज्ञानेपिवासिकः॥ नैवकर्तृनकर्मापिब्रह्मचित्केवलंस्वयं॥१८॥ यस्यकर्तृतयाभातंब्रह्मकर्तृत्वसुरोत्तम॥ तस्यब्रह्मामतंयस्मात्क
र्तृतस्यमतंहितत्॥१९॥ यस्यकर्मतयाभातंब्रह्माकर्मसुरोत्तम॥ तस्यब्रह्मामतंयस्मात्कर्मतस्यमतंहितत्॥२०॥ अकर्तृविषयप्रत्यक्प्रकाशंस्वात्मनैवतत्॥
विनातत्प्रिमाणाभ्यांब्रह्मयोवेदवेदसः॥२०॥ एवंरूपपरिज्ञानमपिदृश्यतयैवतु॥ यस्यभातिसतत्साक्षीभूतब्रह्मामविकल्पी॥२२॥ ब्रह्मविद्यापिज्ञातान्येवे

धा भयतीति कुं भयसु॥ अबेध ब्रह्म वेधीस्या द्वेधा विद्यातिसंगमात्॥ २३॥ वेत्तापि विद्यासंबंधात्तु विशेषो भवेद् ध्रुवं॥ निर्विशेषं परं ब्रह्म तेनो विद्वान्स्यात्स विद्या

॥२४॥ विद्याया आश्रयत्वेन विषयत्वेन भावयेत्। ब्रह्म नैवान्यथा तत्र ब्रह्म ब्रह्म भवेत्कथं॥ २५॥ यद्येतच्छ्रवणमननादिसाधनजनितनिरस्तसमस्तोपाधिक

परमार्थब्रह्मविषयं ज्ञानं व्यावहारिकसत्यघटादिविषयं चक्षुरादीन्द्रियसंप्रयोगजनितं ज्ञानं यथा प्रमाणीति कस्य [illegible] कि रूपादिविषयं प्रातिज्ञानं

तेषु सर्वेषु वृत्तिज्ञानेषु निरुपाधिकं स्वात्मभूतं चिदेकरसं ब्रह्म अक्रियत्वात् कर्मापि न भवति नापि कर्म किं तु तस्य सर्वस्य साक्षित्वेन भावराहित्यं समुपपाद

यति। ब्रह्मसंबंधराहित्ये विद्याब्रह्मणोर्वेदितुं॥ अत्र श्रुत्यन्तरे हे देवाः केनाब्रह्माविज्ञवेत्ता॥२६॥ नतावदविक्रियस्यासंगस्य ब्रह्मणो विद्याश्रयत्व

त्वं विषयत्वं वा संभवति। तथापि विधर्मत्वेनैव परिच्छेदादपरिच्छिन्नार्थ इति प्रत्यक्ष ब्रह्मशब्दाभिधेयत्वं भवत्स्यहीयेत। अतोपरिच्छिन्नस्य तस्य केनचित्प

पारमार्थिकः संबंधो निरूपयितुं विद्यापरमार्थतो ब्रह्मसंबंधरहितेत्यंगीकार्यं॥ तावेदेवं विद्या तथा सती नयाति यथा ब्रह्मवेदिता मह्यं तर्हि विदिक्रिया

जन्यफलभागित्वाद्विषयत्वस्य स्वयमेव तथाविधफलसंबंधे ब्रह्मण्युदीरितक्रियाफलस्य। गिरा संभवादनुपयोगश्चेत् न परमार्थतो निरस्तसमस्तोपाधि

कस्य स्वयंप्रकाशमानस्यानाधेयातिशयस्य विषयाकश्चिदुपयोगो। त्रितयेन तज्जन्यफलभागित्वात्तेन [illegible] तस्यात्। तत्रैवमेव धीसति को न

मब्रह्मात्मविन्निवेत्॥ कर्मत्वकर्तृत्वलक्षणधर्मसंबंधानपेक्षत्वाद्ब्रह्मात्मवित्त्वस्य। अतो विद्यास्वकोपाधिव्यतिरेकावच्छिन्नत्वात् न्यायान्तरास्तु स्वरूपं ब्रह्म

साक्षात्कुर्वन्नाज्ञानसातीतः प्रकाशी ब्रह्मवेत्तैव भवेत्॥ न तु ब्रह्मात्मवित्स्वयं॥२७॥ एवं स्वप्रकाशो ब्रह्मणि विषयप्रकाशजनकत्वासंभवेपित

३१

सु

३१

घ

स्वरूपावरणविक्षेपशक्तिजनकत्वात् तत्संबंधमात्रेणाप्यनिरस्यति॥ ब्रह्मण्युपस्तमायादिनिवर्त्तनं कुरुते तु सा॥ विद्यायद्विनमायाया उपस्यगात्मन्यस्वप्रभावात्

२स्या। ।२७ प्रसक्तं न साक्षात्कृते परमार्थतो निर्विशेषब्रह्मणि मायापादकत्वस्य स्पर्शोऽसंभवाद्विद्यानिवर्त्यत्वं विशेषस्तदपि न विचारसहमित्यर्थः॥ २८ अयं द्वो

पपादयति॥ प्रत्यगात्मा परं ज्योतिर्मायापासात्तु महत्तमः॥ तथा सति कथं माया संभवेत् प्रत्यगात्मनि॥ सर्वोत्तमात्तर्कप्रमाणाभ्यां स्वानुभूत्या च विद्येनास्व

प्रकाशैकसंसिद्धे नास्ति माया परात्मनि॥ २९॥ स्वर्यादीनि प्रसिद्धानि ज्योतींषि तेषामपि निजप्रकाशानि स्वैरबलेनैव प्रकाशकत्वमिति तथा वि

घस्वप्रकाशचिदात्मा परं ज्योतिरुच्यते हि॥ येन सूर्यस्तपति तेजसेद्धः तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति परं ज्योतिरुपसंपद्यस्वे

न रूपेणाभिनिष्पद्यत इति वा॥ शार्वरं तमो वदाच्छादकत्वादविद्यमानस्य नामरूपप्रपंचस्योपस्थापकत्वाच्च माया नामाधिकं तमः एव सा च कथमुदीरित

लक्षणापि ब्रह्मण्यपि दिव्यसूर्यज्ञानदीपप्रकाशमानं सत्स्वनैशं तम आश्रयति विषयीकरोतीत्यर्थः॥ २९ नरस्थानकृत्स्नाब्रह्मस्वरूपे विद्या

या अकिंचित्करत्वे ब्रह्मविदाप्नोति परं ब्रह्म वेद ब्रह्मैव भवति अथ परा यया तदक्षरमधिगम्यत इत्यादिश्रुतिभिर्विद्यायास्तत्स्वरूपप्राप्त्युपाय

प्रतिपादनं व्याहन्येतेत्याशंक्याह॥ व्यावहारिकदृष्ट्यैव विद्याविद्याने चान्यथा॥ तत्त्वदृष्ट्या तु नास्त्येव तत्त्वमेवास्ति केवलं॥ ३०॥ व्यवहार

मात्रसिद्धमायापरिकल्पितप्रपंचमाश्रित्य हि प्रत्यक्षादिप्रमाणानि प्रवृत्तानि वेदोपि तदन्तर्गतत्वाद्व्यावहारिकदृष्ट्यैव विद्याया अविद्यानिवृ

त्तिद्वारा तत्स्वरूपप्राप्तिफलं चास्ति॥ अतो विद्याविद्ययोरेतदुभयमपि व्यवहारदृष्ट्यैव परमार्थदृष्ट्या तु द्वितीयस्य प्रकाशे ब्रह्मात्मतत्त्वमेवास्ति॥ ३०

एवं परमार्थतो ब्रह्मणोऽसंगत्वेन विद्यासंबंधाभावाज्ज्ञातृत्वादितदितरगोचराणां सर्वासां बुद्धिवृत्तीनां यच्चास्वकं साक्षिस्फुरणं तत्परिशेषा।

स्वप्रकाशमद्वितीयं चेति प्रतिबोधविदितं मतमिति श्रुत्यर्थं निगमयति ॥ व्यावहारिकदृष्टिस्तु प्रकाशाव्यभिचारतः । प्रकाश एव सततं तस्मा-
दद्वैतमेव हि ॥३१॥ व्यवहारदृष्टेः पुरुषस्य घटपटादिविषयमनोवृत्तिषु सर्वत्र साक्षिचित्प्रकाशस्य भासकत्वेनाव्यभिचारित्वात्तदनुगतस्वप्र-
व्यवहारे ह्यप्रकाशस्वरूपस्य प्रसङ्गात् तस्मादव्यभिचारिणश्चित्प्रकाशे वस्तुनि रज्ज्वां विद्यमानसर्पधारादिवद्व्यभिचारिणश्च प्रपञ्चस्य परि-
कल्पितत्वेन मिथ्यात्वात् प्रकाशरूपं ब्रह्माद्वैतमेवेति सिद्धमित्यर्थः ॥ ननु अद्वैतमिति द्वैतनिषेधविशिष्टं ब्रह्म प्रतीयते तथा च कथं निर्विशे-
षब्रह्मसिद्धिरित्यत आह । अद्वैतमिति वोक्तिश्च प्रकाशाव्यभिचारतः । प्रकाश एव सततं तस्मान्मौनं हि युज्यते ॥३२॥ अद्वैतो निरुपप्रकाशाव्यभि-
चारादव्यभिचारिचित्प्रकाशस्यैकरूप्यावगमादित्यर्थः । प्रकाश एव सततमिति । प्रकाशस्वरूपादन्यस्य द्वैतनिषेधस्य द्वैतवत्त्वात्तेनाप्य-
न्यस्वसाम्येन स्वेनैव निवर्तनात्तन्निषेधविनिर्मुक्तः केवलश्चित्प्रकाश एवावशिष्यते । सत्यस्वरूपस्य प्रकाशव्यतिरेकविरहितत्वात्स्वप्रकाश
इति सततशब्दार्थः । एवं निर्विशेषचित्प्रकाशस्य निर्लक्षणशब्देन मनसा चाविषयत्वे क्रियमाणे तदुपाधिवैशिष्ट्यप्रसङ्गात्तूष्णीमवस्थानमेव
चिद्रूपस्वरूपप्रतिपत्त्युपाय इत्यत्र मौनं हि युज्यते इति ॥ तस्मादिति ॥ श्रोत्रादीनीन्द्रियाणि समनस्कानि स्वविषयेभ्यो व्यावर्त्य तत्तु रैव विक्षेपवासना-
विनिर्मुक्तेन प्रसन्नान्तःकरणेन भासकप्रत्यक्त्वेनान्यस्वरूपं ब्रह्म स्वयमेव प्रकाशत इत्यभिप्रायः । एतावता यस्यामतं तस्य मतमिति श्रुत्यर्थः सम्यगुपपा-
दितो भवति ॥३२॥ ननु मौनमार्गेण ब्रह्मोपदेशः स च सर्वेषां सुलभ इति तत्सिद्ध्यर्थं न प्रयतितव्यमित्यत आह । प्रत्यक्षादिप्रमाणैश्चानेकैः श्रद्धायान्यैव च
स्वगुरोरुपदेशेन प्रसादेनाशिवस्य च ॥३३॥ भवपरंपरासु वर्णाश्रमैः स्थितिः परमेश्वरं समाराध्य समासादिततत्प्रसादस्य साधनचतुष्टयसंपन्नस्य कस्य

३६ वर्ण ३६

त्विदेवमुमुक्षोः पुरुषस्य महान्संक्षेपेण नातिगंभीरो ऽयमर्थो भाति नान्यस्येत्यर्थः॥३३॥ आर्जितैरपि धर्मैश्च कालपाकेन धार्मिकाः॥ अर्थो महान्यं भाति शोकरूपु
रुषस्य तु॥३४॥ अत्र तावन्मतैर्विहितं दत इत्यादिना साधनान्तर निरपेक्षस्य यथोक्तज्ञानस्य यदस्य तत्त्वमाप्त्युपायत्वं प्रतिपादितं तत्तासुपर्यायकथनेनानुविष्टणोति॥
यस्य प्रकाशितः साक्षाद्यमर्थो महानरः॥ तस्य नास्ति क्रिया सर्वाज्ञानं चाप्यदपत्तु तथा॥३५॥ अयमर्थो महान्यस्य स्वत एव प्रकाशितः॥ न तस्य पापविध्येति नाप्यमुष्म
तथैव वा॥३६॥ अयमर्थो महान्यस्य स्वत एव प्रकाशितः॥ न स जीवो न च ब्रह्म न चान्यदपि किंचन॥३७॥ अयमर्थो महान्यस्य स्वत एव प्रकाशितः॥ न तस्य धर्मो
धर्मश्च न निषेधो विधिर्न वा॥३८॥ एतमर्थं महान्तं यः प्राप्तः श्रीमोक्षप्रसादतः॥ स शरीरसुखेनैवान्य इति मे निश्चिता मतिः॥३९॥ अदयत्तु इति स्वा मुनो द्वितीयब्रह्मस्व
क्षात्कार ज्ञानक [illegible] साधन [illegible] तत्त्वस्वीतरज्ञाति भासाभावाद्द्वितीयब्रह्मात्मनावस्थितस्य विदुषस्तज्ज्ञानाधिकार इत्यर्थः॥ न केवलमेतावदेवं [illegible] दोषजीवनेन प्र
वृत्तः सकलोपि प्रपंचः [illegible] तस्य न संभवतीत्याह॥ अयमर्थो महान्यस्यादिश्लोकपूर्वार्धे॥ एतमर्थं महान्तं यः प्राप्तः श्रीमोक्षप्रसादतः॥ तस्याहं वैभवं वक्तुं न शक्तः
सहस्रमीरितं॥४०॥ [illegible] ब्रह्मविदित [illegible] प्रकाशिता [illegible] रूपेण [illegible] सम्यग्विदान [illegible] इति प्रतिपादितं तदद्दर्शयति॥
एतमर्थं महान्तं यः प्राप्तः श्रीमोक्षप्रसादतः॥ वैभवं तस्य विद्वत्त्वं न शक्तो वक्तुमस्ति कः॥४१॥ एतमर्थं महान्तं यः प्राप्तः श्रीमोक्षप्रसादतः॥ वैभवं तस्य [illegible] यन्न
शक्तो वक्तुमस्ति कः॥४२॥ एतमर्थं महान्तं यः प्राप्तः श्रीमोक्षप्रसादतः॥ वैभवं तस्य वेदाश्च न शक्ता वक्तुमस्ति कः॥४३॥ वैभवं महत्त्वं निर्वीर्यस्य महत्त्वासं
भवात् न महत्त्वेनस्व कारणभूतं निरातिशयवीर्यं लक्ष्यते॥ धनसहाय मैत्र्यौषधादिसाधनजनितं वीर्यं स्वनित्यवस्तुजनितत्वादस्य न तत्त्वव्यति
रिक्तस्य तत्फलस्य साधनमिति तस्य रिक्तत्वमपि॥ आत्मविद्याजनितं वीर्यं तु तथाविधजनितमिति अस्येत्यपि न तद्वक्तुं शक्नोतीत्यर्थः॥४४॥ एषा चात्म
तत्त्वसाधनभूता विद्या सुकृतस्य शालीव विविदिषु शरीरे विद्यमान एव यत्नेन संपादनीया तस्मिन् संपादिते तत्संपादने पुरुषस्यापि तत्कृतसंसार ए

तिः ॥ इति रथिकारिणीं प्रत्युपदिशति ॥ इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिरिति ॥ अस्यार्थः ॥ श्रुतेरयमर्थः ॥ अस्मिन्देहे यदि ज्ञातः पु
रोक्तोर्थो महतायासेन साक्षात्सुखं भवति निर्वाणं याति मानवः ॥ ४८ ॥ अस्मिन्निर्वाधिकारिणि मनुष्यादिदेहे स एव पूर्वोक्तो ब्रह्मस्वरूपोर्थो यदि
ज्ञातः स्यात् तदा तस्य विज्ञातपरमार्थस्य सर्वं निरस्तसमस्तोपाधिकमद्वितीयं ब्रह्मलक्षणं मुक्तिस्वरूपं प्राप्नोति ॥ ४९ ॥ उक्तमर्थं व्यतिरेकमुखेनोपपा
दयति ॥ अस्मिन्देहे न विज्ञातः पुरोक्तोर्थो महान्पदि ॥ विनष्टिरेव महती तस्य नैव परा गतिः ॥ ५० ॥ अथ यस्मिन्निर्वाधिकारिणि देहे सत्यप्यालस्योपहत
न श्रवणमननादिसाधनानुष्ठानाद्विवेकदयाभावेन आत्मोक्तोर्थो न ज्ञातः स्यात्तदा तस्य निरतिशयानंदवाप्तिलक्षणपरमपुरुषार्थहानिर्भवति ॥
तथात्वतस्यापि पुनः संसारप्रवाहपात एवेति नैव कदाचिदपि सुखं ॥ सिद्धमादित्यर्थः ॥ ५१ ॥ एवमन्वयव्यतिरेकाभ्यां विविदिषुः शरीरे विचार्यायं सोलभ्यमा
निःपापत स्वल्पमायास्यते ॥ भूतेषु विविच्य धीराः प्रेत्यास्माल्लोकादमृता भवंतीति तद्व्याचष्टे ॥ स्वशरीरेन्यदेहेषु समं निश्चित्य सर्वदा ॥ अथ धीरा न जायं
ते सम्यक्त्वामृता भवंति हि ॥ ५२ ॥ ह्रीयिनामप्राज्ञाश्चकीयशरीरे देहांतरेषु सोपाधिषु घटशरावादिषु चैकस्वरूपत्वसाम्येनावस्थितमुदीरितलक्षणं ब्रह्मात्म
तत्त्वं श्रवणमननादिभिः साक्षात्कृत्य धीरा धैर्यवंतो दृढनिश्चयाः संसारभयरहितावंतो ते पुनरेतद्देहपातानंतरं न जायंते विद्यया सकलसंसारनि
दानभूताविद्यायाः समूलं निवर्तितत्वात् अपि तु कदाचिदप्यनश्वरब्रह्मलोकाः एव भवंति ॥ ५३ ॥ नन्वेक एवात्मनः स्वेतरसर्वशरीरेषु कथं साम्ये
नावस्थानं यथावदुपपद्यते तन्नानात्वस्यावश्यंभावादित्याशंक्याह ॥ बन्धोक्तोमहाविधानश इत्यादिभेदतथा एक एव सदाभाति नानेवस्वमवस्तुया ॥ ५४ ॥
यथा स्वप्नावस्थायां तैजसात्मा स एव महीधरादिलक्षणस्थावरपदार्थरूपेण नानेवावभासते न पृथक् एवं चिदात्मा स्वाविद्यापरिकल्पितोपाधिना
वशेन बन्धोक्तो विधानशः स्वेनमायोपाधिककविरुद्धधर्मसंसर्गतया नानेव नानावस्थाति ॥ ५५ ॥ नन्वेवमात्मन एकत्वे कस्मिन्नुपाधौ केन विहि

यथात्मनि साक्षात्कारोऽसति अविद्यानिवृत्यातस्यैकस्यात्मनः मुक्तत्वेन पुनरविद्यासंबंधानुपपत्तेर्विश्वप्रपंचस्य सर्वस्य उच्छित्तिः स्यात् तथा सति देसा
श्रविपाठा। अतः स्वमुक्तस्यैवान्येषामाभासानामपि स्फुरणं मुक्तिर्ज्ञानाति देवा आत्मनात्माविदीकरथा। नायत एकस्वात्मा अतः श्रवणमननादिसा
धनकलापमनुष्ठितवतो विदुषः स्वस्य मुक्तस्यैव स्वव्यतिरिक्तानामपि तत्तादृतः करणापाद्विशति बिंबरूपेण दर्पणबिंबितमुखावभासवदाभासत्वा
प्रतीयमानानामात्मनी तत्कुतः अस्मादव्यतिरिक्तत्वात्स्वमुक्तिसमये तेषामपि मुक्तिमसौ विद्वान्जानात्येवा स्वसंसारदशायां तस्य श्रीसा सर्वदेहिनी ॥
आभासानांच संसारे वेदमुक्तिं तथैवचा ॥ यथा तथापि स्वसंसारदशायां स्वश्रीसा स्वाविद्यया स्वस्यान्येषां शरीरिणां च संसारमपि जानाति
निविति निवृत्तो मुक्तिं चा ॥ यथेव तथान्ये ष्वा भासरूपा आत्मानः स्वसंसारदशायां स्वयाविद्यया परिकल्पित संसारैर्विबोद्धयपर्यंतं ज्ञानस्येवेति॥
विदद्दष्ट्यात्मकेऽपि विदुषां तेषां न संसारित्वनिवृत्तिरित्यर्थः ॥४॥ ननु एवमविदुषी स्वाविद्यया कल्पितस्य जगत्प्रतिभासः विदुषः स्वविद्यानिवृत्तान
त्कार्यस्य जगतः प्रतिभासोऽनुपपन्न इत्याह॥ प्रारब्धकर्मपर्यंतं कदाचित्स्वरमात्मविद॥ जगज्जीवादिकं पश्यत् कदाचिन्नैव वेदतत्॥५॥ कर्माणि द्वि
विधानि आरब्धफलान्यनारब्धफलानि च। तत्रानारब्धफलवदारब्धफलानी ज्ञानेन निवर्तंते अभावे न भोगेनैव क्षपयितव्यानी। तावत्पर्यंतं क
दाचिन्नरूप भोगसमये नैव तत् जगज्जानातीत्यर्थः ॥५॥ ननु विदुषः स्वविदुषोपि जगज्जानातीति स्वतीति स्वपि को विशेष इत्याह॥
कदाचिन्नु जानाति प्रतीतमखिलं सुराः॥ कदाचिन्नैव जानाति स्वभावादेव तत्त्ववित्॥५१॥ यत्सर्वस्य प्रपंचस्य ब्रह्मणि अध्यस्ततया प्रतीयमा
नमखिलं जगदस्तित्वसंबंधि जानाति आरोपितस्याधिष्ठानादव्यतिरिक्तत्वादधिष्ठानब्रह्मात्मनैव कदाचिन्न जानातीति समये विद्वान्जानातीत्यर्थः॥
कदाचिद्द्वितीयब्रह्मात्मानुभवसमये

कदाचित्सुमाधवस्थायामपि अधिष्ठानब्रह्मयाथात्म्यज्ञानेनारोपितस्य विलापनात्स्वात्मनो निःप्रपंचस्वाभाव्यादेव जगन्नैव जानाति। अतो
विदुषो ध्यस्तात्मनैव का शंकेति कोऽजगत्स्मृतिभास इत्यविदुष इव न परमार्थं तेन साक्षात्कालि कस्त्वर्थः ॥५१॥ जगज्जीवादिरूपेण यदब्रह्मविभास
नं तत्सदात्मरवादि भोगोपि भातिवाभासरूपतः ॥५१॥ यदा ब्रह्मात्मना सर्वं विभातिस्वतरपवा तदा दुःखादि भोगोपि मा भासो न विभासते ॥५२॥
यदा चैवं विदुषो विक्षेपसमये ब्रह्मलाभाद्यभो रूपोन्यप्रपंचाभासो नादविदुषस्तत्कृतसुखदुःखभोगोपि साधनवदाभासरूपतयैव भाति।
यदा तु समाधिसमये प्रतीतिः सर्वं जगत्स्वकीयबाधावधिभूतब्रह्मावशेषेण विभाति। तदा दुःखसाधनस्य जगतोऽप्रतिभासाद्दुःखस्य स्फुरसि
रदुःखस्याप्यपि नैव तस्य प्रतीयत इत्यर्थः ॥५२॥५३॥ नन्वविद्यानिवृत्तिनाविद्यानपि स कथं जगदन्तर्नानुभवति पश्यति कुतः स्वप्रति जगतः आ
भासरूपतेत्यत आह ॥ जगज्जीवादिरूपेण पश्यन्नपि परात्मवित् ॥ न तत्पश्यति चिद्रूपं ब्रह्मवस्त्वेव पश्यति ॥५४॥ आरोपितजगत्पश्यन्नपि
अधिष्ठानसच्चिद्रूपपरमार्थब्रह्मात्मनैव पश्यति ॥ नन्तु नामरूपात्मनेत्यर्थः ॥५४॥ एतदेव ब्रह्मव्यतिरेकस्यादर्शनं विदुष उपपादयति ॥
ब्रह्मणो व्यतिरेकाणां नास्ति वस्तुतोवस्तु किंचित् ॥ तथा सति शिवादन्यत्कथं पश्यति तत्त्ववित् ॥५५॥ वस्तुतस्तावद्ब्रह्मव्यतिरिक्तं नास्ति ॥
नेह नानास्ति किंचनेति श्रुतेः ॥ अवस्तुतोपि नैवास्ति अवस्तुभूतस्य सर्वस्य जगतः स्वात्मस्वरूपे ध्यस्तत्वेन तदनन्यत्वनियमात् ॥
एवं च विदुषः परशिवव्यतिरिक्तं कथं जानीयादित्यर्थः ॥५५॥ अतो विदुषः सर्वदा ब्रह्मभानमेवेति निगमयति ॥ ब्रह्मरूपेण भासा
भाज्जगज्जीवात्मना यथा ॥ यथा यथा प्रथा साक्षाद्ब्रह्म भाति तथा तथा ॥५६॥ अधिष्ठानब्रह्मरूपेणारोपितभोग्यप्रपंचो हि प्रपंचाः

२०

२८

ना

त्मना वाप यथायस्या विदुषः प्रत्यगात्मा प्रतिभाति नैशानि भवति तथा तथा साक्षात्कृतो लेवनस्य भाती तिसैर्व घटपटादि उक्तरीत्या सर्वज्ञ गदवभासोपि प्र
उपक्षसमाध्य वस्थातो न विक्षिप्यत इति उपसंहरति॥ यथा यथा वभासोर्य स्वभावादेव भासते तथा तथानुसंधानं योगिनः स्वात्मसंवेदनं
पशामलादेव श्रोध्येपयलिनेन यापि न विदुषः स्वस्मादन्यत् किंचिद् विक्षेपमुत्पादयितुं समर्थं भवतीत्यर्थः॥ नामतश्चार्थतश्चापि भिन्नादे
वा यदि प्रसिद्धा॥ किं जगतीति तदा विद्वान् किं गच्छतीति सुरर्षभाः॥ पञ्चाशल्लक्षकरादन्यत् स्यान्न चेद्वा यदि विघते॥ महत्त्वं तस्य हीय
तस्वभावेन यहन्यते॥ पथा महत्त्वं तस्येति त्रिविधपरिच्छेदराहित्यं हि तस्य महत्त्वं तच्च सर्वात्मा सर्वज्ञस्य फल्गुता स्पर्शितो वा दन्यस्मि
न्सोपादेयवस्तुनि स्वीक्रियमाणे विहन्येतेत्यर्थः॥ इष्टापत्तिशंकां निवारयति स्वभावतश्चेति तद्धि महत्त्वं परमेश्वरस्य स्वरूपं न त्वताहि
तं हेतुयुज्यते तस्यैवाभावप्रसंगादित्यर्थः॥ पथवेंदुमहत्त्वं परमेश्वरस्य न स्वभावः अपि तु तस्य धर्म इति नो कोदोषापत्तिरित्याशंक्या
ह महत्त्वं नैव धर्मस्य भेदाभावात् परमात्मनः भेदाभावादिति॥ परमात्मन एकमेवाद्वितीयं ब्रह्मेति स्वगतसजातीयविजातीयभेदनि
रासस्य श्रुत्या प्रतिपादितत्वात् प्रत्यक्षादिप्रमाणानां तद्ग्रहणसामर्थ्यस्य दशमेऽध्याये प्रागुपपादितत्वाच्चेत्यर्थः॥ धर्मधर्मि
त्ववानुपि भेदे सति हि विघते॥ ६०॥ न हि स्वरूपमेव स्वस्य धर्मो भवति॥ धर्मधर्मिभावो नियमेन भेदमपेक्षत इति व्यापकभेदाभावात्
तद्व्याप्यधर्मधर्मिभावोपि न संभवतीत्यर्थः॥ ६१॥ ननु कुतश्चिद्दृष्ट्या त्मनो भेदो नास्तीति दृश्यप्रपञ्चतादात्म्यलक्षणो भेदस्त्वात्मनो
नास्तीति सदितरप्रपञ्चलक्षणस्याऽभेदाभेदो भेदस्तत्राभेदाभेदः सत्प्रपञ्चतन्न नास्तिसात्मातिरेकेण स्वयमेवास्ति सर्वदा॥ ६२॥

छेदाभेदादेरप्यासिकत्वात् तत्स्वरूपव्यतिरेकेण सङ्गो नास्तीत्यर्थः॥ ६१॥ हेयोपादेयविभागप्रतिपादकाभासराहित्यं विदुषो निगमयन्ति। ब्रह्मैव
विद्यते साक्षाद्वस्तुतोऽवस्तुतोऽपि वा। तथा सति त्रिविधज्ञानी किं गृह्णाति जहाति किं॥ ६२॥ मायया विद्यते सर्वमिति केचन मेनिरे॥ ६३॥ शिवरूपातिरेकेण नास्ति
मायाप्यवस्तुतः॥ ६३॥ अध्यस्तस्यापि प्रपञ्चस्य सदसद्विलक्षणत्वेन वस्तुतोऽवस्तुतः अधिष्ठानाद्ब्रह्मणः पृथग्भावाद्द्वितीयं ब्रह्मैव सर्वं प्रतिभातीति ज्ञानी किं
गृह्णाति किं जह्यात् किं वा उपाददीतेत्यर्थः॥ नास्ति मायेति। प्रपञ्चकल्पनाकारणत्वेन परिकल्प्यमाना माया अपि सदसद्विलक्षणत्वान्मायामयं जगत्सतीति
किं शक्तिधानमित्यर्थः॥ ६४॥ मायया वाविद्यादाद्यपि ह्येते चेच्छिवस्य तु महत्त्वं परं साक्षाद्दीपितं सुरपुङ्गवाः॥ ६५॥ यदि मायायाः सत्त्वमङ्गीकृत्य तन्मयं जग
दस्तीति स्वीक्रियेत तर्हि एवं सति परशिवस्य त्रिविधपरिच्छेदराहित्यलक्षणं महत्त्वं भज्येतेत्यर्थः॥ ६६॥ महत्त्वस्य संकोचो नास्ति सम्यग्दर्शिरूपेण। अस्ति चेदप्र
माणी स्याच्छ्रुतिः सत्यापवादिनी॥ ६७॥ अस्ति चेदिति। आकाशादीनामिव परशिवस्य महत्त्वमापेक्षिकं चेत् हि ब्रह्म नित्यं ब्रह्म एकमेवाद्वितीयमिति त्रिविधपरि
च्छेदराहित्यप्रतिपादिका श्रुतिरप्रमाणी स्यादित्यर्थः॥ ६८॥ प्रतिपादितमर्थं निगमयन्ति। तस्मान्नास्ति महादेव एव साक्षात्स्वयंप्रभः॥ आनन्दस्तत्त्वरूपेणैव
ज्ञातोऽन्यः किंचिन्नास्त्यस्य भेदकल्पनानिष्ठाकाष्ठं सर्वकर्मप्रत्यक्षादिप्रमाणानां वेदानामपि भेद्वराः॥ ६९॥ स्मृतीनां च पुराणानां भारतस्याथ च॥ वे
दानुसारिविद्यानामन्यासामास्तिकोत्तमाः॥ ७०॥ शैवागमानां सर्वेषां विष्णोः कामिकस्य च॥ अस्मदुक्तागमस्यापि सूत्रानुरूपनिरूपणम्॥ इथा बुद्धाग
मानां सर्वेषां तथार्हदागमस्य च। यक्षाणां धर्मसिद्धादिनिर्मितस्यागमस्य च॥ ७१॥ परमाद्वैतविज्ञानैकस्य महेशस्य सिध्यति। कस्य देवस्य वा साक्षाच्छिवस्य
वा हि सिध्यति॥ ७२॥ परमाद्वैतविज्ञानं शिवस्यामिततेजसः शास्त्रस्वभावसिद्धं स्यात् अन्त्रिवापा आस्तिकोत्तमाः॥ ७३॥ अर्हद्देवेभ्यो विजिज्ञासितोऽर्थं

३०

३२

वक्तुमारभमाणास्तदुपोद्घाततयैनं तत्त्वज्ञानस्योत्तमां महेश्वरप्रसादलभ्यत्वं दर्शयति ॥ प्रसादादेव [illegible] ॥ प्रसादादेकरूपस्य शिवाख्यस्य तथैकदा ॥
परमाद्वैतविज्ञानं विलोक्य साक्षान्ममापि वा ॥ ७४ ॥ विरंचिसंज्ञस्य देवस्य [illegible] ईशस्य चास्मत्संज्ञस्य चान्येषां प्रसादादेव वेदनी ॥ ७६ ॥
मुख्याकर्मा [illegible] सर्वेषां शिवस्य परमात्मनः ॥ परमाद्वैतविज्ञानं प्रसादादेव नान्यथा ॥ ७५ ॥ यक्षराक्षसगन्धर्वसिद्धादीनामपीश्वराः ॥ परमाद्वैत
विज्ञानं प्रसादादेव शूलिनः ॥ [illegible] मनुष्याणां च सर्वेषां पश्वादीनां तथैव च ॥ परमाद्वैतविज्ञानं प्रसादादेव शूलिनः ॥ ७७ ॥ प्रसादेन विना किं वा पतगो
वानरोपि वा ॥ देवो वा दानवो वापि लभते ज्ञानमुत्तमम् ॥ ७८ ॥ एष एव हि [illegible] परिज्ञानं दद्यात् [illegible] विद्वन् नहि मन्यस्व सत्यमेव मयोदितम् ॥ ७९
आदौ [illegible] तथैवासुरश्रेष्ठाः सत्यमेव मयोदितम् ॥ ८० ॥ [illegible] विना नमस्ये [illegible]
[illegible] ॥ ८१ ॥ [illegible] निश्चितम् ॥ विनाशादुःसमुत्पन्नं शक्यते नहि सत्तमाः ॥ ८२ ॥ दर्वीन्यायेन संसाराद् दुःख
[illegible] मानवः ॥ [illegible] हे देवाः साक्षाद् [illegible] तथैव च ॥ देवदेवस्य रुद्रस्य स्वरूपं तस्य वैभवम् ॥ को वा जानाति नास्त्येव स्वयं जाना
ति पावनः ॥ ८४ ॥ [illegible] महादेवो [illegible] देहिनाम् ॥ प्रसादेन विना देवाः सत्यमेव मयोदितम् ॥ ८५ ॥ उदीरितलक्षणस्य परतत्त्वस्यास्य तन्नि
र्विशेषत्वेन [illegible] ब्रह्मादिदेवानामप्युपदेशागम्यत्वमीश्वरप्रसादलभ्यत्वं च [illegible] आख्यायिकारूपेण निरूप्यते ॥ ब्र
ह्मवैवर्ते [illegible] ॥ [illegible] प्राप्य [illegible] सुरासुराणां सर्वेषां [illegible] ॥ महामोहेन संग्रामः संजा
तो [illegible] ॥ ८६ ॥ असुरेभ्यो जितान्देवान् बलवद्भिः सुरान् [illegible] ॥ तान्दृष्ट्वा भगवानीशः सर्वज्ञः करुणाकरः ॥ ८७ ॥ देवानां विजयी

देवा असुराणां पराजयी। इंद्रोऽनलस्तुरेश्वरी च गृहे भद्रासुरास्तु पराजिताः॥७६॥ तस्य ह ब्रह्मणो विजये देवा अमहीयंत त ऐक्षंतास्माकमेव
विजयोऽस्माकमेवायं महिमेति ॥ इति वाक्यस्याभिप्रेतमर्थं दर्शयति॥ अविज्ञाय महादेवं वै भ्रमपरिमोहिताः ॥ वयं विजयमापन्ना असुरास्तु पराजिताः
॥७७॥ इत्यस्म हि मानसं चक्रुः सर्वे देवाः सुरारयः ॥ अतीवशीतिमापन्ना अपूर्वं चक्रुः पुंगवाः ॥७८॥ तद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूवेति इति वाक्य
स्यार्थं ब्रुते। पुनर्विश्वाधिपः स्तोमेश भगवान्करुणानिधिः ॥ स्वस्य दर्शयितुं तेषां उज्जयितुं तथैव च ॥७९॥ तेषां श्रीतिनिवस्त्वर्यमपि साक्षान्महेश्वरः॥
आविर्बभूव सर्वेशो यक्षरूपेण हे सुराः॥८०॥ स्वस्वरूपदर्शयितुमिति स्वस्यात्मनो उरवगम्य तेषामिन्द्रादीनां दर्शयितुमित्यर्थः॥८१॥ तन्न व्यजान
त किमिदं यक्षमिति इति वाक्यस्यार्थं ब्रूते। तद्दृष्ट्वा यक्षमसर्ता विस्मयेन सहामराः॥ किमेतदिति ते सर्वे प्रश्नं किमिदं यक्षमित्यपि॥८२॥ तेऽग्निमब्रुव
न्जातवेद इति भागस्यार्थमाह। पुनरग्निं समाहूय देवाः सर्वे विमोहिताः॥ अब्रुवंस्तं विजानीहि किमेतद्यक्षमित्यपि॥८३॥ अग्निस्तथा करो
मीति प्रोच्य प्रद्योगे [illegible]। यक्षरूपो महादेवः कोऽसीत्याह नमस्ते॥८५॥ अग्निर्वा अहमस्मीति यक्षं प्रत्याह सोऽपि च॥ सोऽपि प्रोवाच भगवांस्त्व
यि किं वीर्यमित्यपि॥ [illegible] इदं सर्वं दहेयं यदिदं भूम्यां व्यवस्थितं॥ तस्मा अग्निस्तृणं तस्मै निधाय परमेश्वरः॥८६॥ एतद्दहेति भगवान्स्मयमा
नोऽभ्यभाषत॥ अग्निस्तदुपप्रेयाय सर्वजवेनैव तद्दग्धुं तृणमात्रं न शशाक सः॥८७॥ अशक्तो लज्जया युक्तो भीतो गच्छ सुरान्प्रति॥ नयातस्यैव विज्ञातुं
न शक्यं वेद सर्वे सुराः॥८८॥ किं त्वयं महता पास्ताद्विस्मिताग्निः सुरान्प्रति॥ अथ वायुमब्रुवन्वायवेतद्विजानीहि इति वाक्यस्यार्थं संगृह्णाति॥ तस्मात्ता
वायुमाहूय विजानीहीति चाब्रुवन्॥१००॥ सोऽपि गत्वा तथा तेन यक्षरूपेण शंभुना॥ पृष्टः प्रतितो मत्वा तथा गच्छ सुरान्प्रति॥ तथेति॥

४०

पप्रच्छ अग्निर्वा अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीत्यहंकारयुक्तत्वेन अग्निर्बलिना अभिहतः शरवीं वायुरपि वायु
र्वा अहमस्मीत्यब्रवीन्मातरिश्वा वा अहमस्मीति एवमहंकारयुक्तौ वाय्वग्नी बुबुधाते प्रतिहतोऽभवदित्यर्थः॥ अथेंद्रमब्रुवन्मघव
न्नेतद्विजानीहि किमेतद्यक्षमिति॥ तथेति॥१०१॥ तदभ्यद्रवत्तस्मात्तिरोदधे इति श्रुतिवाक्यस्यार्थमाह॥ पुनरिंद्रः स्वयं मोहादहंता
कस्तु कातरः॥ विशालं यक्षमागमत्स तत्रैव तिरोदधे॥१०२॥ इंद्रो तीव्रविषयतामस्मन्महातपस्समन्वितः॥ विद्यारूपा तु सा देवी ध्याता कारु
णिकोत्तमा॥१०३॥ एवमग्न्याद्यहंकारापनीतब्रह्मस्वरूपोपदेशाय परब्रह्मसंनिधानमाम्नायते॥ स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहु
शोभमानामुमां हैमवतीं तां होवाच किमेतद्यक्षमिति ब्रह्मेति होवाचेति॥ एतद्वाक्यस्यार्थमाह॥ किं कैवेंदिकैः स्तोत्रैस्स्तावप्र
मस्करी॥ सा शिवा करुणामूर्तिर्जगन्माता त्रयीमयी॥१०४॥ शिवाभिन्ना परानंददायिनी कस्यापि शंकरी॥ स्वेच्छया हिमवत्पुत्री स्वभ
क्तजनवत्सला॥१०५॥ महादेवस्य माहात्म्यं दर्शयन्सर्वजंतुभिः॥ इति दर्शयितुं देवी तत्रैवाविरभूत्स्वयं॥१०६॥ तामाराध्य शिवाभिन्नां शो
भमानां तु सर्वतः॥ उमां पर्वतराजेंद्रकन्यकां माहवज्रभृत्॥१०७॥ किमेतद्यक्षमत्रैव प्रादुर्भूतं तिरोहितं॥ वद त्वमद्य सिद्देवेशि मम
कारुणिकोत्तमे॥१०८॥ देवी परमकारुण्या ब्रह्म मे पतिरित्यलं॥ प्रादुर्भूतं तिरोभूतमित्याह शेषनायकः॥१०९॥ उद्विग्नो यो महादेवो विश्व॥
साक्षादजस्य च॥ अन्येषामपि देवानां तव विघ्नघवन्महर्षी॥११०॥ प्रदर्शयितुमीशानो द्वंद्वं परं स्वकं परं॥ आविर्भूतोऽन्यथा नैव न कारण

सुराधिप॥ ११॥ ब्रह्मणो वा एतद्विजये महीयध्वमिति वाक्यस्य तात्पर्यार्थं माचष्टे॥ स एव सर्वदेवानां त्वयापि विजयश्च दः॥ पराजयकरोन्येषां तिरेव
कारणं द्विज॥ १२॥ इत्युक्ता सा महादेवी चिद्रूपा सर्वसाक्षिणी॥ भक्तानां प्राणदात्री च तत्रैवान्तर्हिता भवत्॥ १३॥ पुनर्देवा महादेवं महाकारुणिकोत्तमं॥
दुर्विज्ञेयं सुरश्रेष्ठाः स्वगतं भुक्तिमुक्तिदं॥ १४॥ विष्णुश्च मुनिश्रेष्ठ तत्साक्षात् संसारभयकारणं॥ प्रसादे सति विज्ञातुं शक्यते परमेश्वरः॥ १५॥ प्रसादस
वीति॥ इत्यत्र इन्द्रादीनामपि तत्त्वज्ञानस्य परमेश्वरप्रसादलभ्यत्वादन्येषामपीश्वरप्रसादे सत्येव परब्रह्मवस्तुतत्त्वं ज्ञातुं शक्यते नान्यथेत्याह॥
१५॥ प्रसादेन विना विष्णुर्न जानाति महेश्वरं॥ १६॥ तथैव वह्निनामानो देवताः सकला अपि॥ प्रसादस्य तु सिध्यर्थं खलु सर्वं सुरर्षभाः॥ १७॥ प्र
सादेन विना देवं ये जानन्ति सुरर्षभाः॥ ते जानन्ति विना घ्राणं गन्धं हस्तेन केवलं॥ १८॥ प्रसादस्य स्वरूपमाह॥ प्रसादो नाम रुद्रस्य कर्मसाम्ये तु देहि
नां॥ देशकालादिकं नास्ति विशिष्टातिशयः सुरोत्तमाः॥ १९॥ कर्मसाम्य इति॥ सुखदुःखहेतुभूतयोर्धर्माधर्मलक्षणयोः कर्मणोरुपभोगेन
प्रक्षीणत्वसाम्ये सतीत्यर्थः॥ १९॥ प्राग्दर्शशक्तिपातरूपनिरूपणप्रस्तावे चतुस्त्रिंशोध्यायो॥ प्रसादस्य स्वरूपं तु मया नारायणेन च॥ रु
द्रेणापि स्फुरावक्तुं न शक्यं कल्पकोटिभिः॥ २०॥ केवलं लिङ्गगम्यं तु प्रसादः शिवस्य च॥ शिवायाश्च हरेः साक्षान्मम चान्यस्य चास्तिकाः॥
२१॥ प्रहर्षः स्वरनेत्राङ्गविक्रिया कम्पनं तथा॥ स्तोभः शरीरपातश्च भ्रमणं चोद्गतिस्तथा॥ २२॥ आकाशे वस्थितिर्देवाः शरीरान्तरसंस्थितिः॥
अर्वाग्निर्वेदहस्य प्रकाशनेन भासनं॥ २३॥ अनधीतस्य शास्त्रस्य स्वत एव प्रकाशनं॥ निग्रहानुग्रहे शक्तिः पर्वतादेश्च भेदनं॥ २४॥ एवमादी
नि लिङ्गानि प्रसादस्य सुरर्षभाः॥ तीव्रातीव्रतरश्चैषः प्रसादो न समो भवेत्॥ २५॥ एकरूपः प्रसादश्च शिवयाश्च शिवेन च॥ ज्ञापको न मया नान्यै

४२

नैव नारायणेन वा॥२६॥ अतः सर्वं परित्यज्य शिवादन्यच्च दैवतम्॥ तमेव शरणं गच्छेत् स यो मुक्तिं प्रतीच्छति॥२७॥ विष्णुभक्तस्य पापानामत्यन्तं नास्ति नास्ति
परागतिः॥ शिवभक्तस्य सर्वेषां सत्यमेकं मयोदितम्॥२८॥ विष्णुभक्तस्य देहेऽस्मिन् प्रसादो गम्यते यथा॥ न तथा विष्णुभक्तस्य न मद्भक्तस्य देहिनः॥ स
तस्मान्मुमुक्षुणा विष्णुमपि त्यक्त्वा महेश्वरी। आश्रयेत् सर्वभावेन प्रसादं कुरुते स्वयम्॥३०॥ प्रसादस्त्विति देवेशो ह्येषोऽपि सुरर्षभाः॥ वाक्येन
न केवलं दृष्टः प्रसगात्मतया सदा॥३१॥ प्रसादस्त्विति देवेशो ह्येषोऽपि सुरर्षभाः॥ वाक्येनमनुजैर्दृष्टः सदा स्वत्सीयैर्न वह॥३२॥ प्रसादस्त्विति
देवेशो ह्येषोऽपि सुरर्षभाः॥ वाक्येनमनुजैर्दृष्टः स्वरासर्वाक्रिरूपतः॥३३॥ सर्वसाक्षिणमात्मानं विदित्वा सकलं जगत्॥ साक्षिमात्रतया
निर्दिश्य पश्यति स पश्यति॥३४॥ साक्षिमात्रतया सर्वं हि सर्वेश्वरं दृश्यं जगच्च प्रसज्य द्वितीयसाक्षिचिन्मात्रतया यः पश्यति स एव
यथार्थदर्शी स्याद्यथा॥३५॥ निगदव्याख्यानमन्यत्॥ परमाद्वैतनिष्ठा हि निष्ठाकाष्ठा सुदुर्लभा॥ शिवादन्यतया भासमानं सर्वं स्वात्मत्वे सम्बुद्ध
परमाद्वैतविज्ञानी स्वयं परदेवता॥ तस्यैव परमा मुक्तिर्निःसंशयकारिणी॥३६॥ गौतमस्य मुनेः शापाद्धीनस्य शापतः॥ जन्मान्त
रकृतात् पापात् द्वयमर्थं निरोचते॥३७॥ महापापवतां नृणां परमाद्वैतवेदने॥ प्रद्वेषो जायते साक्षाद् देदजन्मपि शिवेऽपि च॥३८॥ नानृत
पापकर्तॄणां शिवज्ञानस्य साधने॥ संवर्गो नृणां तिर्यग्दृष्टस्य च धारणे॥३९॥ रुद्राक्षधारणे रुद्रलिङ्गस्यैव च पूजने॥ प्रद्वेषो
जायते नित्यं कोटिशो द्विजपेऽपि च॥४०॥ अनेकजन्मसिद्धानां श्रौतस्मार्तानुवर्तिनाम्॥ परमाद्वैतविज्ञानं जायते सुरपुङ्गवाः॥४१॥
परमाद्वैतविज्ञानी मया राध्यः सदैव हि॥ नारायणेन रुद्रेण तथा देवैर्विशेषतः॥४२॥ परमाद्वैतविज्ञानी यत्र कुत्र स्थितः सुराः॥ तत्र सं

निहिता मुक्तिर्न विकारापि विचारणा ॥४४॥ परमाद्वैतविज्ञाननिष्ठस्यैवं महात्मनः । शुश्रूषा क्रियते येन तस्यादौ मम मस्तके ॥४४॥ परमाद्वैत
विज्ञाननिष्ठस्य परयोगिनः । सम्मेद्वान पश्यामि न हरिर्न महेश्वरः ॥४५॥ परमाद्वैतविज्ञाननिष्ठाय परयोगिने । शरीरमर्थं प्राणांश्च
दद्याच्छ्रद्धया सह ॥४६॥ परमाद्वैतविज्ञाननिष्ठस्य परयोगिनः । शुश्रूषा शुद्धविद्यायाः साधनं हि न संशयः ॥४७॥ वेदशास्त्रेषु तीर्थेषु नराणां
वासनापि च । कुतर्कवासना लोकवासनापि सुरर्षभाः ॥४८॥ पुत्रमित्रकलत्रादौ वासना चार्थवासना । देहेन्द्रियमनोबुद्धिप्राणादौ
पि वासना ॥४९॥ पीडिसवासना भोग्यवासना कीर्तिवासना । श्रेष्ठवासना रुद्रवेदनारायणादिषु ॥५०॥ ज्ञानसाधनमप्येते शुचित्रिपुण्ड्रे सूक्ष्म
नादिषु । प्रद्वेषवासना पापवासना सुरपुंगवाः ॥५१॥ परमाद्वैतविज्ञानजन्मनः प्रतिबंधकाः । तस्मान्मुमुक्षुः श्रद्धालुर्वासनामखिला
मिमाम् ॥५२॥ विसृज्य परमाद्वैतज्ञाननिष्ठो भवेत्सदा । वेदोदितमहाद्वैतपरिज्ञानस्य वैभवम् ॥५३॥ न शक्यं वक्तुमस्माभिस्तस्माद्देवोपर
म्यते ॥ कथितमखिलदुःखध्वंसकं नः समस्तं परमशिववस्तुख्यात्मगापकं संघरवा ॥ विगतसकलदोषा वेदवेदान्तनिष्ठा हृदयकुहरनि
ष्ठं कर्मदं हि तिवैलह ॥५४॥ इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञवैभवखंडे उपरिभागे ब्रह्मगीतासूपनिषत्सु चतुर्थोऽध्यायः ॥४॥ इति श्री
मत्त्र्यंबकपादाब्जसेवापरायणेन विरचितायां यज्ञवैभवखंडे ब्रह्मगीताव्याख्यायां चतुर्थोऽध्यायः ॥४॥ श्रीरामचंद्र शरणं मम ॥ ॥
अथ सामशाखीतरोपनिषदोक्तं दीरितं ब्रह्मालोकत्वपरत्वमध्यायद्वयेन प्रतिपाद्यते ॥ अत्र हि श्रुतौ निष्प्रपंचमद्वितीयं ब्रह्मस्वात्म

४२

तेनोपदेष्टुं कार्यप्रपंचस्य कारणभूताद्ब्रह्मणोऽनन्यत्वेनैकविज्ञानात्सर्वविज्ञानं प्रतिज्ञाय स दृष्टांतमुपपादितं ॥ उत तमादेशमप्राक्ष्यो येना-
श्रुतं श्रुतं भवतीत्यादिना ॥ एवं सौम्य स आदेशो भवतीत्येतेन तां श्रुतिं तात्पर्यतः संगृह्णाति ॥ अतीवेत्यादिना ॥ ब्रह्मोवाच ॥ अतीव वस्तुत्व-
मादेशमनंतार्थप्रकाशकं ॥ वक्ष्ये युष्माकमप्याहं शृणुत श्रद्धया सह ॥ १ ॥ यस्य श्रवणमात्रेण श्रुतमेवाश्रुतं भवेत् ॥ अमतं च मतं ज्ञातमवि-
ज्ञातं च सत्तमाः ॥ २ ॥ अतीव वस्तुत्वमत्यंतरहस्यं गुरूपदेशगम्यमिति यावत् ॥ आदिश्यते शिष्यते तदद्वितीयं सद्ब्रह्मानेनेत्यादेशः ध्यका
आदिश्यत इत्यादेश इति कर्मणि व्युत्पत्त्या उक्तविधं ब्रह्मैवादेशशब्दार्थः ॥ अनंतार्थप्रकाशकमिति अपरिच्छिन्नार्थप्रकाशकं ब्रह्मस्व-
रूपनिपरिकल्पितस्य सकलस्य जडप्रपंचस्य भासकं ॥ स आदेशो विशेष्यते ॥ यस्येति ॥ यस्य खलु कारणभूतस्य सद्रूपस्य ब्रह्मणः कर्म-
णि षष्ठी ब्रह्मविषयेण श्रुतिजनितज्ञानेनाश्रुतं श्रुतिजनितज्ञानाविषयीकृतमपि सर्वं कार्यजगत्स्वकारणब्रह्मानन्यतया श्रुतमेव भवे-
त्तथा अमतमतर्कितमपि कार्यं जगत्तदनन्यमनेन मतं तर्कितं भवति ॥ तथैवाविज्ञातमनिश्चितमपि तद्घटोदरनिश्चयज्ञानेन तदनन्यतया
विज्ञातं निश्चितमेव भवति ॥ तथाविधमादेशमतिसंबंधः ॥ २ ॥ नन्वन्यस्मिन्विज्ञाते कथमन्यद्विज्ञातुं शक्यत इत्याशंक्य कारणभूतस्य ब्र-
ह्मणः कार्याज्जगतोऽनन्यत्वं दृष्टांतैरुपपादयति ॥ एकेनैव मृत्पिंडेन मृत्तिकायां यथा सुराः ॥ विज्ञातं मृन्मयं सर्वं मृदभिन्नत्वतः सदा
॥ ३ ॥ एकेन लोहमणिना सर्वं लोहमयं यथा ॥ विज्ञातं स्यात्तथैकेन नखनिकृंतनेन च ॥ सर्वं कार्ष्णायसं ज्ञातं तदभिन्नत्वतः सुराः ॥ ४ ॥

न्यद्भिन्नत्वं तद्रहितं। कारणत्वेनानुगृहीतं तद्व्यतिरेकेण घटादिकार्यस्य पृथग्लब्धात्मकत्वात्तदभिन्नत्वं॥४॥ ननु एवं कारणाद्द्रव्यात् कार्यस्य
जगतोऽनन्यत्वे तस्य सविशेषापत्तिरित्याशंक्य वस्तुतो जगतः स्वाङ्गित्वमेवेष्ट्यमिति सूत आह॥ कार्यं कारणाभिन्नं न भिन्नं नोभयात्मकं॥ ५
कार्यं स्थितिः न भिन्नमभिन्नमिति॥५॥ प्रतिज्ञातमर्थं साधयितुं विकल्पयति॥ भिन्नपक्षे तु सदा उत सत्कार्यं सदसदेव वा॥ सच्चेत्कारणसत्ता वा कार्य
सत्ता यवापरा॥६॥ तत्राद्यं पक्षमनुवदति। सच्चेदिति॥६॥ सा किं कार्यगतसत्ता कारणस्यैव उत ततोऽन्येति विकल्प्याद्ये कार्यस्यासत्त्वमेवाय
तमिति प्रतिपादयति॥ यदि कारणसत्तैव कार्यसत्ता नचापरा॥ तर्हि कारणसत्तैक्यात् कार्यसत्ताभिदा भवेत्॥७॥ कारणसत्तैव चेत् कार्यस्य सत्ता
तर्हि सा स्वैवेति कार्यस्य पृथक्सत्ताभावात् कारणाभिन्नत्वमेवेत्यर्थः॥७॥ ननु एवं सत्तायाः एकत्वेऽपि कारणात् कार्यं पृथगेवानुभूयत इति
मानाशंक्यमानं घनिरास्येच्छे। सत्तैकापि भवेद्भिन्नं कारणात् कार्यसंज्ञितं॥ इति वार्तान्यवार्तैव कार्यसंज्ञमसत्खलु॥८॥ कारणसत्तैव
कार्यसत्तेत्यंगीकारात् स्वभावतः कार्यमसदेवोपपन्नमिति भिन्नं कार्यं सदिति वार्तामात्रमित्यर्थः॥८॥ एतदेवासत्त्वमुपपादय
ति॥ सत्ताहीनस्य कार्यस्यासत्त्वमेव हि युज्यते॥ प्रागसत्त्वे तु कार्यस्य सत्कार्यं कीदृशं भवेत्॥९॥ सत्ताहीनस्य कार्यस्य नरविषाण
वदसत्त्वमेव हि युक्तं। न ह्यन्यदीयसत्तया अन्यस्सद्भवति॥ नरविषाणस्यापि सत्त्वप्रसंगादित्यर्थः॥ अत एवमस्मिन्पक्षे कार्यस्यासत्त्वे
सति सत्कार्यमिति वक्तुं न शक्यं निरर्थकमित्यर्थः॥९॥ एवं तर्हि कारणसत्तातोऽन्यैव कार्यसत्तेति द्वितीयः कल्पोऽस्त्वित्याशंकते॥ नैव का
रणसत्तैव कार्यसत्ता परैव चेत्॥ तर्हि सा कार्यसत्ता तु तया कारणसत्तया॥१०॥ नैवेति। तन्निराकरोति। तर्हीति॥११॥ कारणसत्ता॥

४२

४३

पृथग्भूता सा कार्यसत्ता किं सद्रूपेण भिन्ना उतासद्रूपेणेति विकल्प्याद्यं प्रत्याह॥ सद्रूपेणैव भिन्ना स्यादसद्रूपेण वा भवेत्॥ ११॥
सद्रूपेणेति चेदेका सत्ता भिन्ना न सा भवेत्॥ ११॥ उभयोरपि सत्तयोः सद्रूपेणैकरूपत्वावगमात्तेन रूपेण भेदो न युक्तः स्यात् एकैव सत्ता
भवेदित्यर्थः॥ ११॥ द्वितीयमनूद्य दूषयति॥ असद्रूपेण सा भिन्ना कार्यसत्ता तथा यदि॥ तर्हि सा नैव सत्ता स्यादसत्त्वाद्व्योमसूनवत्॥ १२॥
सा सत्तैव न भवति॥ शश विषाणवदसत्त्वादेवेत्यर्थः॥ १२॥ एवं सत्कार्यपक्षं निराकृत्य असदेव कार्यं कारणाद्भिन्नमिति पक्षमपि निराकरोति॥
यद्यसत्कार्यमिष्येत न कार्यं तर्हि तद्भवेत्॥ वंध्यापुत्रो न कस्यापि वस्तुनः कार्यमिष्यते॥ १३॥ प्रागसतः सत्तासंबंधो ह्युत्पत्तिः परैरभि
मता सा च वंध्यासुतवदसतः कार्यस्य न संभवतीति तस्य कार्यत्वमेव हीयेतेत्यर्थः॥ १३॥ ननु प्रध्वंसाभाववदसतोपि कार्यत्वं किं न स्यादित्यत
आह॥ प्रध्वंसोपि न कार्यं स्यात्तस्योत्पत्तेरसंभवात्॥ नास्ति कारकसंबंधः प्रध्वंसस्यासतो यथा॥ १४॥ प्रध्वंसस्यापि कार्यत्वं न संभवति
दीरितलक्षणाया उत्पत्तेरयोगात्॥ उत्पत्त्यसंभवं प्रतिपादयति॥ नास्तीति॥ कर्तृकरणादिकारकसंबंधवतो हि घटादेर्जनिक्रियोपलभ्य
ते॥ असतः प्रध्वंसस्य शशविषाणवन्निर्धर्मकत्वात्तथाविधधर्माश्रयत्वेन भावरूपत्वप्रसंगात्॥ कारकसंबंधलक्षणो धर्मो न संभवति॥ अ
तस्तदपेक्षया जनिक्रियापि नास्तीति तस्य कार्यत्वं न युक्तमित्यर्थः॥ १४॥ तस्य निरूपाख्यत्वात्ततो नास्ति जनिक्रिया॥ असत्त्वेपि विशेषो
ऽस्ति कार्यस्येति मतिर्यदि॥ १५॥ नन्वसत्त्वेपि कार्यस्यास्ति नासतो वंध्यासुतादेर्विशेषो विद्यते तेन च तस्य कार्यत्वं सिध्यतीति शंकामनुभाष
ते॥ असत्त्वेपि॥ १५॥ कोसौ विशेषः किं कारकसंबंधः उत जनिक्रियाश्रयत्वं [illegible] सत्तासंबंध इति विकल्प्याद्यं प्रत्याह॥ का

को विशेषोऽस्य संबंधः कारकैर्यदि तन्न। कि॥ विशेषेणाति संबंधवृत्ति बुधीस्यस एवाहि।।२६।। निर्विशेषस्यासतः कारकसंबंधिसेवंध्या
सूनोरपि तत्संबंधित्वसंभावनायां कार्यत्वस्य तु सक्रिरिस्यवश्यं केनचिद्विशेषेण विशेषितोऽसति कारकसंबंधो वक्तव्यः अस चावि
शेषमेव संबंधश्चेत्तर्हि स्वविशेषे स्वष्टनिरिस्यात्माश्रयतायदि संबंधादन्यः स विशेषस्तेनापि केनचिद्विशेषितएवास तिवर्तितव्यं।।स
च विशेषः किं स्वोक्तसंबंध एवान्यो वा द्वितीयो वा विशेषः। आद्ये अन्योन्याश्रयत्वं। द्वितीयेपि चत्वर्थादिविशेषानंगीकारे चक्र
कापत्तिः। अंगीकारे त्वनवस्था स्यात्। कार्यस्य कारकसंबंधित्वलक्षणो विशेषो निर्विरूप इत्यर्थः।।२६।। द्वितीयं प्रत्याह। जनिक्रि
याश्रयत्वं चेद्विशेषोऽस्य तत्तापि। पूर्वोक्तदोषः प्रसक्तस्त्वस्य नास्ति निवारकः।।२७।। जनिक्रियाश्रयत्वलक्षणो विशेषोपि केनचि
द्विशेषितस्यासत इति वक्तव्यं। इतरथा नरविषाणस्यापि तादृग्विशेषप्रसंगात्। स च विशेषः किमिदमेव जनिक्रियाश्रयत्व
मन्यो वा। इदमेव चेदात्माश्रयत्वमन्यश्चेदनवस्था। पूर्वोक्तो दोषः पर्यावर्तत इत्यर्थः।।२७।। उक्तदोषप्रसक्तत्वादेव सत्तासंबंधित्वलक्षणो विशेष इति तृ
तीयः कल्पोऽपि न युक्त इत्याह। सत्तासंबंधवत्त्वं चेद्विशेषोऽस्य न तस्य दोः। तदापि दोषः पूर्वोक्तः प्राप्नोत्येव न संशयः।।२८।। प्रतिपा
दितमसतः कार्यत्वासंभवमुपसंहरति। अतोऽसतो न कार्यत्वं सदसत्त्वं न संगतं।। उक्तदोषव्यापत्तेरतः कार्यं तु कारणात्।।२९।।
यत उक्तरीत्या नरविषाणवदसतो विशेषसंबंधो निरूप्यः अतोऽसत्त्वविरोधात्तद्वदेव सदसत्स्य कार्यत्वमयुक्तमित्यर्थः सद
सदात्मकं कार्यमिति तृतीयकल्पं निरस्यति। सदसत्त्वमिति।। एवं कारणाद्भिन्नस्य कार्यस्य सदसदादिविकल्पेन निरूप

५५

पि तु महदशक्यत्वात्कारणाभिन्नमेव तत्कार्यमित्यंगीकर्तव्यमित्युपसंहरति ॥ अतः कार्यमिति ॥ १९ ॥ अभिन्नमेव भेदस्यासंभवादेव वस्तुतः ॥ भेद
भेदस्वभावस्यातु स्फुटतरां नैवासिध्यति ॥ २० ॥ पंचदेशमाह ॥ भेदस्येति ॥ भेदावगमस्य धर्मिप्रतियोगिभेदाधीननिरूपणत्वेनात्माश्रयादिदोषग्रस्तत्वात् परमार्थ
तः कथमपि निरूपणासंभवादित्यर्थः ॥ भेदाभेदेति ॥ भावाभावयोरेकत्र सहावस्थानमशक्यत्वात् भेदपक्षोऽभेदपक्षश्चायुक्तः । अपि त्वभिन्नं कार्यमिति
भेदाभेदपक्षस्तु सुतरां न युक्त इत्यर्थः ॥ २० ॥ ननु कार्यस्य कारणानन्यत्वे भेदप्रतीतेः का गतिरिति तामाह ॥ कारणात्कार्यजातस्य भेदाभावात्
पस्तुतः कार्यकारणभेदश्च कारकव्याकृतिस्तथा ॥ २१ ॥ उत्पत्तिश्च विनाशश्च तथैवार्थक्रियापि च ॥ नामरूपक्रियाः पञ्चसर्वेऽपि सांप्रसिध्यति ॥ २२
परमार्थतः कार्यस्य कारणादभेदेऽप्यविद्यातः कार्यकारणादिभेदप्रतिभासः सिध्यतीत्यर्थः ॥ २१ ॥ २२ ॥ एवं कार्यस्य कारणमात्रत्वे
साध्यात्सिद्धमर्थं श्रुतिर्योजयति ॥ अतः सर्वो विकारश्च वाचाकेवलमास्तिकाः ॥ अस्तीत्यारभ्यते नामधेयमात्रं हि सत्सदा ॥ २३ ॥ विक्रिय
ते विविधः क्रियत इति विकारः कार्यवर्गः ॥ यतस्तत्र भेदप्रतिभासो भ्रान्तः ॥ अतः सर्वोऽपि विकारो वास्त्वेव केवलमस्तीत्यारभ्यते ॥ न वस्तु
तोऽस्ति ॥ अतो घटः शरावइत्यादिनामधेयमात्रमेव ॥ सदा सर्वदा प्रध्वंसावस्थायामिव स्थितिकालेऽपि कार्यस्य कारणमात्रत्व
मेवाभिप्रेष्यते ॥ २३ ॥ नन्वेवं विकारस्य नामधेयमात्रत्वेऽर्थादसत्त्वमुक्तं भवति ॥ तादृशस्य कथं कारणत्वं तत्सद्भावान्न्यपर्तु सदस
तोः परस्परविरोधादित्याशंक्याह ॥ प्रातीतिकेन रूपेण विकारः सत्स एव हि ॥ कारणाकारएवास्य सत्त्वं स्यात्सदात्मकराः ॥ २४ ॥ ॐ

कार्यस्य हि देशस्ये पृथुबुध्नोदराद्याकारविशेषात्मकमेकं प्रतीतिकं रूपं ॥ तथाच गतमृदात्मकमपरं कारणरूपं नच प्रतीतिकेन रूपेणासत
एवकार्यवर्गः कारणमृद्रूपेण सत्त्व ॥२४॥ ननु चैवं कार्यस्य सर्वं घिस कारणरूपमेकं कारणमन्यदिति द्वैतं कारणस्य व्याकोपः इस्यत आह ॥ का
रणाभिन्नरूपेण कार्यं कारणमेव हि सत्सरूपेण सदा सत्सीभेदेनो किन्तु बाखलु ॥२५॥ कार्यस्य सर्वं घिस कारणादि स्तिन्नं तत्कारणानेकानानयोर्भेदो
विघातः सत्यर्थः एवमुक्तेर्थे [illegible] ति कृत्येव सत्यमिस्सादिकां कारणमात्रसत्यप्रतिपादिकां श्रुतिं योजयति सद्रूपेणेति ॥ श्रुतिगतैकत्वास्य फल
माह ॥ अभेदेनेति ॥२५॥ प्रतिपादितमर्थं निगमयति ॥ अतः कारणविज्ञानात्सर्वविज्ञानमास्तिकाः ॥ कारणादनुपपन्नं हि न संदेहोस्ति कश्चन ॥२६॥
यतो लोके मृदादिकारणेषु ज्ञातेषु तदनन्यतया तत्कार्यं घटशरावादिकमपि कारणाकारेण ज्ञातमेव भवति ॥ अतः सर्वजगत्कारणभूतस
ब्रह्मात्मज्ञानात्कार्यं सर्वमपि कारणात्मज्ञानमेव भवति सेतदुपपद्यत इत्यर्थः ॥ ननु कार्यस्य कारणज्ञानात् ज्ञातेपि कारणजातीयस्य तेन ज्ञा
तत्वेन [illegible] नेकविज्ञानात् सर्वविज्ञानमित्यत आह ॥ त्वत्कारणमेकं हि न भिन्नं नोभयात्मकं ॥ भेदस्सर्वत्र मिथ्यैव धर्मादेरनिरूप
णात् ॥२७॥ भेदज्ञाने हि धर्मादिविभागस्यानुवेदनं ॥ विभेदेनैव धर्मादौ विज्ञाने भेदवेदनं ॥ स्वाभेदानिरूपणादेव भेदाभेदौ न संगतौ ॥
अतश्च कारणं नित्यमेकमेवाद्वयं स्फुरत् ॥२८॥ जगज्जन्मकारणमेकमद्वितीयमेव न तु भिन्नं नापि भिन्नाभिन्नात्मकं भेदस्य क्वचिदप्युपल
ब्धत्वाभावेन कारणेपि कि तमपश्यत्वादित्यर्थः ॥ ननु घटपटयोरभिन्नइति भेदः प्रत्यक्षतो नु भूयत एवेत्यत आह ॥ भेदश्च सर्वत्रेति ॥
धर्मिप्रतियोगिज्ञानाधीननिरूपणो हि भेदावभासः [illegible] भेदेन ज्ञातयोरेव धर्मिप्रतियोगिनोरसिन्नपेक्षाधीननिरूपणत्वेन क्वचिदपि

८५

भेदस्यातत्त्वाभासित्वान्मिथ्या भेदस्य प्रतीयमानो भेद इत्यर्थः॥८॥ अत एवेति॥ अतो वेद्यस्य भेदस्याभावान्न द्वैतस्य वास्तवत्वमपि न पारमार्थिकः॥
अतः कारणाद्विदारणात्मकभेदस्पर्शात् कारणं निरस्य स्वगतसजातीयविजातीयभेदाभावो ब्रह्मणः एकमेवाद्वितीयमिति सिद्धमित्यर्थः॥२९॥
ननु लोके घटादिकार्ये उपादाननिमित्ते चोभये पृथग्दृश्येते तथाद्वितीयस्य सद्वस्तुनो निमित्तत्वे निरुपादानं कार्यं नोपपद्यते उपा
दानत्वे च निर्निमित्तत्वप्रसंगः स्यादित्यपेक्षायामुभयरूपतामाह॥ कुलालादेर्मृदादेश्च भेदो दृष्टेऽपि भवतो॥ अचेतनत्वान्मृदादेः कुलालादिर
पेक्षते॥३०॥ अत्र कारणमद्वैतं शुद्धचैतन्यमेव हि तेन नापेक्ष्यतेऽन्यत्कारणं चेतनात्मकं॥ स्वयं चेतनमप्येतत्कारणं नु कुलालवत्॥ अपे
क्षते मृदादेरुपादानं चिद्रूपं कारणं॥ मृदादेरचेतनत्वेन हि स्वातिरिक्तचेतनकुलालाद्यपेक्षा उपादानं तु स्वयमेव चेतनत्वान्नान्यचेतन
मपेक्षते तथा चेतनत्वेऽपि कुलालवत्स्वातिरिक्ताचिद्रूपोपादानापेक्षापि नास्ति अभिन्ननिमित्तोपादानस्य ... अत्रैव श्रुतिः ... तदैक्षत बहु
स्यां प्रजायेयेति तदैक्षणान्निमित्तत्वं बहुभवनेनोपादानत्वं चाद्वितीयस्य सद्वस्तुनोऽवगम्यते॥ अतो जगतो निमित्तं उपादानं च स्वयमेवेत्यर्थः॥३०॥
३१॥ नन्वक्रियस्यासंगस्य सद्रूपस्य सद्रूपस्य ब्रह्मणः कथमीदृग्विधं कारणत्वं संभवति माययेति चेन्न हि तथा द्वैतापत्तेरित्यत आह॥ प्र
तीत्यै केवलं शक्तिश्चिद्रूपा तन्मयी॥ सर्वप्रकारैर्बुद्धिरनिरूप्यास्ति शांकरी॥३२॥ तथा दुर्घटकारिण्या तादात्म्येनैव संगतिः॥ कारणं सकलस्र
ष्टुः सर्वसिद्धं तथास्तिका॥३३॥ प्रतीत्यासंगतिमात्रेणैव सिद्धा ... एकशरीरे विभाववतां स्वप्रकाशब्रह्मस्वरूपाच्छादकत्वात्प्रधाना निरूप
णसमर्थैरपि विबुद्धिः सत्त्वसदादिसर्वप्रकारैर्निर्वक्तुमशक्यत्वात् दुर्घटविधायिनी माया तादात्म्यस्य सद्रूपे ब्रह्मण्यध्यस्तत्वात्तदीयस ...

णोपाधिभेदेनाविक्रियस्यापि ब्रह्मणः स्रष्टृत्वादिकमुपपद्यते नापि द्वैतापत्तिः मायाया अनिर्वचनीयत्वेन सद्द्वैतराभावात् ॥२३॥ एवमद्वितीय
त्वं प्रसाध्य सद्रूपत्वमपि प्रसाधयति ॥ पालकं च सदा सच्च चिद्रूपत्वात् स्फुरेत्मम ॥४॥ चिद्रूपस्य असत्त्वं तु क्रमेवास्तिकाः सदा ॥२४॥ अचिद्रूपात् स्वप्न
दर्शिपात्वं संमतं खलु ॥ अतस्तत्कारणं द्वास्ते सदैवैकं चराचरम् ॥ श्रुतिः ॥ इदं सर्वं जगत् सृष्टेः सदेवासीत् स्फुरद्रूपमाः ॥ विज्ञानमानन्दं ब्रह्मेत्यादिश्रुतेः ॥ चिद्रूप
हि जगत्कारणं श्रुतं तथा च ॥ विमतं सत् चिद्रूपत्वात् यत्तु सदिति लक्षणे नासौ चिद्रूपः यथा रज्जुसर्प इति ॥ व्याप्तिमनुपपाद्य ॥ विद्रूपस्येति ॥
जडप्रपञ्चप्रतीतिबाधसाक्षितया सर्वदावस्थानात् चिद्रूपस्य तदधिष्ठानस्य ब्रह्मणो युक्तमेव सार्वकालिकं सत्त्वमित्यर्थः ॥ विद्रूपस्याप्यसत्त्वं कु
तो न भवतीत्यत आह ॥ अचिदिति ॥ अहिरज्ज्वादेः रज्जुसर्पादेः स्वप्नादेः ॥ तच्च हि मिथ्यात्वमपि व्यावर्तयतीत्यभिप्रायः ॥ अस्मिन्नर्थे श्रुतिमाह ॥ सदेव सोम्येद
मग्र आसीदेकमेवाद्वितीयमिति श्रुतिं योजयति ॥ अतः श्रुतिः यत एकं सत् जगत्कारणमद्वितीयं सदेव अतः कारणादिदं परिदृश्यमानं नाम
रूपात्मकं कार्यं सर्वं जगत् सृष्टेः पूर्वं सदेवासीत् ॥ सद्रूपकारणात्मनैव वर्तते न तु नामरूपात्मनेत्यर्थः ॥२५॥ एवं सत्कारणवादं प्रसाध्य तदार्थ्योर्थं श्रु
त्यन्तरेषु बाधमभिमतमसत्कारणपक्षमुपन्यस्य तस्य निरासं करोति ॥ तैत्तिरीयकादिना ॥ कथमसतः सज्जायेतेत्येतेन ॥ तस्याः श्रुतेरभिप्रायमा
विष्करोति ॥ असदा इदमग्र आसीदिति श्रुतौ वदन्ति स्फुटं गवा ॥२६॥ विनष्टादेव हि बीजादेरङ्कुरादिकार्यस्य निदर्शनात् कारणानुपमर्द्य प्रादुर्भावो नास्ति
स्वभावस्यैव कारणत्वम् ॥ एवं जगन्मूलकारणमपि प्रागसद्रूपमेवेत्येवं वदन्तो सदादिनो ॥ तदेव दत्तस्य पुत्रोत्पादनशक्तिवत् अष्ट
स्य कारणस्य कार्यजननशक्त्ययोगात् ॥ अङ्कुरादिकार्यसमये च बीजादिकारणसंस्थानादिविशेषणं तत्स्वयं नामनुवृत्तेश्च न असतः कारणत्वं
चिद्रूपत्वेन व्याप्तं दृश्यते ॥ तच्च चिद्रूपाज्जगत्कारणाद्व्यावर्तमानं स्वव्याप्यं ~~[illegible]~~

युक्तमिति तेषां मतं ॥ २७ ॥ एतदेवोपपादयति । असतः कारणत्वं युक्तं यस्मात् न तु निरूपणे ॥ वंध्यापुत्रोपि सर्वेषां कारणं स्यात्त्वयैव खलु ॥ २८ ॥
न तावदसतः कारणत्वं युक्तं तस्य सर्वप्रकारेणापि निरूपाख्यस्य कारणत्वलक्षणभावरूपधर्माश्रयत्वायोगात् तदाश्रयत्वे च वंध्यासुतस्याप्य
सत्वाविशेषात् सर्वकारणत्वं प्रसज्येतेत्यर्थः ॥ २८ ॥ नन्वसतोपि जगन्मूलकारणस्य स्वशक्तिवशात् कारणत्वं संभवत्येवेति शंकां दूषयितुमनुभाष
ते । अस्त्वशक्यासत्त्वात् सर्वेषां कारणं भवतीति चेत् ॥ शक्तिरप्यसतो नास्ति सतो बीजस्य दर्शनात् ॥ २९ ॥ अंकुरोत्पादिका शक्तिः सद्रूपस्यैव दृश्यते ॥
खलु बीजस्य सर्वत्र नासतस्तादृग्दर्शनात् ॥ ३० ॥ एतदेव दूषयति । शक्तिरिति ॥ अंकुरादिकार्यजननशक्तिरपि सद्रूपस्यैव बीजादेरन्वयव्यतिरे
काभ्यामवसीयते नासतः ॥ अतो व्याघातो विरोधादसतः ॥ किं कल्पनमयुक्तमित्यर्थः ॥ विकल्पासहत्वेनापि दूषयति । सापि शक्तिरसती किं वा
सती सदसती किं वा ॥ सती चेत् सा सती शक्तिः कथं वंध्यासुताश्रया ॥ ३१ ॥ आश्रयत्वं सतो दृष्टं खलु लोके न चासतः ॥ सा सती चेत् कथं शक्तिराश्रया
यिनिर्वाहिकी सती ॥ ३२ ॥ वंध्यापुत्रः स्वयं नैव कार्यनिर्वाहकः खलु ॥ निर्वाहकत्वधर्मश्चासत एव विरुध्यते ॥ ३३ ॥ आद्यं कल्पमनूद्य नि
राचष्टे । सती चेति ॥ भावरूपा शक्तिर्निरुपाख्यस्यासतः कथं धर्मः स्यात् ॥ न ह्यसौ नासतो वंध्यासुतादेस्तादृशशक्तियोगो दृश्यते
युज्यते वा । तथाविधशक्त्याश्रयत्वं च सत एव हि बीजादेर्दृष्टं न त्वसतो नरविषाणादेः ॥ अतस्तदाश्रयत्वे बीजादिवदेव भावरूपत्वप्र
संगादसतः सद्रूपा शक्तिरस्तीति न युक्तं कल्पयितुमित्यर्थः ॥ द्वितीयं कल्पमनूद्य निराचष्टे । सा सती चेति द्वि ॥ असतः कारणत्वो
पपादनाय हि या शक्तिरपि कल्प्यते सापि यदि सती स्यात् तर्हि तस्याः अपि वंध्यासुतवत्कार्यनिर्वहणसामर्थ्यानुपपत्तिः ॥ नन्वसतो
पि तथाविधसामर्थ्यदर्शनबलादभ्युपगम्यतामित्यत आह । निर्वाहकत्वेति । एवं चासद्रूपा शक्तिः परिकल्पितापि नासतः कारण

तमुपपादयितुं शक्नोतीत्यर्थः॥४३॥ तृतीयं निरस्यति॥ शक्तिश्चेत्सदसती साचेद्दोषद्वयसमागमः॥ अतश्च शून्यशक्त्याश्चासत्त्वं सर्वेषां नैव
कारणं॥४४॥ तस्मात्सोयमसद्वादोऽभ्युपमानेनयुक्तिमान्॥ दोषद्वयसमागमः इति॥ सत्वासत्वपक्षोक्तयोर्द्वयोरपि दोषयोः प्रस-
ङ्ग इत्यर्थः प्रतिपादितमसतो कारणत्वं निगमयति॥ अत इति एवमसत्कारणवादस्यासुकरत्वाच्छ्रुतौ छान्दोग्येन तन्निराकृतत्वाच्च ततः स-
कारणवादनिगमनं सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति तद्दर्शयति॥ अतश्च सदेव सर्वेषां कारणं नासदस्ति का॥४५॥
सृष्टेः स्वप्रागिदं सर्वं सदेवासीत्तु कारणं॥ तद्धि कारणमात्रं तत् विनिर्मुक्तं सदद्वयं॥४६॥ पूर्वकल्पप्रपंचोत्थसंस्कारेण तु शङ्किती॥
कालकर्मविपाकेन सत्वं च त्रिसमाश्रिती॥४७॥ अत इति॥ नासदिति श्रुतिगतशब्दाभिप्रायकथनं॥ एवमेकविज्ञानात्सर्वविज्ञानं
प्रतिज्ञाय तदुपपादनाय यथा दिदृष्टान्तैः कार्यस्य कारणानन्यत्वं प्रसाध्य किं तदेकं वस्तु यद्विज्ञानात्सर्वं विज्ञायते सा काङ्क्षायां॥
सदेव सोम्येदमग्र आसीदिति सदद्वितीयं ब्रह्मोपदिष्टं तत्कार्यत्वे हि जगतस्तत्कारणविज्ञानेन विज्ञातत्वमित्यभिप्रेत्य तत्का-
र्यत्वप्रतिपादनाय तत्सु कारणत्वं सृष्टिराम्नायते॥ तदैक्षत बहु स्यां प्रजायेयेत्यादिना॥ तस्य सृष्टिश्रुतेरभिप्रेतार्थाभिधानपुरस्स-
रं संगृह्णाति तत्त्वेत्यादिना॥ आद्यन्तविनिर्मुक्तमिति॥ आदिरुत्पत्तिरन्तो विनाशस्ताभ्यामुभयविनिर्मुक्तं नन्वद्वितीयात्सद्रूपा-
देकविधात्कथमनेकविधकार्यप्रपंचोत्पत्तिरित्यत आह॥ पूर्वकल्पेति॥ अतीतकल्पे लीनप्रपंचजनिताया वासनातदनुभ-
वजनितायाश्च संस्कारस्तदुभयसंवलितमित्यर्थः॥ कालकर्मविपाकेति॥ कालद्वारा प्राणिकर्मणां पुण्यपापरूपाणां

४७

९३

यः परिणामः प्रकृत्युपादानत्वमनुरूपयति तेनेत्यर्थः । स खलु दृष्टिसमाप्तिरिति । अतः करणोपादानभूतसत्त्वपरिणामरूपान्तःकरणकार्यप्रपञ्चविषयावच्छि
न्नत्वात् बुद्धिमित्यर्थः । स्थूलार्थमैक्षत प्राज्ञः बहु स्यामिति । किमभूत् पुनस्तत् सर्वसंस्कारादाकारं वपुरादितः ॥ ४ ॥ बहु स्यामिति । उपादान
तया नैकरूपेक्षणस्य आत्मत्वेनैव बहुविधजगद्रूपेणेत्यर्थः । न तु निर्विकारस्य निरवयवस्य चिद्रूपस्यात्मनो बहुभवनासंभवात् योग्यसाक्षि
धर्मिमत्प्रधानमेव तदैक्षत बहु स्यामिति श्रुतिवाक्येन प्रतिपाद्यत इति चेन्नैव । तस्याचेतनत्वेनेक्षणासंभवात् । अत एव भगवान्बादरायणः
सूत्रयामास ईक्षतेर्नाशब्दमिति । कथं तर्हि त्रिविधस्य ब्रह्मणो बहुभवनसंभव इति तत्राह । त्र्यात्मिकमिति । त्र्यात्मिकं सत्त्वरजस्तमोगुणा
त्मिका माया तस्याः सत्त्वाद्यात्मिकत्वप्रकृतित्वात् त्र्यात्मिका मायेति । क्षिपदेनाभिधानं । इमं सर्वं परमेश्वरस्य श्वेताश्वतरैराम्नायते ।
परास्य शक्तिर्विविधैव श्रूयत इति । वियन्नोत्पद्यते । छान्दोग्यशाखायां तेजःप्रभृतेरेव सृष्टिराम्नाता न वियदादेः । तथापि तैत्तिरीयके त
योरपि सृष्टिराम्नातेति गुणोपसंहारन्यायेन तामत्रोपसंहृत्य दर्शयति । पुनस्तदिति । बादरायणोऽपि न वियदश्रुतेरिति न वियदश्रु
तेरेतेन मातरिश्वा व्याख्यात इत्यधिकरणाभ्यां निर्णीतवान् ॥ ४ ॥ अतो नभोऽसृजत् तेजःप्रभृतिना यातेजोऽबन्नस्य सृष्टिराम्नाता तामाह । सृष्ट्वा
तेजस्ततः सृष्ट्वा पुनः सृष्ट्वा तपस्ततः । अन्नशब्दोदितं दिवः ससर्ज पृथिवीं [illegible] ॥ ४ ॥ सृष्ट्वेति । ततस्तस्माद्वायुरूपापन्नात् स्वा
पुनस्तेजः सृष्ट्वा ततस्तेजोरूपापन्नात्तस्मादेवापः ससर्जेत्यर्थः । एवं चात्र तदिति । जनिकर्तुः प्रकृतिरिति विहितापादाने पञ्चमी । ननु

दिग्योगलक्षणानंतर्यस्य पंचमी। अनंतरमित्यस्याहारसापेक्षायाउपपादविभक्तेस्तन्निरपेक्षत्वेन कारकविभक्तेर्बलीयस्त्वादान
न्वैर्वुं तेजसः सद्रूपब्रह्मणः त्वप्राकोपः वायोस्त्वत्वे तो ब्रह्मासेदाहावास्त्वायणो प्युमुमर्थं सूत्रयामासं तेजोतस्तया ह्याल्यादिना। अन्न
शब्दो दितामिति। अन्नमस्रुजतेति। श्रुतौ या पृथिवी अन्नशब्देनाभिहिता ता मित्यर्थः। श्रुतिगतान्नशब्दस्य पृथिव्यभिधायकत्वं च व्या
सेन प्रतिपादिती। पृथिव्यधिकाररूपशब्दांतरेभ्य इति। परामिति। अपंचीकृतत्वेन सूक्ष्मामित्यर्थः। ४। श्रुतौ तेजोब्रुन्नसृष्टेरनंतरंय
श्रिवृत्करणमाम्नातं तासां त्रिवृतमेकैकाम करोदिति। तद्भूतसृष्टौ वियद्वायुसृष्टेरप्युपलक्षणार्थं मितित
दर्शयति। तत्पुनः कारणं ब्रह्मणा भूतानि पंचधा। एकैकं द्विविधं कृत्वा तेषां मध्ये सुरोत्तमाः। ५०। एतच्च पंचीकरणं शिवमाहात्म्यखंड
स्य पंचदशमेऽध्याये विस्तरेण प्रागस्माभिः प्रतिपादितं। ५०। अंशाभ्यां च समादाय तेषामेकैकमास्तिकाः। कृत्वा चतुर्धा तेष्वंशानादाय
यच्चतुरः स्वयं। एकं भूतांतरार्धेन करोतिक्रमशः सुराः। ५१। एवमंशांतरानेनाम्नार
ब्रह्मकारणं। ५४। तेष्वंशानादायेति तेषु विंशतिसंख्याकेषु चतुर्धाकृतांशेषु वियदर्धसंबंधिनश्चतुरोंशानादाय वाय्वादीनां चतुर्णां
भूतानां संबंधिनस्तांश्चतुरोर्धांशांश्चादाय कारणं ब्रह्म एकैकेनार्धेन एकैकमंशं संयोजयति। एवं वाय्वादि भूतार्धसंबंधिनोपि

८०

८०

९५

चतुरोंऽशानादाय तत्तद्भूतव्यतिरिक्तभूतचतुर्थांशैर्एकैकमेकं संयोजयतीत्यक्षरार्थः॥५१॥५२॥५३॥५४॥ अण्डजं जारजमुद्भिज्जमिति श्रुतेरभिप्रेतमर्थं
दर्शयति॥ अण्डजं जारजं चैव स्वेदजं चोद्भिज्जं तथा॥ करोति कालपाकेन प्राणिकर्मवशेन च॥५५॥ स्वेदजस्य पृथक्कादेरुद्भिज्जेऽन्तर्भाव इत्यभिप्रेत्य श्रुतौ त्रैविध्य
माम्नातं। अन्तरवाऽऽण्डभाष्यकाराः स्वेदजसंशोकजयोरुद्भिज्जजयोरपि यथासंभवमेतदन्तर्भावं वदति॥५५॥ सेयं देवतेमास्तिस्रो देवता अनेनैव जीवे
नात्मनानुप्रविश्य नामरूपे व्याकरोदिति श्रुतिवाक्यस्यार्थमाह॥ ब्रह्म सर्वत्र चिद्रूपेण वायुमाप्य सालिकार्थं ष्ठ्यङ्गमानि रूपाणि क्रियते पूर्वक
ल्पवत्॥५६॥ जगत्कारणं ब्रह्म जलतरङ्गबुद्बुदादिषु सूर्यप्रतिबिम्बवत्सर्वत्र ब्रह्मेशादिसर्वशरीरेषु चिद्रूपेण वायुमाप्य पूर्वकल्पानुसारेण
सौ नामायमिदं रूपमिति नामरूपे व्याकरोदित्यर्थः॥५६॥ इदं सर्वं जगत्सुसमिव भातमपि स्वतः। कारणव्यतिरेकेण नास्त्येवात्र न संशयः॥५७॥
स्पष्टादिदृष्टान्तैः प्रागुपपादितं कार्यस्य कारणानन्यत्वं पुनर्दृढयितुं त्रिवृत्कृतस्थूलभूतकार्यप्रपञ्चस्यापि अत्रिवृत्कृतकारणभूततेजोऽबन्ना
त्मकमग्न्यादिभिरुदाहरणैः श्रुतौ दर्शितम्। यदग्ने रोहितं रूपमित्यादिना॥ इदं पञ्चीकृतभूतकार्यं सर्वं जगत्सुसमार्थवदिना तमपि कारणसूक्ष्म
भूतव्यतिरेकेण नैवास्ति। कथमेतदुपपद्यतेऽस्मिन्नर्थे उपपादयति। यदग्ने रोहितं रूपं तद्रूपं तेजसः सदा। यच्छुक्लं तदपां रूपं यत्कृष्णं भौममेव तत्॥५८॥
त्रिवृत्कृतभूतकार्येष्वग्न्यादिषु लोहितशुक्लकृष्णात्मकास्त्रयो वर्णा अवभासन्ते। तत्र यल्लोहितं दृश्यते तद् त्रिवृत्कृतस्य सूक्ष्मस्य तेजसो रूपं यच्छुक्लं तदपां
यत्कृष्णं तद्भूमेः। ननु चैषां रूपाणामन्यदीयत्वेऽप्यग्निर्नाम धर्मी कुतो न स्यादित्यत आह॥ नास्ति रूपातिरेकेण सदसोऽग्निः स्फुरत्स्वभावः॥ वा
चारम्भणमात्रो हि विकारो वह्निसंज्ञितः॥५९॥ त्रीणि रूपाणि हि देवा एवं सत्यं न चान्यथा। एतद्रूपत्रयमेव तिमिलितमग्न्यादिपदेनाभिधीयते

४८

ननु वह्नेरतिरिक्तं किंचिन्न वर्त्तत इत्यस्तीत्यर्थः॥ ननु दाहपाकादिसमर्थत्वेनानुभूयमानोऽग्न्यादिपदार्थः कथमपलप्यते इत्याशंक्य तत्र श्रुतिमाह॥ वाचारंभणमात्रमिति कारणभूतस्तत्त्वव्यतिरेकेण योऽयमग्न्यादिपदाभिधेयो विकारः स स्यानविशेषः स वाचैव केवलमारभ्यते न तु वस्तुतोऽस्तीत्यर्थः॥ पक्वानेकरोहितिरूपं तद्रूपं तेजसः सदा॥६॥ यत्तु कृतं तदपि रूपं यत्कृतं सोमसेवतम्॥ नास्ति रूपातिरेकेण सदादिसो न संशयः॥ ॥ दृश्यं साकेवलमादित्यइत्याऊरविवेकिनः॥ एवं च अश्वग्निर्यो विधुश्चसुरधुगवा॥७॥ प्राप्तेति॥ कार्यस्य कारणात्पृथक्त्वेन व्यवहारो भ्रम इत्यर्थः॥ पञ्चीकरणस्यो रोहितीरूपमित्यादिना श्रुत्यैव विस्तरेणोक्तमर्थमतिदेशेन कथयति॥ एवमिति॥ घटकुड्यादयो भावा भूतानि भुवनानि च॥ सर्वं ब्रह्मव्यतिरेकेण नास्ति ब्रह्मैव सत्सदा॥८॥ तथा येऽमी भावाः कारणभूततेजोऽबन्नव्यतिरेकेण न सन्ति॥ एवं भूतभौतिकात्मकं सर्वं जगत्कारणभूतब्रह्मव्यतिरेकेण नैवास्ति॥ सद्रूपं तदेव सर्वदा विद्यत इत्यर्थः॥९॥ ब्रह्मणः परमार्थत्वेन तत्त्वमसीति तदात्मकतया अनन्तरमुपदेक्ष्यमाणो जीवोऽपि परमार्थ इति॥ तदेकविषयोऽहंप्रत्ययः कथं सत्यभूतकार्येषु सर्वेषु देहादिषु अहं मनुष्य इति जायत इत्यत आह॥ पूर्वपूर्वभ्रमोत्पन्नवासनाया बलेन त्वा देहेन्द्रियादिसंघातेऽहंमतिर्जायते दृढम्॥१०॥ तज्जन्मभ्रमजनितवासनया स्थानी देहादावहमिति भ्रमः॥ इत्थं गतजन्मन्यपीसनादित्वाश्चानवस्थेत्यर्थः॥११॥ जन्मभ्रमरितभित्तारभ्य दग्धः सोऽमेस्लतः प्राक्तनयाश्चासामनोवाक्प्राणमांसलोहितमज्जाधातुकस्य शरीरस्य जडस्य तत्त्रयकार्यत्वेन जडत्वात्तेनैकगोचरमहंत्वस्य प्रति परमार्थतो न विषयत

४८

मितिप्रपंचितं। तत्संग्रहेण व्याकरोति॥ देहेंद्रियादयो भावा नात्मसमर्था निरूपणे॥ भौतिकत्वाविशेषात्ते भस्मदेवाप्यपाक्षितत॥ ६५॥ मृत्यैवाह
मर्थो देहादय॥ न तु निरूपणेपि [illegible] कार्यत्वात्सुवर्णमुज्ज्वलमा नैते जोबन्नलक्षणभूतत्रयंश्री॥ स्थविष्ठमध्यमसूक्ष्मैरूपत्रये
त्यर्थः॥ ६५॥ उपचयस्तावद्देहादेरन्नादिभिरुपलभ्यते। अतएव तस्य निर्माणमपि नैरेव सत्र निदर्शनमाह॥ मृद प्रसाय यथा भित्तिनि
र्मिता वै मृदंभसा॥ आप्याप्यते तथा भुक्तेनान्ने देहादयोपि च॥ ६६॥ व्याख्याताया॥ अतः॥ फलितमर्थमाह॥ अतो देहादिसंघाते ऽहं
ममेत्यादिकां मतिं। विसृज्य साक्षिचैतन्ये विद्यात्कुर्यादहंमतिं॥ ६७॥ अतो देहेंद्रियमनसां वाचारंभणमात्रत्वे तेजोबन्नप्रभूतकार्यत्वेनात्मत्व
अतस्तत्राहमित्यात्ममतिं परित्यज्य कूटस्थनित्यचिदात्मन्येव तां कुर्यादित्यर्थः॥ ६७॥ तेजोबन्नविलक्षणानींद्रियमनसी कथं तत्
कार्ये तेनेत्याह॥ दधिविलक्षणस्य सर्पिषो यथा॥ दधिकार्यत्वं तथेत्याह [illegible] दृष्टांतं दर्शयति॥ दध्नो यथा मथनेन
विलक्षणं सर्पिः परिणामः॥ एवं तेजोबन्नानामौदर्याग्निकृतपाकविशेषेण देहेंद्रियमनोरूपपरिणामविशेष इत्यर्थः॥ ६८॥
दधिसर्पिर्दृष्टांतेन देहादेर्भौतिकत्वसमर्थनप्रायुक्तं व्यतिरिक्तात्मनिष्ठायां निरपवादत्वसिद्धमित्याह॥ भौतिके देहसंघातेहं

ता॥ त्यज्य मतिमात्मनि। सर्वसाक्षिणि चिद्रूपे कुर्यान्नित्यमहंमतिं॥ ६९॥ व्याख्यातो॥ [illegible] कार्ययोः [illegible] भौतिकत्वं मनस्तत्त्वमिति [illegible]
कास्तात्कथं तस्य भौतिकत्वं इत्याशयवता पुत्रेण पृष्टः श्वेतकेतुं भगवानिदं शापयतीति॥ तत्रापि [illegible] षोडशकला इत्यादि
षोडशदिनपर्यंतमनशनेन [illegible] पक्षपादधीतवेदानामनवभासः पुनरनशनेनैनत उपचयाद्वभास इति अन्नेनोपचयदर्शी

दध्नः सर्पिः यथा जातं मंथनेन सुरर्षभ। तथा बुध्यादयो भावा भूते
भ्यश्चोद्भवंति हि॥

नादत्तमर्थं मन इति पितुराशयस्तौ संगच्छति ॥ अन्येनाप्याश्रितेच्छुकेनाधीतेतस्य भासते ॥ ततोपि बुद्धिरन्तस्य कार्यमेवन संशयः ॥ ७० ॥
बुद्धिरिति मन एवोक्तं। मनसोऽन्नमयस्याक्षिप्तस्य यत्कृतेसमर्थनं तस्यापि प्राप्तस्य यत्कृतेसमर्थनं तस्यापि प्राप्तु व्यतिरिक्तात्मनि
ष्ठा सिद्धिरेव फलमित्याह॥ अतोपि बुद्धिमन्तस्य कार्यं सत्का विविक्तधीः सर्वसाक्षिणि चिद्रूपे कुर्यान्निसमर्हमतिं॥ ७१॥ देहेन्द्रियादि
सौधगृहे मेखलादिको मतिः सत्कास्यालनि चिद्रूपे यदपीतोभवसां ॥ ७२॥ तदास्य प्रीतिदुःखादि द्वन्द्वैर्न च न बाध्यते॥ स्वात्मस्व
पसुखप्राप्तिरेव दृष्टा स्पेदृहिनथा ७३॥ अतोपि मतिमान्निर्व सत्कादेहादिगोचरां॥ सर्वसाक्षिणि चिद्रूपे साक्षात्कुर्याद्दृढां मे

५०

तिं॥ ७४॥ एकमेवाद्वितीयमित्यद्वितीयं ब्रह्म प्रतिज्ञाय तेजोबन्नलक्षणस्य भूतत्रयस्य तदुत्पन्नस्य भौतिकस्य भोग्यजातस्य
भोगायतनानां शरीराणां भोगोपकरणानामिन्द्रियाणां च तत्कार्यतयैव वाचारंभणमात्रत्वसुतियोगिकभेदाददद्वैतप्र
तिज्ञाभंगरसध्यायस्य प्रथमभागार्थव्याख्यातथा तथापि भोक्तृणां मलनानि स्वद्युनत्सतियोगिकभेदाद्द्वैतप्रति
ज्ञाभयं शतीशंकानिरसितुमुत्तरो भागः उद्दालकोहारुणिरित्यादि॥ तत्र यद्यपि भोग्यं वजोकानकल्पितत्वं च परमार्थं एव
तथापि न तत्प्रतियोगिकभेदाद्द्वैतप्रतिज्ञाहानिस्तस्य ब्रह्मस्वरूपत्वेन भेदाभावादिकं वक्ष्यते एषोणिमैतदात्म्यमिदं सर्वं त
त्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति॥ यदेतदवाङ्मनसगोचरत्वादतिसूक्ष्मं ब्रह्म आस्मिन्नारोपितत्वाद्दृश्यं सर्वं रतेनैवात्म

५०

वद्रजतमिव शुक्तिशकलेन। तदेव च ब्रह्म सकलकल्पनाधिष्ठानत्वात् सर्वस्य कल्पितस्य सत्तास्फूर्तिप्रदत्वात् तात्पर्यादेतदुक्तविधलक्षणं
ब्रह्म तदेव त्वमसि न ततो भिन्नोऽसि हे श्वेतकेतो इति॥ स्मृतौ केवलश्च सकलभोक्तृवर्गोपलक्षणमिति तामिमां श्रुतिं व्याकरोति॥ यदिदमिति। य
दिदं साक्षिणा वेद्यं तत्सर्वं ब्रह्म केवलं॥ तत्सर्वं पूर्णचैतन्यं तत्त्वमर्थे निसंशयः॥७५॥ ब्रह्म केवलमिति॥ ब्रह्मण्यारोपितत्वाद्व्यतिरेकेणाभावाद
यो यः सर्पः स रज्जुः यदिदं रजतं तच्छुक्तिशकलमिति तद्वत् बाधायां सामानाधिकरण्यं तत्त्वमर्थ इति। त्वंशब्दार्थो जीवः पुनः परमार्थतस्तदेव पू
र्णचैतन्यं ब्रह्म न पुनर्दृश्यवत्तत्र कल्पित इत्यसंशयितव्यमित्यर्थः॥७५॥ ननु त्वंशब्दः पराग्दर्थवाचकः अहंशब्दस्तु प्रत्यगर्थ इति परस्पर
प्रतिद्वन्द्वतया ह्रस्वदीर्घशब्दकौ विरुद्धार्थौ। अहं ब्रह्मास्मीति प्रतीचो ब्रह्मत्वमुक्तं श्रूयते। तदिह त्वमसीति कथं पराचो ब्रह्मत्वमुच्यत
इत्यत आह॥ त्वंशब्दार्थे य आभाति सोऽहंशब्दार्थ एव हि। योऽहंशब्दार्थ आभाति स त्वंशब्दार्थ एव हि॥७६॥ एक एव देवदत्तो यथा पुत्रेण तात
इत्युच्यते। पित्रा च पुत्र इति न तत्र तावसितत्पुत्रपदाभ्यामभिधीयमानं देवदत्तस्वरूपं भिद्यते। वक्तृभेदनिबंधनस्तु पितृपुत्रव्यवहार
भेदो न वक्तव्यनिबंधनः तथा जीवस्यैव ब्रह्मतादात्म्यं स्वयमनुभूयमानावस्थमहं ब्रह्मास्मीति व्यपदिश्यते तदेव च जीवपरैक्यं परस्मै बोध्य
मानं तत्त्वमसीति व्यपदिश्यते अतो वाक्यद्वयस्य समानार्थत्वादविरोध इत्यर्थः॥७६॥ नन्वेवं तत्त्वमस्यहं ब्रह्मास्मीत्यनयोः परस्परविरो
धो माभूत् त्वमहंशब्दाभ्यां पुनरज्ञः संसारी जीवोऽभिधीयते। ब्रह्मपदेन तत्पदेन च पुनः सर्वसाक्षी सर्वज्ञ ईश्वरस्तस्य कथं तेन सह तादा
त्म्यमित्यत आह॥ त्वमहंशब्दलक्ष्यार्थः साक्षात्प्रत्यक्षितिःपरा॥ तच्छब्दस्य च लक्ष्यार्थः सैव नात्र विचारणा॥७७॥ अयमर्थः सत्यज्ञाना

नीतानंदात्मकमिति प्रतिपादितमखंडमद्वितीयमेकरसमनाद्यनंतं परमार्थभूतं वस्तु॥ स त्वु रजस्तमोलक्षणगुणत्रयात्मिकायाः प्रकृतिरनादि
रीतिवती तत्त्वज्ञानैकनिवर्त्यतया मिथ्यैव परिकल्पितत्वादवस्तुभूता सा च द्विविधा रजस्तमसी अभिभूय विशुद्धसत्त्वा एका सा मायेत्युच्यते॥
रजस्तमोभ्यामभिभवेन मलिनसत्त्वा चापरा सा अविद्येत्युच्यते॥ तत्र मायायां सत्त्वांशे प्रतिबिंबितः स परमात्मा तां मायां वशीकृत्य सर्वज्ञः सर्वेश्व
र इत्युच्यते। अविद्यासत्त्वांशे पुनः प्रतिबिंबितः स एव परमेश्वरस्तया वशीकृतोऽस्वतंत्रः कतिपयज्ञः संसारी जीव इति॥ स एव तु परमात्मा तमः
प्रधानप्रकृत्युपाधिः सन्भूतभौतिकप्रपंचलक्षणभोग्यात्मना विवर्तते॥ तत्रैक एव परमात्मा तमःप्रधानप्रकृत्युपाधिकतया जगदुपादानं
विशुद्धसत्त्वप्रधानप्रकृत्युपाधिकतया जगतो निमित्तं भिन्ननिमित्तोपादानं सदेव सोम्येदमित्यत्र सच्छब्देनोक्तः। तत्रा हि तदैक्षतेति चेतनत्वे
न निमित्तत्वं बहु स्यामिति कार्याकारेण विवर्तमानतया उपादानत्वमिति सभिन्ननिमित्तोपादानत्वं विशदं तदिदं प्रकृतत्वात्तत्त्वमसीति वाक्ये प्र
कृतपरामर्शिना तच्छब्देनोच्यते॥ अविद्योपाधिकस्तु जीवः सकलोऽपि पुरोवर्तिनि श्वेतकेतौ निक्षिप्तमात्रं कृत्वा उद्दालकेन पित्रा त्वंशब्देनोच्यते॥
तयोश्च तत्त्वंशब्दवाच्यार्थयोर्मायाविद्योपाधिकचैतन्ययोः परस्परमत्यंतविलक्षणतया तादात्म्यविरोधात्तत्त्वंशब्दौ मायाविद्ययोर्भागपरि
त्यागेनोभयानुगतमेकं चैतन्यमात्रं लक्षयतः एवमहं ब्रह्मास्मीत्यत्रापि॥ ७७॥ ननु चिदंशे तादात्म्याविरोधेऽपि त्वमहंशब्दवाच्यार्थस्य
तत्सद्वाच्यार्थेन तादात्म्यं विरुद्धमेवेति चेत्सत्यं॥ किंतु न तेन तद्विवक्षितमित्याह॥ त्वमहंशब्दवाच्यार्थस्य देहादिकस्यानुष्ठानं तच्छब्दार्थ
तया विवक्षितं तत्त्वमसीति सा॥ ७८॥ संसारित्वस्य सर्वज्ञत्वात्मकतो नेह कुत्रा विवक्षितं सर्वथा॥ ७९॥ शब्देनाभिधीयमानस्य संसारित्वादेरवि

कार१

वक्ष्यमाणमात्रं तदर्थं कृत्वा विरुद्धांशं त्यक्त्वा वाच्यमन्तःकरणविशिष्टमविरुद्धचिदाकारं लक्षयित्वा ब्रवीतीति ॥४७॥ तदसमभिव्याहृतपदान्तरस्य समानाधिकर

द्रांथे पयविरोध एवाविवक्षाकारणमित्यर्थः ॥४७॥ त्वमहंशब्दार्थे किंचित्तमर्थं तच्छब्दोऽपि योजयति ॥ तदर्थं च त्वमर्थैक्यं विरुद्धांशं विनैव हि ॥ कारणत्वादेवा

चर्यैर्थं लक्षयित्वा ऽके वदेत् ॥८०॥ चिदाकारं पुनस्त्वस्य त्वमर्थैक्यं ब्रवीति हि ॥ तत्पदवाच्येन जगत्कारणत्वसर्वज्ञत्वादिना विरुद्धसंसारित्वादिक

त्वंपदवाच्यगतं यथा न विवक्षितं तथा त्वंपदवाच्यगतसंसारित्वादिना विरुद्धं जगत्कारणत्वसर्वज्ञत्वादिकं तत्पदवाच्यगतं न विवक्षितमित्यर्थः

त्वमर्थैक्यविरुद्धविशेषणभूतं जगत्कारणत्वसर्वज्ञत्वं विना केवलं विशेष्यभूतं चिदाकारं लक्षयित्वा तस्य त्वमर्थैक्यं ब्रवीतीत्यन्वयेन संबंध्य

एवं तत्त्वंपदार्थयोर्विरुद्धांशपरिहारे सति यो वाक्यार्थः संपद्यते तं दर्शयति ॥ तत्त्वंशब्दार्थरूपस्य चिन्मात्रस्य परात्मनः ॥ एकत्वं यत्स्वतः सिद्धं स

हि वाक्यार्थ इति स्थितः ॥८१॥ उक्तरीत्या तत्त्वंशब्दार्थरूपस्य लक्ष्यस्य चिन्मात्रं निरस्तसमस्तोपाधिकं सत्त्वं हि परमात्मा विज्ञानमानन्दं ब्रह्मेति श्रुतेः

तस्य चात्र विधपरिच्छेदराहित्येन यत् स्वाभाविकमेकत्वमभेदः सोऽत्र तत्त्वमसि वाक्येन प्रतिपाद्यते ॥ ननु जीवब्रह्मणोरन्यतरोद्देशेनान्यतरस्य

प्रागसिद्धमेकत्वं बोध्यत इत्यर्थः ॥ ननु परमार्थतो भिन्नस्यैव संसारिणो जीवस्य परस संपर्कवशेन ताम्रस्य सुवर्णत्वापत्तिवदीश्वरात्मत्व

श्रावणादास्य संभवाचादात्म्यपरत्वं किमिति वाक्यस्य नस्यादित्यत आह ॥ इतोन्यथा यो वाक्यार्थः सो वाक्यार्थो निरर्थकः ॥८२॥ एकत्वज्ञ

प्तिवाक्यं न करोति स्फुरदर्थम् ॥ इतो स्वाभाविकैकत्वलक्षणात्प्रकारान्तरेण जीवब्रह्मणोः संसर्गरूपो विशिष्टैकत्वरूपो वा यो वाक्या

र्थः स वाक्यार्थ एव न भवति वस्तुतो भिन्नयोस्तयोरन्योन्याभावस्यानाधीतत्वेन तादात्म्यानुपपत्तेरित्यर्थः ॥८३॥ ननु तादात्म्यप्रकारस्य ब्रह्मपाथ

स्वरूपभूतमेकत्वमपि तथाविधमिति। तस्य वाक्यबोध्यत्वे स्वप्रकाशभङ्ग इत्यत आह। एकत्वप्रमितिमिति॥ यदि वाक्यमेकत्वविषयां प्रमितिं न जनये
न्नहि तत्स्वरूपं यत्र्यं जातमित्यत आह। व्यावहारिकमज्ञानं बाधते विषयेयवत्॥८३॥ वाक्यं स्वजन्यया विषयैकदीरितब्रह्मात्मैक्यविषयाज्ञानो
त्थं तदज्ञानं बाधते अतो न निःप्रयोजनं तत्सार्थकं॥८३॥ ननु एकत्वप्रमितौ वाक्यव्यापारो नास्ति चेत् प्रमाणविषयत्वाभावेन रविषाणवदसत्त्वमित्य
त आह। सदा प्रमितिमेकत्वं स्वत एव न चान्यतः। अतो न प्रमितिं वाक्यं कुरुते ज्ञानबाधकं॥८४॥ स्वप्रकाशे येहि प्रमाणविषयत्वाभावे नित्यसत्त्वमुदी
रितमेकत्वं तु स्वप्रकाशचितोऽनन्यत्वात् सदा प्रकाशमानमेवेति नोक्तदोषापत्तिरतो वाक्यस्यावरणाज्ञाननिवृत्तावेवोपयोगो न स्वरूपप्रकाशन
इत्यर्थः॥८४॥ ननु ज्ञानस्याप्रमात्वे निवृत्त्यनुपपत्तेर्ब्रह्मभेदस्य च तस्यापि निवृत्तिप्रसंगाद् अतो न्यस्किंचिद्ज्ञानारब्धं वस्तु गीकर्तव्यं तथा च द्वैतापत्ति
रित्यत आह। वस्तुतो नास्ति चाज्ञानं चित्प्रकाशविरोधतः अतो वाक्यं न चाज्ञानबाधकं च निरूपणे॥८५॥ वस्तुतः परमार्थतो ज्ञानं नास्त्येव ब्रह्म
तत्स्वरूपभूतचित्प्रकाशविरोधित्वेन तस्याज्ञानस्यालोकविरोधिन स्तमस इव तत्स्वरूपलाभासंभवादतस्तत्स्वरूपे सर्वं पूर्वपूर्वभ्रमसंस्कार
वशादध्यस्तमेवाज्ञानं विषयनिवर्तत इति। विचार्यमाणे वस्तुतो वाक्यमज्ञानस्यापि बाधकं न भवतीत्येवं व्यवहारदृष्ट्यैव तस्याज्ञानबाधकत्वव्य
पदेशः॥८५॥ ननु वाक्ये नाद्वितीयब्रह्मात्मविषयीतः करणवृत्तिः स्वविषयावरणाज्ञाननिवर्तिका या जन्यते घटपटादिविषयकवृत्तिरव वृत्ति
स्यापि स्वविषयप्रकाशनसामर्थ्यं कुतो नेत्यत आह। एकत्वं यत्पुरा प्रोक्तं तत्स्वयं स्फुरितुमर्हति तान प्रमाणे न मानानि तस्मिन् कुण्ठीभवन्ति हि॥८६॥
यद्ब्रह्मात्मनःस्वाभाविकमेकत्वं प्रागुक्तं तत्स्वरूपभूतचित्प्रकाशानन्यत्वात्स्वयमेव स्वात्मनैव स्फुरितुं प्रकाशितुमर्हति न प्रमाणवशात् अत्र हेतु
माह। मानानीति हि यस्मात्कारणात्तत्स्वरूपप्रकाशनाय प्रवृत्तानि प्रमाणानि तेनैव साक्षिरूपेणावस्थितेन प्रकाश्यमानानि सन्ति स्वप्रका

श्रेन

दीपवत्तस्मिन्स्वप्रकाशे चिदात्मनि निरुद्धत्वात्कौ निभवतीति॥ ७६॥ अत एवान्यत्राप्युच्यते। न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मन इति॥ व्यवहारिकमज्ञानमपि ब्रह्मैव वस्तुतः॥ अज्ञानमिति वार्तापि तुच्छसद्भाव एव हि॥ ७७॥ यद्वाक्यजन्यया विद्यया निवर्त्यमज्ञानं तदपि वस्तुतो निरूपणे ब्रह्मैव॥ श्रुत्युपाद्यावधृतस्वरूपत्वादेरि वंतस्य च ब्रह्मलक्षणस्य ध्वस्तत्वेन तद्व्यतिरेकादित्यर्थः॥ अतश्च वस्तुनिरूपणे अज्ञानमिति व्यवहारोपि न युज्यत इत्याह॥ अज्ञानमिति॥ ७८॥ ननु व्यवहारबलादे वाज्ञानस्य सद्भावः किं न स्यादित्याशंक्य तत्राह॥ असत एव हि सद्भावो नासतः सूक्ष्मदर्शिनो॥ सद्रूपस्यैव हि वस्तुनः सद्भावो न तद्विलक्षणस्येत्यर्थः॥ ननु सन्घटः सन्पटः सत्कुड्यमिति सद्भावोनुभूयत इति चेत्तत्राह॥ सूक्ष्मदर्शिन इति॥ अधिष्ठानसत्त्वस्यारोप्यगतसत्त्वेन न तत्र प्रतिभासत इत्यर्थः॥ नन्वज्ञानीति बाधान्यथा नुपपत्त्या सदसद्विलक्षणं तदज्ञानमस्तीति तत्राह॥ सदसत्कोटिनिर्मुक्तमिस्त किंस्यार्थभासने॥ ८०॥ खलु न भासते भानं ब्रह्मवस्त्वेव केवलं॥ भानसं बंधतो भानमिति वार्तापि संगता॥ ८१॥ सदसद्वैलक्षण्यप्रतिपादनमपि तत्प्रकारनिरूपणासहत्वप्रतिपादनपरं न तस्य सद्भावपरं अतएव विधा र्थभासने हि सदसद्विलक्षणं तदित्यपि व्यवहारो नावभासते भानरूपं ब्रह्मवस्त्वेवाज्ञानविनिर्मुक्तं केवलं भासत इति अज्ञानस्य भासनं न संभवती त्यर्थः॥ ननु मा भूदज्ञानस्य स्वतो भानं भानरूपब्रह्मसंबंधवशात्कुतो न भवेदित्याशंक्याह॥ भानसंबंधन इति॥ ८२॥ संबंधिरूपसद्भावे सति संबंधसं भवः॥ सद्भावे सति संबंधिरूपं ब्रह्मैव केवलं॥ ८३॥ संबंधिरूपसद्भाव इति॥ संबंधस्य संबंधिद्वयसापेक्षत्वाद्ब्रह्मवदज्ञानस्यापि स्वरूपसद्भावो वक्तव्य मेषव्यः॥ स च सद्भावो ऽधिष्ठानब्रह्मगत एवेति तदेव सत्केवलं न ततोतिरिक्तमज्ञानमिति संबंधिद्वयाभावात्संबंधो दुर्निरूप इत्यर्थः॥ ८४॥ ननु माभूद्ब्रह्म णस्वाज्ञानस्य पारमार्थिकसद्भावः आरोपितसद्भावो विद्यत इति तेन च संबंधः किं न स्यादिति शंकते॥ अनिरूपितरूपेण सद्भावश्चेति चेन्मतं॥ वि

चारासहत्याकारेणेत्यर्थः॥ परिहरति॥ अनिरूपितरूपस्य रूपं च ब्रह्मैकेवली॥ ७१॥ ब्रह्मैकरूपं नैवान्यन्नरूपमपरस्य हि॥ अस्ति चेदपरस्यापि रूपं तर्हि सुरे
क्रमात्॥ ७२॥ रूपरूपेण रूपं च ब्रह्मरूपं भवेत्खलु॥ ब्रह्मरूपेण नान्यस्य रूपं रूपांतरेण चेत्॥ ७३॥ तर्हि स्वरूपांतररूपाद्भिन्नं वाऽभिन्नमेव वा॥ भिन्नाभिन्नं
वाभिन्नं यदि रूपाद्भिन्नं ततः॥ ७४॥ उक्तं यत्तद्रूपस्याद्भिन्नं चेद्देवतात्या उक्तदोषप्रसक्तेर्भिन्नाभिन्नं न तद्भवेत्॥ ७५॥ अविचारितरमणीयरूप
स्याधस्तस्याधिष्ठानभूते ब्रह्मण्येवैकेवली स्वरूपं नान्यत्र ध्यारोपितस्य सर्वस्याज्ञानकार्यस्य तस्मिन्नध्यस्तत्वेन स्वतो निःस्वरूपत्वादित्यर्थः॥ अस्ति चेदप
रस्यापीति॥ रूपत्व इति रूपं निरूपणार्हं स्वरूपं तद्ब्रह्मणोऽन्यस्यापि विद्यते चेत्तदपि रूपं ब्रह्मरूपमेव रूपात्मना उभयोरपि भेदाभावादित्यर्थः॥ भवेदेवं
यदि रूपमात्राभेदेन ब्रह्मणो यद्रूपं ततोऽन्येनैव रूपेणाज्ञानस्य रूपवत्त्वमिति शंकते॥ ब्रह्मेति॥ तदेतद्दूषयितुं विकल्पयति॥ तर्हीति॥ तत्किं रूपांतरेण
रूपणार्हं ब्रह्मस्वरूपाद्भिन्नमभिन्नं भिन्नाभिन्नं वाऽऽनाद्यस्त्याः॥ भिन्नं यदीति॥ विमतं न रूपं निरूपणार्हं स्वरूपाद्भिन्नत्वान्नृशृंगवदित्यभि
प्रायः॥ द्वितीयो ब्रह्मव्यतिरिक्तस्याज्ञानस्य पृथक्स्वरूपलाभो नास्तीत्याह॥ अभिन्नं चेदिति॥ तृतीयं निरस्यति॥ उक्तदोषेति॥ भेदाभेदपक्षयो
र्यौ दोषावनुक्तौ तयोरापत्तेरित्यर्थः॥ ७५॥ तथा चानिरूपितरूपेण सद्भाववर्णनीयस्य प्रतिज्ञातं तदन्यथासिद्धा वार्तामात्रमेवावशिष्यत इति
निगमयति॥ अतएव सुरश्रेष्ठ॥ अनिरूपितरूपत्वं सद्भाव इति वार्ता च वार्तैव खलु केवली॥ ७६॥ ७७॥ एवमज्ञानस्य पृथगात्मलाभाभावाद्व्यहता
रिकमज्ञानमपि ब्रह्मैव केवलं स्वतः इति पश्चान्निज्ञातं तत्सिद्धमिति निगमयति॥ तस्मादज्ञानमेवैतद्ब्रह्मैकसत्तोदिता॥ अज्ञानमप्यमेवेदं सर्वमित्यपि
भाषणी॥ ७७॥ नैव भाषणमज्ञानाभावादेवाविकीर्विना॥ तस्मादज्ञानमज्ञानकार्यं च सकलं गवा॥ ७८॥ एतद्ब्रह्मैवान्यस्मादिति मे निश्चिता मतिः॥

ऐतदात्म्यमिदं सर्वमित्याह हि परा श्रुतिः॥ ७४॥ तस्मादिति॥ अज्ञानमयमेवेदमित्यादि॥ इदं सर्वं जगदज्ञानकार्यमिति यदेतदुक्तं तदपि केवलं शब्द
एव न तस्यार्थोऽस्ति॥ अधिष्ठानपरशिवस्वरूपव्यतिरेकेणाज्ञानस्यैव दुर्निरूपत्वात्। तस्मादज्ञानं तत्कार्यं च ब्रह्मात्मकमेव नान्यदस्तीति प्रति
पादितेऽर्थे श्रुतिं योजयति॥ ऐतदात्म्यमिति॥ श्रुतेरक्षरार्थः प्रागेव निर्णीतः॥ ७५॥ ननु क्रियाकारकफलरूपस्य प्रपञ्चस्य भेदमपि श्रुतिः प्रतिपाद
यति। आत्मन आकाशः संभूतः। ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिना तत्कथं सर्वस्य ब्रह्मात्मत्वमिति तत्राह॥ साक्षादर्थस्वभावेन श्रुतिः सर्वप्र
वर्तते॥ श्रोतृचित्तविपाकेन निषण्णा विवशा श्रुतिः॥ कथं कदाचिदन्यार्थं वक्ति च ब्रह्मलक्षणम्॥ ७६॥ साध्यसाधनसंबंधकथनं फलभाषणं॥
जगद्वैचित्र्यनिर्देशो धर्माधर्मार्थभाषणं॥ १॥ वर्णाश्रमविभागोक्तिस्तत्कर्मोक्तिस्तथैव च॥ शोभनाशोभनोक्तिश्च कृतभौतिकभाषणं॥ २॥
ज्ञानिभिदनिर्देशस्तत्त्वार्थानां च भाषणं॥ आत्मनोऽन्यस्य सर्वस्य सद्भावोक्तिः सुरर्षभा॥ ३॥ मिथ्यात्वभाषणं तस्य मायासद्भावभाषणं॥ मायालोक्तिश्च
मायाया बंधरूपस्य भाषणं॥ ४॥ गुरुशिष्यकयोक्तिश्च ब्रह्मविद्याभिभाषणं॥ शास्त्राणामपि निर्देशस्तत्कर्तॄणामपि भाषणं॥ ५॥ अन्यद्विकल्पजातं यत्तदु य
क्तिश्च समासतः॥ अन्यार्थेन परब्रह्म तिरसाक्षान्न तत्परा॥ ६॥ चित्तपाकानुगुण्येन श्रोतॄणां परमा श्रुतिः॥ ऐतदात्म्यमिदं सर्वमित्येषा श्रुतिरर्थस्व
भावेन साक्षाद्विधमानमेवार्थं प्रतिपादयितुं प्रवृत्ता॥ इदंविधस्यार्थस्योपासीस्कृतचित्तैर्दुरधिगमत्वाच्चित्तपरिपाकानुसारेण भेदश्रुति
र्मायामय्यव्यवहारसिद्धं भेदमनुवदति साध्यसाधनफलादिलक्षणं जगद्वैचित्र्यं प्रतिपादयति न परमार्थत इत्यर्थः॥ सोपानक्रमेणोद्बो
धमर्मं दर्शयितुं॥ ७७॥ उपदिश्य विषण्णा पिशुनः प्रकाशिकारणः॥ ऐतदात्म्यमिदं सर्वमित्याह परमाद्वयम्॥ ७८॥ श्रोतृचित्तपरिपाकानु

सारेण पूर्वकाले मनस्तोत्रादिधर्मान्क्रमेणोपादिश्य तैश्च संस्कृतचित्तानां सिद्धितोपासनादिकमुपादिश्य तेन प्राप्तैकाग्र्यमनस्कानां मध्यमाधिकारिणा
मेव सोपानक्रमेण तदात्म्यमिदं सर्वमिति श्रुतिरद्वितीयं ब्रह्मपरत्वं गमयतीत्यर्थः ॥ शास्त्रान्ते नीमनुसंधानप्रकारमाह ॥ जगज्जीवेश्वरादिविभि स्ता
न्नविभवविना ॥ किन्त्वेकचित्सदानन्दब्रह्म ॥ तैश्च परा भ्रान्तिः ॥ यथा जगज्जीवेश्वरत्वादि सर्वं ब्रह्मैव केवलं । इति संपूर्णतात्त्ज्ञानं परमाद्वैतवेदनी ॥ १०
भोक्तृभोग्यभोगप्रदरूपं यदिदं तत्सर्वं विशुद्धं ब्रह्मैवेति स्वात्मनोपसारिस्फुरणब्रह्मस्वरूपस्वज्ञानं तदद्वैतवेदनमित्यर्थः ॥ १० ॥ इतोन्यच्च
परिज्ञानं यदज्ञानं संशयः ॥ विचारणायमेवार्थं स्वयमेव विचारणे ॥ ११ ॥ न कदाचिद्विशेषोस्ति सेतज्ज्ञानं सुदुर्लभम् ॥ ११ ॥ इतोन्यदिति ॥ इतो
स्मात्स्वस्मिन्परिज्ञानाद्यदन्यज्ज्ञानं भेदमनन्यब्रह्मात्मादिस्वविषयं तदज्ञानमेवाश्रुतिस्थ्येवमाह ॥ अथ योन्यां देवतामुपास्ते अन्योसावन्योहमस्मी
ति न स वेदेति ॥ सुदुर्लभमिति ॥ निर्विशेषब्रह्मात्मैक्यसाक्षात्कारस्य वर्णाश्रमधर्मपरितोषितपरमेश्वरप्रसादैकसमधिगम्यत्वादित्यर्थः ॥ १२ ॥
यथा यथा स्वभावेन सदा यथा यथा स्वभावेन यद्यद्भातीति सुस्फुरं ॥ तथा तथा विभात्ययमेव नान्यापरः ॥ १३ ॥ यद्यच्छब्दपदादिकं वस्तु येन
येन प्रकारेण स्वस्वभावस्थितेन भाति तेन तेन प्रकारेण तदधिष्ठानभूतचिद्रूपः शिव एव प्रकाशते । अधिष्ठानस्फुरणमेव तत्तत्सत्तादरो
प्यधर्मतयाभासत इत्यर्थः ॥ १३ ॥ एवं भानमात्रस्य शिवरूपत्वमुपपाद्य तस्यानुसंधानप्रकारमाह ॥ यथा यथा प्रथा साक्षात्प्रभवी सान्यापरा ॥
इति विभज्य विज्ञानं परमाद्वैतवेदनी ॥ १४ ॥ घटो भाति पटो भातीत्यादौ येन येन प्रकारेण विश्वभानुस्फूर्तालभ्यते सैव तद्विषयापरिहारेण

५८

साक्षात्परमेश्वरस्वरूपमस्तीति संशयविपर्यासरहितं यदनुसंधानं तत्परमाद्वैतज्ञानमिति योजना॥१४॥ अपि चैवमनुसंदधानस्य बाह्याभ्यंतरसकलक्रिया
पारः परमेश्वरभजनरूपेण संपद्यत इत्याह॥ यथा यथावभासोयं शिव एवेति पश्यति॥ तथा तथा महादेवं भजतेयं लुतत्क्षणः॥१५॥ यथा यथा
प्रत्यापुंसः स्वत एव व्यवस्थिता॥ तथा तथानुसंधानस्वभावेनैव पूजनी॥ अह्याय घटपटादिचक्षुःश्रोत्रादिभिः प्रमाणैरवभासितं तत्सर्वं व्यवहर्त्रे
वतदीयं सर्वमवभासमनुगतभानात्मकः शिव एवेति येन येन प्रकारेणानुसंधत्ते स योगी अयत्नतो यत्नव्यतिरेकेणैव तेन तेन प्रकारेण
कायानिर्वर्त्यं परमेश्वरभजनमेव करोति। न लोकव्यवहारं यथा येन प्रकारेण पुरुषस्य मतिरपि तत्र तत्र दृढत्वेन व्यवस्थिता सती चंचला भवति तेन प्र
कारेण तत्र सर्वत्र भानरूपं शिवमनुसंदधानस्तस्य मानसमेव पूजनं करोतीत्यर्थः॥ अयमर्थो गोपि भगवद्गीतायामुक्तः॥ पश्यञ्छृण्वन्स्पृशञ्जिघ्र
न्नश्नन्गच्छन्स्वपन्श्वसन्॥ प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि॥ इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्॥ ब्रह्मण्याधाय कर्माणि सं
गं त्यक्त्वा करोति यः। लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥ इति॥१६॥ एतत्सर्वं स्वसंवेदनमन्वयव्यतिरेकाभ्यामुपपादयति॥ शिवरूपतये त्यादिना
शिवरूपतया सर्वं यो वेद सहितश्च वित्॥ अशिवं वेद्य किंचित्स एव परिमोहितः॥१७॥ शिवादन्यतया किंचिदपि वेद च सो धमः॥ शिवस्यैवापचारी हि कुरुते स
पशुर्नरः॥१८॥ शिवरूपतया सर्वं यस्य भाति स्वभावतः॥ स्वेच्छाचारसमाचारस्तस्य चार्चनं चलिनः॥१९॥ यथा यथा परिस्पन्दो यथासा सा तद्दर्शनी॥ इत्थं
यत्नेन विश्रान्तः सृज्यते परमेश्वरः॥२०॥२०॥ प्रकारान्तरेणानुसंधानमाह॥ क्रीडयेति॥ क्रीडया जगदाकारानानंदमयात्मस्वैव॥ क्रीडयैवात्मना सानं
दं संसारसंवेदनी॥२१॥ इन्द्रियाकारभासा सा विषयाकारभासनी॥ क्रीडया देवता ह्यस्य स्वतः स्वचिन्मती॥ सा परमाद्वैतविज्ञानमिदं भवभयापहं॥ भव

प्रमातृत्वो [illegible] भावनारहितेति परी॥२२॥ येयमात्मदेवता सास्वाश्रितमायावशेन लीलयैव मोहमोग्यभोगमदरूपजगदाकाराजाता तथा तयैव लीलया भो
ग्यरूपेणावस्थितमात्मानमेव भोक्तृरूपेणालम्बते सुष्ठु॥ तथा हि इन्द्रियैरर्थैश्च व्यवहारसमये चक्षुरादिकरणजनितरूपादिप्रकाशेन भानेन रूपस्पर्शा
दिविषयाकारेण दयितं स्थानं [illegible] भानं क्रीडयैवात्मदेवतास्पृशति॥ एवं यदस्मद्गानं देवतैव विज्ञानमित्यादि स्पष्टी॥ भावनारहितमिति॥ भावनाजन्यसा
क्षात्काररूपमर्थतत्त्वसाक्षात्कारवदप्रमाणत्वात्तद्रहितमेव ज्ञानं पुरुषार्थसाधनमिति स्पष्टार्थः॥ उक्तं चाचार्यैः॥ भावनाजं फलं यद्यत्सर्वस्याकर्मणः फलं
न तस्या स्वितिमिति प्रपञ्चस्य सर्वसंगमर्पयेति॥२३॥ ननु ज्ञानिनो व्यवहारसमयेपि ब्रह्मात्मकत्वं भासते चेदन्येषामपि किमिति न भासत इति तत्राह॥
[illegible] ज्ञानिनः [illegible] नाव भासते॥ यद्यपि परमार्थतो मनुष्याणां न भासते॥२४॥ ननु प्रमादीनां प्रकाशमानोपि स्तूर्यप्रकाशो यथा न कै[illegible]
[illegible] प्रकाशते॥ एवं ब्रह्मप्रकाशोपि ज्ञानिनः [illegible] मनुष्यतमः ज्ञानिनो मनुष्याणां न भासत इत्यर्थः॥२४॥ ज्ञानिनोपि कथं न सति भासत इत्याशंक्याह॥
प्रसादादेव [illegible] पश्यति [illegible] देशिकालोकनान्यैव कर्मसाम्ये प्रकाशते॥२५॥ कृपया इत्यनियमेनैवेति विश्वासबुद्धेर्यन्मनसो निश्चलत्वं [illegible]
सा दादिलक्षणं [illegible] कर्मसाम्ये धर्माधर्मरूपयोः कर्मणोः रूपफलयोः फलेन साधर्म्ये यस्मिन्सति तस्य संस्कारनिचितस्य निरावरणं सत्वं देवतं प्रा
तस्यार्थः॥ उक्तं हि॥ [illegible] पश्चिमतनोः सति कर्मसाम्ये निश्शेषपापपटलच्छिद्रानिमेषात्॥ कुल्याणदेशिककटाक्षनिरीक्षणेन कारुण्यतो भवति
शांभववेदशीक्षा॥ इत्याद्युक्तप्रकारमित्यादि॥ [illegible] अकारं [illegible] श्रुतिश्च सार्धीसनानामी॥ एवमेतन्मतस्य प्रसादर्थं बद्धोऽश्विनी॥२६॥ ब्रह्मकै
लक्षणे [illegible] वाक्यार्थज्ञानेन मम बाधसिद्धं पञ्चस्तनापि सा [illegible] मालत्वं चित्कारिणी निर्विशेष [illegible] श्रुतिश्च संसारलक्षणमेतया स प्राप्य

ऽध्यक्षिनी न्यायो बहुभिः प्रकारैस्तत्तदाशंकानिरासेन बहुशो बहुधार्थं पुनः पुनरुपदिशति। तथा हि सुषुप्त्युत्क्रान्त्यवस्थासु येन रूपेण जीवः
संपद्यते तत्सद्रूपं त्वमसीति विज्ञापितः श्वेतकेतुराशंकते सुषुप्तौ सत्संपन्नाः प्रजाः सद्ब्रह्मात्मत्वं किमिति न विदुरिति। मधुकरैर्मधुत्वे
न समाहृतनानावृक्षरससमुदायवद्विवेकमन्यत्वेन सुषुप्त्यादौ प्राप्तमपि ब्रह्म न स्वयं प्रतीतीति तामाशंकां निरस्य स य एषोऽणिमैतदात्म्यमि
ति प्राक्तनमेवार्थं पुनरुपदिशति। ननु युक्तं सुषुप्त्यादौ कारणाभावादविज्ञानमुक्तिः सकृद्ब्रह्मरूपोऽहमुत्थित इति कस्मान्न जानीयादित्याशंकायां
मुक्तौ यथा जलधौ रैक्यं प्राप्ता निपतिता कृष्णाकृष्णानीत्यनः समुद्रं प्राप्तानां नदीनां स्वातन्त्र्येन समुद्रादागमने सत्युत्थानकाले पुनर्जनिः। एवं
प्राणा भयिता नीरसारिणी तद्वैलक्षण्यात्तदात्मना वस्थायो स्थिताव [illegible] मिति न ज्ञानमिति परिहारेण प्रागुक्तं वाक्यमेवोपादिष्टं। तथा सुषुप्तौ
जीवस्य कारणभावापत्तौ समुद्रवीच्यादिवन्नाशमाशंक्य यथा वृक्षस्य परश्वादिनाच्छेदे रसस्राविशाखा जीवति। एवं सुषुप्ते देहेऽपि लोहितदर्शनान्न
जीवनाश इति परिहारेण प्रागुक्त एवार्थः स्थापितः पुनः श्वेतकेतुराशंकते। कथं सूक्ष्मात् ब्रह्मणः स्थूलजगदुत्पत्तिरिति वटधानीगर्भगतसूक्ष्मरूपाद
वटस्येव जगदुत्पत्तिसंभवेन तां निराकृत्य तमेवार्थमुपादिदेश। ननु जगन्मूलकारणं ब्रह्म किमिति नोपलभ्यत इत्याशंक्य उदकप्रक्षिप्तलवणघन
स्य दर्शनस्पर्शनाभ्यामनुपलम्भेऽपि रसाल्लवणसद्भावनिश्चयवच्चक्षुरघटस्यमपि ब्रह्मकार्यलिंगादस्तीत्युक्तं ब्रह्मसाक्षात्कारे क उपाय इत्याशंक्य
गांधारदेशादारण्ये चौरैर्निक्षिप्तस्य बद्धचक्षुषः पुरुषस्य नेत्रबंधनिर्मोकगांधारोपदेशागमनवदाचार्यकृतादुपदेशाद्ब्रह्मसाक्षात्कारादविद्या
निवृत्तिः श्वेतकेतौ सापि बाह्ये केन प्रकारेण ब्रह्म संपद्यत इत्यपेक्षायां विद्वान्मनआदेर्लये सति ज्ञानदीपप्रकाशितब्रह्मण्येव संपद्यते नान्यैरविद्यादि

मो०१

क्रममपेक्षते। अविद्वांस्तु देहेतरङ्गज्ञानी स एव विद्वांस्तु यदि मरिष्यमाणोऽसमाणश्रवणसंपद्येत तर्हि विद्वानपि अविद्वानिव कि-
मिति नावर्तते सार्चिरादिमार्गयुक्तेः॥ तस्य परस्य ज्ञानिनः नास्ते न श्रुतोऽस्ति नयोस्तत्र परदेशे करणसंयोगविशेषोऽपि स्यात् व्यवहित एकान्तरत्वात्ते-
नोन्नदृश्यते। एवमन्तकाले विद्वदविदुषोः समानायामपि सत्यां परमौ सत्यब्रह्माभिसंधिः पुनर्न देहग्रहणमिति॥ अन्ते देहपात एव बुद्धिस्तत्र पुनः
शरीरमुपादत्त इति॥ एवं तर्कस्य निरासेन नवभिः पर्यायैः जलमसीति वाक्येन प्रादीरितब्रह्मलौकं सैकोपदिष्टं तादिदप्युक्तं बहुप्रकारैर्बहु-
श इति॥ अभ्यासस्य तात्पर्यलिङ्गत्वाद्बहुकृत्वोऽभ्यस्यमानो ब्रह्मलौकत्वलक्षणोऽर्थ एव श्रुतेस्तात्पर्यगम्यो नान्य इति निगमयति॥ शिव एवास्ति
नैवान्यदिति यो निश्चयः स्थिरः॥ स दास एव सिद्धान्तः पूर्वपक्षास्तथा परे॥ २७॥ ब्रह्मात्मैक्यमिति वक्तव्यमपि प्रमाणमुक्तमिति स्वानुभवसिद्ध-
त्वाद्वप्यमेव सिद्धान्त इति निरूपयति॥ अयमेवेत्यादिना॥ अयमेव हि वेदार्थो नापरः परमास्तिकाः॥ १॥ ब्रह्मापि परस्तु तत्र सत्यमेव न संश-
यः॥ २८॥ अयमेव हि सत्यार्थो नापरः परमास्तिकाः॥ विश्वासार्थं शिवस्पृष्ट्वा निर्वध्यापयथामहि॥ २९॥ अयमेव हि वेदार्थो नापरः परमा-
स्तिकाः॥ अन्यथा निकृन्तरः सर्वमूर्धा भित्त्व पतिष्यति॥ ३०॥ अयमेव हि सत्यार्थो नापरः परमास्तिकाः॥ अत्रैव संनिधिं देवो विश्वासा-
र्थं करिष्यति॥ ३१॥ अत्रैव संनिधिमिति॥ नूकेवलमहमेवमम र्थं ब्रवीमि अपितु परमेश्वरोऽपि भक्तवत्सलतयैवात्र संनिहितः सन्
दुःखेषु षड्कीविश्वासं जनयिष्यतीत्यर्थः॥ ३१॥ एवमुक्तेत्यादि सूतवाक्यं स्पष्टं॥ सूत उवाच॥ एवमुक्त्वा तु भगवान् ब्रह्मा सर्वहिते रतः॥

५६

प्रणम्य दंडवद्भूमौ भक्त्या परवशोऽभवत्॥ ३१॥ आसीन्नवसरे श्रीमान् चंद्रकरः शशिशेखरः॥ नीलकंठो विरूपाक्षः सांबः साक्षात् कृपानिधिः॥ ३२

ब्रह्मविष्णुमहेशाद्यैः रूपभेदो गुणमूर्तिभिः॥ आविर्बभूव सर्वज्ञस्तत्रैव सुरसन्निधौ॥ ३३॥ आसने विमले दिव्ये शिवो हि सुमहाद्युतिः॥ आगतस्तत्र

भगवान् आसीत् अस्मिन् यथा पुरा॥ ३४॥ गुणमूर्तिभिरिति॥ सत्त्वरजस्तमोगुणा एव मूर्तयो येषां तैस्तथोक्ताः॥ ३५॥ विष्णुर्विश्वजगत्कर्ता शिव

स्याभितो उपसंस्थितः॥ ब्रह्मा चैव महाप्रीतस्तत्पार्श्वे निहितोऽभवत्॥ ३६॥ पुष्पवृष्टिरभवत् सुनश्च पुनः पुनः॥ क्षितिं च मुनिश्रेष्ठाः सनातनैः शुभैर्वेदवचनैः स्तु

शंभुं नेमुः क्षितिमस्तिरपि भक्तिमतः कृती॥ ३७॥ उद्यमंदमरुकीबकाहल्यैः दुंदुभिपणवादिभिस्तथा॥ तालमानकुशलैस्तथा परैर्भेरिकादिभिः कौश

लधोचितं॥ ३८॥ अप्सरोभिरपि नर्तनं कृतं गायनैश्च ललितैर्मनोहरैः॥ गीतमास्तु कविभिश्च कीर्तितं स्थानमीश हरिगोचरं द्विजाः॥ ३९॥ अथ वि

स्मिताश्च सुरनायकाः केचन श्रद्धयैव विनिःसृता नर्तिताश्च सुरयुद्धसरित्कुर्धुरास्तिकाश्च पर्यस्थितकेचन॥ ४०॥ मस्तकेन मनुजा नति प्र

यान्ति भक्त्या चरणेन पाणिना दंडवत् स्तुवन्ति केचिदपि तथा केचिद्ध्वनिकरैर्हति॥ ४१॥ बंधनं नि... गर्वितामे... चमत्कृ आ

नतप्रियाः॥ कुंकुमस्रग्निकरैश्च केचन॥ ४२॥ अन्योन्यमालिंगनमाचरंति प्रियेण केचिन्नयनं च केचित्॥ धावंति वेगेन पटं विसृज्य प्रि

येण चान्यान्न पिता ददाति॥ ४३॥ विलोक्य सर्वं शिवया शिवोऽपि प्रहृष्टचित्तस्तन्निवार्य सर्वान्॥ हरिं विरिंचिं च सुरानशेषान् नतिप्रियैर्

वनिवार्य विप्राः॥ ४४॥ उवाच स तौ करुणानिधानः कृतिप्रमाणैकसुनिश्चितार्थः॥ हिताय लोकस्य सुरासुराद्यैः प्रपूजनीयश्च सदा महेशः॥ ४५

५१

स्य नमो शेति॥ परमेश्वर दृष्टिगोचरमेव तत्स्थानं तुष्पच्छ्छष्ट्या दिभिरलक्षितमिति शेषः॥ नतितिशेति॥ अत्र श्रद्धा श्रेयोजनकर्तृतया न
तन्निष्ठा पिता॥ न्यते पर्यन्ता कर्मणि निष्ठा॥४५॥ एवंदास्यमिदं सर्वं मित्यादि श्लोकस्यार्थ तया भोक्तृभोग्यभोगलक्षणस्य सर्वस्याद्वितीयब्रह्मात्मत्वे
यद्ब्रह्म लुण्डदीरितं तत्सर्वमेवेति परमेश्वरः स्वात्मन स्वावस्थिं प्रकल्पयति॥ अहं सर्वमित्यादिना॥ ईश्वर उवाच॥ अहं हि सर्वं न चाकिंचिदन्यत्स्वरू
पणायामनिरूपणाय॥ इत्थं हि वेदस्य परा हि निष्ठा मन्मात्रमेति श्रमसं च य श्चा॥४६॥ विचारदशायां तावद्रज्जुत्वे सर्पधारादिवद्धयस्तस्या
ज्ञानगत्कार्यस्य मयेव विलयान्मत्तोतिरिक्तं किंचिन्नास्ति॥ अधिष्ठानाविशेषो हि नाशे॥ कल्पितवस्तु न इति स्मार्त॥ तथा चयदिदं सर्वं न
त्सर्वं किंचिदहमेवेति बाधायां सामानाधिकरण्यमविचारदशायामध्यारोपितस्य सर्वस्याधिष्ठानादनन्यत्वाद्यमेव प्रतिभासमानं सक
ल्वस्त्वात्मक इति सोऽसर्गे सामानाधिकरण्यं॥ इत्थं संध्येयमालोक्य श्रवणाद्वेदस्यापि पर्यमेव तात्पर्यगम्योऽयं इत्याह इत्थं हीति॥४६॥ सर्वाथ
स्तो सुउपरिष्टा दितिय सु न कुमार नारदसंवादे भूमविद्यायामाम्नायते॥ अत्र प्रसंगात्तदर्थमाह॥ अहं सदाद्येति॥ अहं सदाद्यश्च तथा
ह्लसर्वं विहीनस्तादृत्मेव पश्यत॥ अन्वसव्ये तरस्मा स्तिकास्तथा त्वहं सैवेत्तरो नराला॥४७॥ परोक्षरूपेण सुसंस्थितोहं तथापरोक्षेण
सुसंस्थितोहं॥ अनात्मरूपेण सुसंस्थितोहं तथात्मरूपेण सुसंस्थितोहं॥४८॥ जैवेन० तत्पर० अज्ञान०॥४९॥ संसार० कैवल्य०
शिष्यादि० गुर्वादि०५० वेदादि० स्मृत्यादि० पुराण० कल्पादि०५१ प्रमातृ० प्रमाण० प्रमेय० मिति०५२ चिति० कर्तृ० क्रिया० त्वहेतु०५३

५१

फल० मोक्ष० भोग० भोग्य० ५४ पुण्य० पाप० सुख० दुःख० ५५ क्रमभेदेन० विष्णु० ब्रह्म० देव० ५६ मर्त्य० तिर्यक्० कृमि० कीट० ५७ कल्प०
स्मृ० लता० तृण० ५८ काल० घट० पट० कुड्यादिभेदेन० ५९ अन्न० पान० वन० गिरि० ६० नदी० नद० समुद्र० तट० ६१ तडाग०
अप्० नक्षत्र० ग्रह० ६२ मेघ० विद्युत्० यक्ष० रक्ष० ६३ गन्धर्व० सिद्ध० भूत० लोक० ६४ देश० ग्राम० गेह० मठ० ६५ कूप० आकार० पुर०
पुरी० ६६ व्योमादि० शब्दादि० शरीर० प्राण० ६७ श्रोत्रादि० पादादि० मन० बुद्धि० ६८ अहं० चित्त० संघात० जन्मादि० ६९ अहंप्र
भेदेनेति अहंकारप्रभेदेनेत्यर्थः॥ जाग्रत्० स्वप्न० सुषुप्ति० तुर्य० ७० दृश्य० द्रष्टृ० साक्षिस्वरूपेण० सर्वस्वरूपेण सुसंस्थितो हि॥ ७१॥ अस्ति
नास्तिवचनेन भाषितौ सातिशयं प्रतिभाषितौ यथा॥ भानहीनपरिभाषितौ च मे स्वरूपमेव न न विस्मराम्यहं क्वचित्॥ ७२॥ शब्दगोचरतया स्थितोऽस्मि
ग दा शब्दगोचरविहीनरूपतः॥ या स्थितिस्तदहमेकमीरितं प्रत्ययेपि भाति रवमेव हि॥ ७३॥ निःस्पृहं परिबुद्धकलौ यस्य निस्सामिति वित्तिवा कुह
तेश॥ तस्य सत्यसुखबोधपूर्णता पूर्णमेव मम नास्ति संशयः॥ ७४॥ अस्ति नास्तीति सत्यासत्याभ्यां भावाभावाभ्यां च यदुपन्यस्येत तत्सर्वं कथं
स्वरूपमित्यर्थः॥ शब्दगोचरतयेति॥ शब्देन यद्विषयीकृतं यच्च शब्दो विषयीकर्तुं न शक्नोति तत्सर्वमहमेवाहमर्थं बुद्धिर्न शक्नोतीति॥
प्रत्ययेपीति॥ वाक्छक्तेरिति शक्तेर्वा बधामित्यर्थः॥ ७४॥ यत्स्वरूपमहमात्मना तथा यत्स्वरूपमिदमात्मनैव च॥ भाति तत्र मम चित्सुखस्वरू
भाति नान्यदिति निश्चयो मम॥ ७५॥ अहमात्मनेति॥ यस्य चिन्मात्रपरमात्मवस्य स्वरूपमहमात्मना अहंकारास्पदेन प्रत्यक्रूपेण तथा इदमा
त्मना इदंकारास्पदेन भाग्यरूपेण भाति॥ तद्विना भेदमेव मदीयस्वरूपं नान्यदित्यर्थः॥ ७५॥ यस्मान्मदीयो निश्चय एवंरूपस्तस्मात्सार्वात्म्य

प्रतिपादितः। अक्षालितस्तदूर्ध्वमितिपादिको ब्रह्माचोभावापि सत्यवादिनो विनितानिगमयन्तौ मयार्चितौ। अहं समस्तं मम रूपमपश्यन्न किंचिदस्तीति सु
निश्चयः ५२ कृतः। श्रीमयाशुद्धवेदीतः तद्वोत्रिरंजिसापितामहेनापिंचसत्यमीरितं। ७३। मयाचोतौ अत्र संशयमतिर्विनश्यति ज्ञः एवपस्माय्य
दर्शनात्। अत्र निश्चयमतिः सत्वंच्यो कृष्णरूपभवपाशबंधनात्। ७४। सूतउवाच। एवमुक्त्वा महादेवः स्वीबिंदुसंसारमोचकः श्रीसमालिंग्यम
हाविष्णुं ब्रह्माणमपिसादरीं। ७५। विलोक्य देवानखिलान्विष्णुर्देवेषु वत्सलः। भजमन्यान्सुरश्रेष्ठा युष्माकमिति चाब्रवीत्। ७६। देवाश्च देवदेवे
शैः प्रसन्नकरुणानिधिः। पूजयामास सुरान्कुंदा सत्रपुष्पफलादिभिः। ७७। विष्णुर्विश्वजगत्कर्ता विश्वेशांघ्रिसरोरुहं। स्वमूर्ध्नि कमला
निक्षिप्य पुनः परवशोभवत्। ७८। पितामहोपि कमलां शिवपादौ बुद्धधी। स्वमूर्ध्नि ... निक्षिप्य तथा परवशोभवत्। ७९। आदि

५८

देवो महादेवः स्वीबिंदुसंसारमोचकः। आनंतं परमं भावमैश्वर्यं संदर्शयन्। ८०। शांकरतां महादेवीं करुणासागरा परा। चकार परमं श्री
सा समालोक्य ... मैरेश्वरी। ८१। विष्णुर्ब्रह्मा सुराः सर्वे तत्र सन्निहिता जनाः। सर्वे संतोषतस्तत्र नृत्यंति स्म यथाबलं। ८२। देवदेवो मह
देवो महानंदविग्रहः। ८३। विलोक्य सर्वं स्वकृतीः स्वैः प्रीतात्तितोभवत्। ८४। विष्णुर्ब्रह्माणमालिंग्य विलोक्य सकलान्सुरान्।
अवरुह्य स पुनश्चारुह्यैव लोकवरं। प्रसन्नः पप्रयाणसाधं वैकुंठमम मन्त्रतुः। ८७। ब्रह्मापि विस्मयापन्नो विलोक्य सक
लान्सुरान्। अवरुह्य स पुनश्चारुह्यैव लोकवरं। ८८। परं भावमिति। परशिवस्य निरतिशयपरमानंदविषयः परमो भावः सत्

प्रदर्शयन्नभिनयार्थं स्तुतिं कृतवान्॥ तस्य च भावस्य स्वरूपनिरूपणं शिवमाहात्म्यखंडस्य तृतीयेऽध्याये विस्तरेण कृतं अवक्र॥
सान्निति॥ एवं परमेश्वरप्राप्तौ हितमित्युक्तो॥ शिवभक्त्या परया एकस्मिन् ...वशात् यस्य कस्य ... रूपस्थस्य शोषकं नरो हेतिस्त तत्ववाक्य
॥७॥ छांदोग्ये सप्तमेऽध्याये भगवान्सनत्कुमारेण नारदायोपदिष्टा तां संक्षिप्य ... आत्मविद्याव्यतिरिक्तानां विद्यानां स्वरूपज्ञान नि
वर्तकत्वाभावेन अस्मत्कृतार्थता तदर्थधारणानिमित्तं शोकं तरत्वमेवेति यदाम्नातं ऋग्वेदं भगवोऽध्येमीत्यादिना तत्संगृह्णाति॥
ब्रह्मोवाच॥ विद्यास्सर्वा न्यूनास्तावत्संसारस्य प्रवर्तिकाः॥ आत्मविद्या तु संसारतमसः प्रतिघातिनी॥८॥ सर्वशब्देन ऋग्वेदो नाम ब्रह्मे
रूपास्त्वाइ एव माम्नातं नामवागादिलिङ्गोपास्तीनां संग्रहः तासामपि यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवतीत्येवं तत्तत्फलश्रवणादै
हिकामुष्मिकसांसारिकफलसाधनत्वावगमात् उपनिषद्व्यतिरिक्तवेदानां च सांसारिकफलविषयत्वं भगवताप्युक्तं त्रैगुण्यविषया वेदा
निस्त्रैगुण्यो भवार्जुनेति॥८॥ श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति यदाम्नातं तस्यार्थमाह॥ आत्मविद्याविहीनस्य
वो कसागरस्य हि॥ मुक्तिरेवास्य निश्चयस्य नास्ति संशयकारणी॥९॥ आत्मविद्येति॥ संसारतमस इति संसारस्य निदानभूतमज्ञानाख्यं
यत्तमस्तस्येत्यर्थः॥ नच विद्यान्तराण्यपि संसारनिवर्तकानि कुतो नेत्यत आह॥ आत्मविद्येति॥ स्वस्वरूपाज्ञानं हि संसारहेतुः नह्यनात्मवि
ज्ञेयपाशेन नरा निवर्तते ऽतः आत्मविद्यारहितस्य संसार एव सर्वदेत्यर्थः॥ अत एव सकलविद्यानिष्णातस्याप्यनात्मविदो

नारदस्य वाक्यमेवमाम्नातं। सोऽहं भगवन्शोचामि तं मा भगवाञ्छोकस्य पारं तारयत्विति मुक्तिरेवेति॥ अनात्मज्ञानिनस्तु तथात्मज्ञानेन तदा
वरणाविद्यानिवृत्तौ निरुपादानस्य शोकस्यासंभवान्मुक्तिरेव सकलसंशयो नास्तीत्यर्थः॥ १०॥ श्रुतौ नामादिप्राणान्तानि तत्त्वानि उक्त्वा रोचनस्याप
कानिबुद्ध्यपरतत्त्वावतारणोपायत्वेन सोपानक्रमेणोपदिश्य भूमा त्वेव विजिज्ञासितव्य इत्यनवच्छिन्नसुखरूपस्य सर्वव्यापकस्यात्मनो ज्ञातव्यत्वं
प्रतिज्ञाय यत्र नान्यत्पश्यतीत्यादिना भूमवस्तुलक्षणमाम्नातं तत्संगृह्णाति॥ यत्रान्यदित्यादिना॥ यत्रान्यत्पश्यति प्राणी शृणोत्यन्यत्तथैव च।
अन्यज्जानाति वाल्पं तद्यदल्पं मर्त्यमेव तत्॥ ११॥ यत्र पश्यति नान्यच्च न शृणोत्यन्यदात्मिकः। अन्यच्च न विजानाति स भूमा सकरपुंगव॥ १२॥
भूमवस्तुप्रतियोगित्वेन यदल्पं तस्य लक्षणमाम्नातं॥ अथ यत्रान्यत्पश्यतीति तत्स्मृतिपठितो श्लोकद्वयीय प्रथममन्त्रप्रतिपाद्यत इति द्रष्टव्यं। तद
यमर्थः यत्र खलु वस्तुनि प्रमातृप्रमाणप्रमेयादिभेदव्यवहारस्तदल्पं परिच्छिन्नमत एव मर्त्यं नश्वरं। इदं त्रिपुटीस्वरूपारोपो यस्मिन्वस्तु
नि नास्ति सोऽनवच्छिन्नो भूमशब्दाभिधेय आत्मेति॥ १३॥ यो वै भूमा तत्सुखमिति श्रुतिवाक्यस्यार्थमाह॥ यो वा इति॥ यो वै भूमा सुखं तद्वितं हि केव
लमुक्तानां नाल्पे चास्ति सुखं तस्मान्महाद्वैतपरो भवेत्॥ १३॥ महाद्वैतपरस्यास्य न नाशो जन्म नैव वा। नैव गत्यागती नान्यद्बन्धनं न विमोच
नं॥ १४॥ अत्रैव लीयते सम्यक् सर्वमात्मतया स्वतः॥ यदपरिच्छिन्नमात्मवस्तु तदेव हि सुखं निरतिशयात्मकं अपरिच्छिन्ने सुखं नैवास्ति परिच्छेद
कपञ्चकृतभयादेरवश्यंभावात् द्वितीयाद्वै भयं भवतीति श्रुत्याम्नातं॥ अतोऽनवच्छिन्नसुखं लौकिकभ्रमाल्पनिषेध्यजन्मनाशबन्धमोक्षादि
स्वरूपाल्पनिषेधेन संपादनीयमिति निगमयति॥ तस्मादिति॥ महाद्वैतपरस्य स्यादिदमेवापरिच्छिन्नं सुखं॥ १५॥

सकलपरिच्छेदव्यवहारो नैवास्ति॥ किंतु तत्सर्वं भेदव्यवहारं अस्मिन्ब्रह्मवस्तुनि याथात्म्येन ज्ञायमाने तत्स्वरूपतयैव सम्प्रलीयते॥ न पुनरुत्तिष्ठ-
ति॥ न च दृष्टांतमात्रा॥ घृतेति॥ घृतकाठिन्यवत् स्वप्नप्रपंचप्रतिभासवत्॥ ७५॥ सर्वमेतदतिशोभनं परं केवलं करुणयैव भाषितं देवदेव
चरणप्रसादतो नेतरत्किंचित्कथनीयमस्ति वः॥ ७६॥ इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञवैभवखंडस्योपरिभागे ब्रह्मगीतासूप-
निषत्सु ब्रह्मविद्यायां पंचमोऽध्यायः॥ ५॥ ननु घृतमग्निसंयोगात् काठिन्येन संयोगेन तत्काठिन्यं विलीयते॥ एवं ब्रह्मापि स्वगोचरज्ञा-
नात्प्राग्वस्तुतः प्रपंचात्मकमासीत्॥ पश्चात्तु निर्विशेषमिति विकारत्वापादनेन सर्वस्य आदिदृष्टांतस्य पुनर्दर्शितं तस्मान्न॥ स्वप्नेति॥ अपरिच्छि-
न्ने निर्विकारे ब्रह्मवस्तुनि स्वप्नप्रपंचप्रतिभासवदेव सर्वजगत्प्रतिभासः [illegible] प्रतिभासैकशरीरं तन्मस्तु श्रेयो विरक्तिभावतीत्यर्थः॥
इति श्रीमत्काशीविलासक्रियाशक्तीशसेविनाश्रीमत्त्र्यंबकपादाब्जसेवापरायणेनोपनिषन्मार्गप्रवर्तकेन माधवाचार्येण विरचिता-
यां सूतसंहितातात्पर्यदीपिकायां यज्ञवैभवखंडस्योपरिभागे ब्रह्मगीतासूपनिषत्सु व्याख्यायां पंचमोऽध्यायः॥ ५॥ श्रीरामराम॥
ॐ नमो भगवते वासुदेवाय॥ एवं दिग्देशकालाद्यनवच्छिन्नमद्वितीयं सच्चित्सुखात्मकं ब्रह्मलक्षणेनोपदिष्टं॥ तत्र मंदबुद्धिभिः प्राग-
वस्थानापन्नांशरूपत इति हृत्पुंडरीकमध्ये सत्यकामत्वादिगुणविशिष्टेन तस्यैव ब्रह्मण उपासनं ब्रह्मचर्यादिसाधनसंपन्नस्य

तुमुक्षोरुपदिशन्नाह यदिदमस्मिन्ब्रह्मपुर इत्यादिका श्रुतिस्तामत्र पद्यरूपेण संगृह्णाति॥ अस्मिन्ब्रह्मपुर इत्यादिना
श्लोकेन॥ अस्मिन्ब्रह्मपुरे वेश्म दहरं यदिदं पुरा। पुण्डरीकं तु तन्मध्ये आकाशो दहरोऽस्ति तत्॥१॥ स शिवः सच्चिदानन्दः
सोऽन्वेष्टव्यो मुमुक्षुभिः। स विजिज्ञासितव्यश्च विनाशंको यमास्तिकाः॥ ब्राह्मणः पुरं ब्रह्मपुरमिति तदुपलब्धिस्थानं विद्या
धिकारि शरीरमुच्यते॥ उक्तं हि॥ उपलब्ध्यधिष्ठानं ब्रह्मणो देह इष्यते। तेनासाधारणत्वेन देहो ब्रह्मपुरं भवेदिति॥ अस्मिंश्च
विद्याधिकारिणि देहे यदिदं दहरमल्पपरिमाणं हृत्पुण्डरीकं तेनावच्छेदात्सर्वगतोऽपि दहरोऽल्पपरिमाणोऽयमाकाशः। अस्या
तन्मध्ये जिज्ञास्यत्वेनोपदिष्टः स सच्चिदानन्दात्मकः परशिव एव। आकाशशब्दो ह्यासमन्तात्काशत इति व्युत्पत्त्या स्वप्रकाशे
ब्रह्मणि मुख्यः। अत एवात्राम्नायते। आकाशो वै नामरूपयोर्निर्वहितेति। तत्र भगवान्बादरायणोऽप्याकाशशब्दस्य ब्र
ह्मपरत्वं सूचयामास। आकाशस्तल्लिङ्गादिति॥ अयमेवाकाशाख्यः परशिवो मुमुक्षुभिः शमदमादिसाधनकला
पैरन्वेषणीयः। श्रवणमननादिसाधनजातेन ज्ञानेन ज्ञातव्यश्च। एवं वदन्ती श्रुतिस्तस्मिन्यदन्तरिति तच्छब्दस्य

६०

व्यवहितपुंडरीकपरामर्शकत्वं व्याख्यातं भवति। दहराकाशपरामर्शे हि तन्मध्ये व्यवस्थितत्वेन वक्ष्यमाणं द्यावापृथिव्यादिकमेवो
पास्यस्यात्र प्रायुक्तं॥ अथ य इहात्मानमनुविद्य व्रजंत्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवतीत्यात्मोपास्ते ४॥
व फलवत्त्वं गमयत्यात्मानं त्वेवं परिच्छिन्नमेव ब्रह्मोपासनीयं नेत्याह॥ विनाशं कोचमिति॥ हृत्पुंडरीकोपाधिकृतपरिच्छेदं विहाय॥
स्वाभाविकानवच्छिन्नरूपेणोपासनीयमित्यर्थः॥४॥ ननु माभूदौपाधिकसंकोचश्चिद्रूपस्यात्मनश्चेत्यादिदेहेतुस्वाभाविक
एव संकोचो दृश्यत इत्यत आह॥ स्वाभिव्यंजकेति॥ स्वाभिव्यंजकसंकोचात्संकोचप्रतिभासनं न स्वरूपेण चिद्रूपश्च सर्वथा
पी सदा खलु॥ ३॥ स्वस्यात्मनश्च स्वप्रकाश चिद्रूपस्याप्यावरणाज्ञानापनयनद्वारा यदभिव्यंजकमंतःकरणादि तत्परिच्छे
दवत्त्वेन हि चिदात्मनि परिच्छेदप्रतिभासो रक्तस्फटिक इतिवन्न स्वाभाविक इत्यर्थः॥ कुत इत्यत आह॥ चिदिति॥ सद
सर्वदा उत्पत्तिस्थित्यादिकाले सर्वस्यापि प्रपंचस्याध्यस्तस्य चिल्लक्षणं ब्रह्मरूपं स्वरूपं अध्यस्तस्याधिष्ठानाद्व्यतिरि
क्तत्वात्॥ एतेन कालवस्तुकृतोपरिच्छेदो निरस्तो॥३॥ देशकृतमपि निरस्यति॥ ज्ञातरूपेणेति॥ ज्ञातरूपेण चाज्ञात
स्वरूपेण च साक्षिणा॥ सर्वं भाति तदा भाति ततस्तद्व्यापि सर्वदा॥४॥ प्रतिभासमानमपि सर्वं जगदज्ञानरूपेण

ज्ञानविषयीकृतत्वाकारेण तयाऽज्ञातरूपेण ज्ञानविषयीकृतत्वाकारेण च साक्षिचिन्मात्रस्यात्मनो भाति। अतश्चिदाकाशव्यति
रेकः क्वापि नास्तीति देशकृतपरिच्छेदोऽपि न विद्यत इत्यर्थः। एतदेवाह सर्वस्पृगिति। सर्वं वस्तु ज्ञाततयाऽज्ञाततया वा साक्षिचैतन्यस्य
विषय एवेति तदा भातीति तत्तु चिदात्मकं ब्रह्म आसमंतात् सर्वदा स्वयमेव भाति। जडप्रपंचवन्नान्यप्रकाशमपेक्षते। ननु जगदपि
स्वत एव किं न भायादित्याह।। स्वयमिति। स्वयं स्फुरितुं न शक्यं हि जडात्मकमिदं जगत्।। चित्संबंधबलेनैव खलु भाति न चान्यथा।। ५।।
जडात्मकमिति। हेतुगर्भं विशेषणं।। एवं परशिवस्य प्रतिपादितं व्यापित्वं निगमयति।। अत इति। अतोऽवभास्यं सकलं व्याप्य तस्मि
[?]शिवः। स्वतो व्यापी न चाव्यापी संकोचस्यान्यसंगमात्।। ६।। दृश्यमज्ञानतत्कार्यलक्षणं सर्वं जगद्व्याप्य वर्तमानः स्वभावत एव
व्यापी परिच्छेदस्तु तस्यौपाधिककरणादुपाधिसंपर्कविरहादिति सिद्धं।। ६।। एवमुपपादितेऽर्थे यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय
आकाश इत्यादिकां श्रुतिं योजयति।। यावान्वा इत्यादिना।। यावान्वा अयमाकाशस्तावानाकाश आंतरः।। तावाना
काश इति प्रसिद्धभूताकाशसाम्येन सर्वगतत्वप्रतिपादनपरं न तु तत्परिमाणत्वं ब्रह्मणस्तस्या
काशादिसर्वजगद्व्यापकत्वादत एवाम्नायते।। येनावृतं खं च दिवं मही[?] चेति।। एतदेव

सर्वव्यापित्वमुपपादयति ॥ द्यावापृथिवीत्यादिना ॥ द्यावापृथिवी उभे अस्मिन्नंतरेव समाहिते ॥७॥ उभावग्निश्च वायु
श्च सूर्याचंद्रमसावुभौ ॥ नक्षत्राणि च विद्युच्च यच्चास्ति येन भासते ॥८॥ यच्च नास्ति तथा भाति सर्वं तस्मिन् समाहि
तं ॥ अतः सर्वाश्रयः सोऽयं सर्वव्यापी स्वभावतः ॥९॥ अनेन चोभयस्मिन् द्यावापृथिवी अंतरेव समाहिते त्यादिकाय
श्रुत्यस्य हास्तिवचने सर्वमेताश्रुतिर्व्याख्याता भवति ॥९॥ नन्वेवमीश्वरः सर्वव्यापी भवतु जीवस्य तथा भावो कि
मायातमित्याशंक्याह ॥ एष इति ॥ एष आत्मा परो व्यापी पाप्मभिः सकलैः सदा । असौ चापहतः साक्षी विमृ
त्युर्विज्वरः सुराः ॥१०॥ विशोको विजिघत्सो विपासः सत्यादिलक्षणः ॥ सत्यकामस्तथा सत्यसंकल्पश्च सु
रर्षभाः ॥११॥ एष एवेश्वर आत्मा सर्वप्रत्ययसाक्षी ततो नातिरिक्तो जीवो नामास्ति ॥ नन्वयं सो धर्माधर्माधा
यभूतोऽन्योऽपि विद्यते तत्राह ॥ पाप्मभिरिति ॥ पापग्रहणं संसारफलहेतोः पुण्यस्याप्युपलक्षणं ॥ पुण्यपाप
योरंतःकरणधर्मत्वाच्च हि विलक्षणस्तत्साक्षी चिदात्मा ताभ्यां न स्पृश्यत इत्यर्थः ॥ एवं पुण्यपापसंस्पर्शविरहात्त
त्कार्यं मृत्युजरादिकं सर्वविकारजातं तस्य साक्षिणो नास्तीत्याह ॥ विमृत्युरित्यादिना ॥ सत्यकामः सत्यसं
कल्प इत्युपास्यगुणाकथनं ॥ स एतावनापहतपाप्मा विजर इत्यादि सत्यसंकल्प इत्येवमेताश्रुतिः संग्रही
ता ॥१२॥ एवं निर्गुणस्य सगुणस्य वा ब्रह्मणो यज्ज्ञानं तस्यैवाक्षय्यफलहेतुत्वं न त्वग्निहोत्रादिकर्मण इत्यस्या
र्थस्य प्रतिपादकं तद्यथेह कर्मजितो लोकः क्षीयत इत्यादिश्रुतिवाक्यं संगृह्णाति यथेति ॥ यथा कर्मजितो लोकाः
क्षीयंते भुवि सत्तमः ॥ तथा पुण्यजितो लोकाः क्षीयंते हि परत्र च ॥१२॥ क्लृप्तं तस्यानित्यत्वं व्याप्तिनियमादिति भा
वः ॥१२॥ तद्य इहात्मानमनुविद्य व्रजंतीति वाक्यस्यार्थमाह ॥ ये विदित्वेति ॥ ये विदित्वा परात्मानं व्रजंति सकलाः क्रियाः ॥

३ कै२ दि

तेषां सर्वेषु लोकेषु कामचारो नु नैव विद्यते ॥१३॥ अविदित्वा अज्ञात्वेत्यर्थः ॥१३॥ अथ य इहात्मानमनुविद्येति वाक्यस्यार्थमाह ॥ ये विदि
त्वेति ॥ ये विदित्वा परमात्मानं व्रजंति विश्रियाः स्थिताः ॥ तेषां सर्वेषु लोकेषु कामचारस्तु विद्यते ॥१४॥ ये त्विदानीं तल्लक्षणमात्मानं बुद्ध्या
स्थितास्ते अग्निहोत्रादिकाः क्रियाः व्रजंति त्यजंतीत्यर्थः तत्त्वमतः करणस्य विविक्तत्वात् ॥ आत्मविद्यायाः फलमाह ॥ तेषामिति ॥
सर्वेषु लोकेष्विति ॥ ये च लोकाः कामविशेषाश्च स यदि पितृलोककामो भवतीत्यादिश्रुतौ प्रपंचितास्तेषु सर्वेषु विदुषः कामचारो भवति ॥
हृन्मध्ये व स्थितस्य दहरब्रह्मणः सत्यकामादिगुणैरुपास्यमानस्य निरतिशयानंदरूपतया सर्वकामनातदेकदेशत्वादित्यर्थः ॥१४॥
ननु सुषुप्तौ तथाविधं ब्रह्म लभ्यते ॥ सता सोम्य तदा संपन्नो भवतीति श्रुतेः ॥ तथा च विदुष इव स्वस्यापि सर्वकामावाप्तिः किन्न
स्यादित्याशंक्य सदृष्टांतमाह ॥ यथेति ॥ यथा हिरण्यनिहितं क्षेत्रज्ञानविवर्जिताः उपर्युपरि गच्छंतो न विंदेयुः प्रजा इमाः ॥१५॥
तथा सुषुप्तौ गच्छंतो ब्रह्मलोकं स्वयंप्रभं ॥ न विंदंति महामोहाद्दृढमोहस्य वैभवं ॥१६॥ ब्रह्मलोकमिति ॥ लोक्यत इति लो
कः ब्रह्मैव लोको ब्रह्मलोकः सुषुप्तावस्थायां स्वप्रकाशं ब्रह्म सर्वप्राणिभिः प्राप्तमप्यविद्यावशादप्राप्तमेव भवति निक्षेपस्था
नमजानतः पुरुषस्य निधिर्वदित्यर्थः ॥ अनेन च यथा हिरण्यनिधिमिति श्रुत्यर्थः संगृहीतः ॥१६॥ हृदयशब्दनिर्वचना
दपि सर्वगतस्य ब्रह्मणो हृन्मध्येऽवस्थानं श्रुत्या प्रदर्शितं ॥ स एष आत्मा हृदीत्यादिना तत्संगच्छति ॥ अयं हृदि स्थित इति ॥
अयं हृदि स्थितः साक्षी सर्वेषामविशेषतः ॥ तेनायं हृदयं प्रोक्तं शिवः संसारमोचकः ॥१७॥ तस्य हृन्मध्यावस्थितस्य ब्रह्मणो ज्ञा
नस्य अहरहर्वा एवंवित्स्वर्गमिति श्रुतिप्रतिपादितं फलमाह ॥ य एवमिति ॥ य एवं वेद स स्वर्गं लोकमेति न संशयः ॥ अने
न हार्दब्रह्मवेदनेन स्वर्गलोकं लोक्यमानं दुःखासंस्पृष्टं परानंदरूपं ब्रह्म प्राप्नोतीत्यर्थः ॥ अथ य एष संप्रसाद इत्यादिश्रुत्या
यस्तद्ब्रह्मप्राप्तिप्रकारो दर्शितस्तमभिधत्ते ॥ अस्मादिति ॥ अस्माच्छरीरादुत्थाय सुषुप्तो यः स्वरूपभाक् ॥१८॥ परं ज्यो
तिः स्वरूपेण शिवं संपद्यते सुरः ॥ अभिनिष्पद्यते स्वेन रूपेणेव स्वभावतः ॥१९॥ स्थूलसूक्ष्मादिशरीराभिमानं प

६२

६२

त्वा४

रिस्यज्यस्तु सुषुप्त्यवस्थायां जाग्रत्स्वप्नविषयोपभोगकृतकालुष्यराहित्येन प्रसन्नो यस्मिन्मात्ररूपः साक्षी हार्दं ब्रह्म तद्विषयया अ-
अज्ञानलक्षणं कारणशरीरमपि विहाय विकारजातासुरं तदसंस्पृष्टं ज्योतिःस्वरूपं केवलचैतन्यप्रकाशात्मकं परशिवस्वरूपं सं-
पद्य स्वात्मतया ज्ञात्वा भविष्यादुक्तं परिच्छेदं विहाय स्वकीयेनैव रूपेणाभिनिष्पद्यते प्राप्नोतीति॥१९॥ शा[illegible]श्रेयं कंठगतचामी-
करन्यायेन प्राप्तप्राप्तिरूपं ज्ञानमात्रसाध्यान्न तु यामाज्ञामांतरप्राप्तिवत्कर्मसाध्येति। पूर्वभागस्यार्थस्त्रिंशोध्याये प्रतिपादि-
तमत्रानुसंधेयं॥ एष आत्मेति होवाचेति वाक्यस्यार्थमाह। एष आत्मेति। एष आत्मा न चैवान्यः सत्यमेव मयोदितं॥ एतदेवामृ-
तं साक्षादभयं ब्रह्म हे सुराः॥२०॥ य एवमभिनिष्पद्यते। एष एवात्मा नान्यः॥ इतोतिरिक्तस्य देहादिविशिष्टस्य सोपाधिकत्वेन
नात्मत्वादित्यर्थः॥ एतदमृतमिति श्रुतिं संगृह्णाति। एतदेवेति। एतदेवापरिच्छिन्नमात्मवस्तु अमृतमविनाशि यो वै भूमा तदमृ-
तमिति श्रुतेः॥ अत एवाभयं भयहेतोर्द्वितीयस्याभावात्। अत एवाभयत्वादेतदेव ब्रह्म अभयं वै जनक प्राप्तोसि अभयं हि ब्र-
ह्मेत्यादिश्रुतेः॥२०॥ अथ य आत्मा स सेतुरित्याद्यनुपतापी भवतीत्येवं मंत्रश्रुतिः संगृह्यते। य आत्मेत्यादिना। य आत्मा दहरा-
काशः स सेतुर्विधृतिः सुराः॥ असंभेदाय लोकानामेषामेतैर्महेश्वरः॥२१॥ स सेतुर्विधृतिरिति। सेतुरिति सेतुरिव सेतुर्मर्या-
दाकृतः वर्णाश्रमादिभेदेन क्रियाकारकफलरूपेण प्रतिनियतप्रपंचस्य विधारणमिति चेत्याह। असंभेदायेति। एवंभूतादि-
लोकानां कर्तृकर्मफलाश्रयाणामसंभेदाय अविदारणाय विनाशायेत्यर्थः॥२१॥ सेतुर्विशेष्यते। अहोरात्र इत्यादिना॥ अहोरात्रे-
नेतरत्तौ न मृत्युर्न जरापि च॥ न शोको नैव सुकृतं न दुष्कृतमपीश्वराः॥२२॥ अतः सर्वे निवर्तंते पाप्मानः सुरपुंगवाः॥ एषोपह-
विधृतिः॥ कमर्थं तद्विधारणमि-

६२

तथाप्याहि ब्रह्मलोकः स्वयंप्रभः ॥२३॥ सर्वस्य जनिमतः परिच्छेदके पि अहोरात्रे नं सेतुभूतमात्मानं तस्य तस्य रूपे अध्यस्तत्वे
न तत्परिच्छेदकत्वानुपपत्तेरित्यर्थः ॥ तथा मृत्युजरादिकमपि देहादिधर्मत्वात्तद्विवेकसेतुभूतमात्मानं न तरतः नातिक्रा
मतः ॥ इतरं प्राणिवदहोरात्रादिलक्षणेन कालेन परिच्छेद्यो न भवति न प्राप्नोति अप्राप्य च अतोस्मात्रीति हताः सर्वे निवर्त्तं
ते ॥ कुत इत्यत आह ॥ एष इति ॥ लोकस्य सेतुत इति लोकः आसाद्य ब्रह्मैव लोको ब्रह्मलोकः एषा हि यस्मादपहतपाप्मा अतो नि
वर्त्तत इत्यर्थः ॥२२॥२२॥ तस्माद्वा इत्यादि ॥ तस्माद्वै सेतुमेतं तु तीर्थ्वा सन् सुरर्बभाः ॥ भवत्यनंधोविद्वान् सन्नविद्वांस्त
द्देयतु ॥२४॥ उपतापी तु संन्देवानोपतापी भवत्यपि ॥ यस्माद्देहादिविविक्तस्तस्माद्विद्वानिमं सेतुभूतमात्मानं तीर्त्वा प्राप्या
धादिधर्मस्य स्थूलशरीरादिधर्मिणो वस्तुहानिहत्त्वात् अहित एव भवतीत्यर्थः ॥ एवं दहरविद्याविषयं ब्रह्म स्तौ यदिष्य
जाग्रदवस्थानिर्दिष्टं ब्रह्म भवति पादनपराप्रजापतिनैजायोपदिष्टायाविप एषोक्षिणि पुरुषो दृश्यत इत्यादिनाश्रुत्या प्या
प्रदर्शितातां संगृह्णाति ॥ यएषइत्यादिना ॥ यएषोदहाकाशाइस्फुरतः परमेश्वरः ॥२५॥ स देहादिभ्यो विविक्तेभ्यः पृथग्भूतो
सनातनः ॥ जाग्रत्स्वप्नसुषुप्त्याख्यावस्थायां भाति देहिनां ॥२६॥ तस्या अपि महादेवः साक्षी भिन्नः स्वयंप्रभः ॥ देहादेर्जा
ग्रदादेश्च खेन साक्ष्यत्वात् तत्साक्षी स्वप्रकाशचिद्रूप आत्मा ततः पृथग्भूत एव प्रतिपत्तव्य इत्यर्थः ॥ अनात्मनः साक्ष्यत्वमु
पपादयति ॥ तस्मिन्निति ॥ तस्मिन्नध्यस्तरूपेण सर्वं विभाति च ॥२७॥ तस्मिन्नूब्रह्मणि स्वरूपेणाध्यस्तं जडं जगत् कदाचिद्वि
काशते कदाचिन्नेति तत्साक्षी न प्रकाशं तस्य स्वप्रकाशत्वात् सर्व जगतोपि सर्वदा भानप्रसंग इति भावः ॥२८॥ न हैवैस
शरीरस्य सत इत्यादि श्रुत्यर्थं संगृह्णाति ॥ स्वदन्येनेत्यादिना ॥ स्वद्वन्येन शरीरेण सशरीरस्य सर्वदा ॥ प्रियाप्रियाभ्यां

वस्थायाम्चष ...

नभाति

६२

ध्येय

नाम ३

संबंधो सर्वस्येव संशयः ॥ २८ ॥ अशरीरं वा वसंतं वि धयानप्रियाप्रिये ॥ स्पृशतः सत्यमेवोक्तेनात्र संदेहकारणी ॥ २९ ॥ यतो दक्रादि विशिष्टस्यैव सुखदुःखोपयोगलक्षणः संसारः देहादि विविक्तं केवलमस्मानेजानतस्तु संसारस्य गौरवं नास्तीत्यर्थः ॥ २८ ॥ २९ ॥ दहराकाशाद्बुद्धस्य ब्रह्मपरत्वं द्रढयितुं श्रुत्यंतरगतमाकाशो वै नाम रूपयोर्निर्वहिता तेति वाक्यं संगृह्णाति ॥ य एष इति ॥ य एवो दहराकाशः स एव सुरपुंगवाः ॥ नामरूपस्य निर्माता तद्देवब्रह्मशाश्वती ॥ ३० ॥ य आकाशाख्यो हृन्मध्ये व स्थित आत्मा घटपटादिनामधेयस्य तदभिधेयार्थजातस्य च निर्माता तद्देवानादिनिधनं ब्रह्मेत्यर्थः ॥ अमृतमित्याद्युक्तार्थं ॥ अमृतत्वं तदेवैतत्स आत्मा सर्वदेहिनां ॥ ततोनान्यत्परं किंचिन्नापरं नास्ति किंचन ॥ ३१ ॥ स एव सर्वरूपेण विभाति न विभाति च ॥ अहो रूपस्य देवस्य पूर्णतां को नु वेदतां ॥ ३२ ॥ यथाग्निः स्वविकारेषु तत्तद्रूपेण संस्थिता ॥ तथा सर्वत्र तत्साक्षी तत्तद्रूपेण संस्थितः ॥ ३३ ॥ यथा वारि विकारेषु वायुस्तत्तत्स्वरूपतः ॥ तथा ० ॥ ३४ ॥ यथाग्निः स्वविकारेषु तत्तद्रूपेण संस्थितः ॥ तथा ॥ ३४ ॥ यथा वा स्वविकारेषु वायुस्तत्तत्स्वरूपतः ॥ तथा ० ॥ ३६ ॥ यथा वा सर्वगं व्योम स्वाकारे पो वसंस्थितं ॥ तथा सर्वात्मिकः साक्षी साक्षिरूपेणासंस्थितः ॥ ३७ ॥ घटाकाशादि भेदेन विभिन्नोप्यविभागवान् ॥ आकाशोस्त्यहदीशानो विभिन्नोप्यविभागवान् ॥ ३८ ॥ ब्रह्मणः कार्येषु भूतभौतिकादिषु अनुगतिप्रदर्शनार्थो यथाग्न्यादिति दृष्टांतः ॥ अनुगस्यापि निर्लेपत्वप्रतिपादनार्थं यथा वा सर्वगं व्योमेति निदर्शनांतरं ॥ घटाकाशादिस्तनेन तात्विकोप्यभेदप्रतिपादनं ॥ ३९ ॥ महादेव इति नामधेयबलादप्यस्य सर्वात्मत्वं प्रतिपादयति ॥ महादेवो विभागेन विभागेन च भासते ॥ अन्यथा चेन्महादेवो महादेवः कथं भवेत् ॥ ३९ ॥ देवो विभागेनेत्यादिना ॥ महादेवो महादेवेति ॥ महादेवो देवरवनेवा महानयं ॥ तथा सति महादेव इत्यन्वर्थसंज्ञा नेयमित्याह ॥

तत ३

महा १ स्व ५

ज्जालंतत्तत्स्वरूपतः ॥ तथा ० ३ ४ यथाग्निस्स्वविकारेषु तत्तद्रूपेण संस्थितः ॥ तथा ०

नसर्वंनचापरं॥४०॥येनकेनापिरूपेणयंद्रष्टुंनशक्नोतिच॥तेनतेनैवरूपेणशिवएवावभासते॥४१॥यद्यप्यसौमहांश्च
सौदेवोमहादेवइतिइदृशीकथंसिद्धेदित्यर्थः॥४१॥यथाज्ञातेनेति॥यथाज्ञातेनरूपेणशिवएवेतियामतिः॥साशिव
पुरमासीद्विज्ञापरानोहिसंशयः॥४२॥अहमितिशिवएत्यचिद्घनःस्फुरतिसदाप्यथगास्तिनैववस्तु॥इदमितिवपुषा
वेतनबंधनंनहिमनुजस्यविमोचनंचाकिंचित्॥४३॥शिवइतिसकलंयदाविसात्मसंतीनाचजननंमरणंतदास्तिकिंचित्॥
इतिहृदयेवचनंयदायमेताम्निशिवतमितिसततंनिधायतिष्ठेत्॥४४॥परमशिवःपरमेश्वरःप्रसन्नोयदिविमलाप
रमात्मभूतिरेषा॥नहिसकलेविमलेरूपायवेदनंचहरिणानमयानचापरेण॥४५॥परमशिवःपरमेश्वरःस्वतत्वो
यदिकुरुतेमनुजस्यवेदनंतत्॥परमपदंविमलंप्रयातिमर्त्योयदिकुरुतेनशिवःप्रयातिबंधं॥४६॥यन्नयेनप्रकारेण
यद्यद्भातितेनसगुणरूपेणतदधिष्ठानसच्चिदानंदात्मकःशिवएवभातीतियामतिःसासम्यक्छिन्नद्रूपापरमार्
थिरेवनान्येत्यर्थः॥४२॥अहमेवैत्यादिप्रतिपादितमज्ञेसर्वप्रपंचः॥दिनकरकिरणैर्हिशार्वरंतमोनिबिडतरंझटि
तिप्रणाशमेति॥घनतरमघकारणांतरंनमःशिवदिनस्मरणंनयान्नचापरेण॥४७॥हरिहरमप्यपरसुरासुराद्याःप
रमशिवप्रसयातिरस्कृतांश्च॥रविकिरणैरखिलान्यहानियद्वत्परमशिवःस्वतएवबोधकारी॥४८॥शिवच
रणस्मरणेनपूजयान्यस्वकृततमसःपरमुच्यतेजंतुः॥नहिमरणभवभ्रमणाशहेतुःशिवचरणस्मरणाद्धृतेस्ति
किंचित्॥४८॥परमशिवःखलुनःसमस्तहेतुःपरमशिवःखलुनःसमस्तमेतत्॥परमशिवःखलुनःस्वरूपभूतः
परमशिवःखलुनःप्रमाणभूतः॥५०॥परमशिवःसकलागमादिनिष्ठःपरमशिवःपरमात्मभूतिगम्यः॥परमं
शिवःपरमात्मभूतिरूपःपरमशिवःपरमात्मभूतिदश्च॥५१॥परमशिवसमुद्रेहरिःसर्वदेवामनुजपुत्रम

गाघाः शीकराख्यसं ॥ विमलमति भिरेवं वेदवेदांतनिष्ठेर्हृदयकुहरैः सर्वदेवांग मुनिश्रेष्ठ वेदितुं शक्यते हि
॥५२॥ मायाबलेनैव हरिं शिवेन समानभाक् पुरुषाधमः स्यु ॥ मोहनार्कीचेन्न न साम्यमाकू माया नु रोवी
खलु दुस्तरेषु ॥५३॥ खद्योतो यदि चेडभानुस दृशः स्तल्पो हरिः शंभुना किंपाको यदि चंदनो न सदृ
शास्तल्पो मीहितो न च ॥ अज्ञानी यदि वेदनेन सदृशो देवन तुल्पा जनाः ॥ किं वक्ष्ये सुरपुंगवा अहमहो
मोहस्य दुश्चेष्टितं ॥५४॥ अतः शिवेनैव समस्तमेतज्जगत्य नीते न न चापरेण ॥ शिवस्वभावेन शिवः समस्तं
शिवप्रसादेन जगद्विचित्रं ॥५५॥ तद्वत्य दृश्यसकलम दृपंसरोपपश्यति स्म परिमोहितः पुमान् । कस्टशिव घटकुड्य
रूपतः कष्टमेव खलु तस्य वेदनं ॥५६॥ इदं जगदिति स्वतः सकलजंतोः प्रमितिर्दृढापि इदं जगदिति स्फुरत्यमलबोध
स्वभावेन च ॥ इदं हि परवेदनं विमल चित्तपुंसः सदा भवतर ति मानवः परमबोधनं चेतनेन हि ॥५७॥ प्रतिपादितमर्थ
मुपसंहरति ॥ छंदोगेति ॥ छंदोगश्रुतिमस्तके विनिहितं विज्ञानमेतन्मयजत् नाम चिंवेत्कि नामति तत्समज्ञानं हि
स्वरूपे ॥ कारुण्यादमरादिपाश्रीतेषु भवसागरतावापयेदेवानामाधिपाधिपस्य वचनात्कं महाशस्य च ॥५८॥ ॥
इति श्रीस्कंदपुराणे सूतसंहितायां ब्रह्मगीतासूपनिषत्सु षष्ठोऽध्यायः ॥६॥ ॥ अत्मा विद्यायाः संसारकारणं वि
द्यानिवृत्तिः प्रयमं प्रयोजनं । आवरणोच्छेदनेनो पूनातेस तिस्य स्वरूप भूत निरतिशयानंदाविर्भावद्वितीयं
प्रयोजनं ॥ तदुभय सिद्ध्ये ब्रह्मविद्योपदिश्यते यः ॥ ॥ इति श्रीमत्र्यंबकसेवापरायणेनोपनिषन्मार्गप्रवर्त्त
केन माधवाचार्येण विरचितायां सूतसंहिताव्याख्यातस्य यदीपिकायां यज्ञवैभवखंडस्योपरि भागे ब्रह्मगीता
व्याख्यायां षष्ठोऽध्यायः ॥ ॥ श्रीहरसेललसरनवव्य सेसावनिधुकुराजन्यवंश्यदहनानपवर्गवीय ॥ ग

णर

त: २

विंदगोविंदमुरारिनृहरावतारयोगेश्वराखिलगुरो भगवन्नमस्ते ॥ यदज्ञानात्प्रहत्तिर्यद्विज्ञानात्तत्कुतो भवेत् ॥ तस्मात्सर्वप्रवृ
त्तीनां हानिः स्यात्तामबोधयेः ॥ विद्यानां मथने श्यानां मुखकैः नैनं मुदितं ॥ हृदयग्रहिणः सासांदितः संतिनं संतिवा ॥ एकस्य प्रतिबि
बितामुपगतावावां भवानी श्वरो दासोऽहं जगतोस्य नैतदुचितं तद्धे हे मां स्वेपदे ॥ नो चेद्दस्युतकामपि प्रबाभिनीमभ्यस्य निधामहं कर्मा
स्वानि नवान्नाहमयवाविमर्श यदिष्टे भवान् ॥ एवं वेदत्रयोपनिषत्सु ब्रह्मात्मैक्यपरत्वं व्याख्यायाथर्वणमांडूक्योपनिषत्प्रतिपन्नत्पर
त्वं व्याचिख्यासुस्तामुपनिबध्नंसंगृह्णाति ॥ अस्ति तत्त्वमित्यादिना ॥ ब्रह्मोवाच ॥ अस्ति तत्त्वं परं साक्षादक्षरं क्षरवस्तुनां ॥ अधिष्ठान
मनौपम्यमवाङ्मनसगोचरं ॥ १ ॥ तत्त्वं परमार्थभूतं ॥ त्रिवत्सादीनि षड्विंशत्पपरंतत्त्वानि व्यावर्तयितुं विशिनष्टि ॥ भूतेभ्यः पंचविंशः
प्राणेभ्यस्तुर्दशाभिरिंद्रियेभ्यः ॥ चतुर्विंशतितत्त्वानि सांख्याः शास्त्रवैदुषा विदुः ॥ महान्कालः प्रधानं च माया विद्ये च पुरुषः ॥ इति पौ
राणिकाः प्राहुस्त्रिंशत्तत्त्वानि तैः सह ॥ बिंदुनादौ शक्तिशिवौ शांतातीतं ततः परं ॥ षट्त्रिंशत्तत्त्वमित्याहुः शैवागमविशारदाः ॥ पर
मिति ॥ यतो विकारजातेभ्यः परमत एवाक्षरमविनाशि सत्यभूतं ॥ तस्मादेवक्षरवस्तूनां नश्वराणां जडपदार्थानामधिष्ठानं ॥ सत्यं ॥
मिथ्याभूतस्याधिष्ठानं भवति ॥ अनौपम्यमुपमानभूतस्य वस्त्वंतरस्याभावात् ॥ निर्विशेषत्वेन वाङ्मनसयोरविषयभूतं क्ष
रवस्तूनामित्यत्र संशयः सर्वकोविधिरनित्य इतिनामिरदीर्घो न क्रियते ॥ १ ॥ भूतो कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवती
त्यादिना प्रश्नप्रतिवचनरूपेण यदधिष्ठानभूताक्षरब्रह्मसंवेदनं दर्शितं तत्संगृह्णाति ॥ तस्मिन्निति ॥ तस्मिन्विदिते सर्वं विज्ञातं
स्यादिदं सुराः ॥ तदात्मकत्वात्सर्वस्य तस्मिन्नान्यत्र हि भिदास्ति न ॥ २ ॥ ज्ञातेर्थे हेतुमाह ॥ तदात्मकत्वादिति ॥ तदधिष्ठानं ब्रह्मैवा
त्मा स्वरूपं यस्यारोपितप्रपंचस्येति विग्रहः ॥ नत्वरोपितरजतादिकमधिष्ठानशुक्त्यादिव्यतिरेकेण पृथग्भासमानं लक्ष्यत इति

भावः॥ नास्त्येव हीति॥ अपर्यवस्य ब्रह्मणः सकाशात्स्वात्मविवेकभेदस्तद्युक्तिभिरसत्त्वाग्रे एव निरस्त इति हेतोरर्थः॥१२॥
एवं प्रासंगिकताया उपनिषदोऽभिधेयमनर्थसंयोहणाजदृश्यपा स्तेनन्तर्थे द्वि विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदंती
आदिकामुपनिषदं व्याख्यायति॥ द्वे विद्ये इति॥ द्वे विद्ये वेदितव्ये हि परा चैवापरा च॥ तत्रापरा ऋग्वेदो य
जुर्वेदश्च॥३॥ सामवेदस्तथाथर्ववेदः शिक्षा सुरर्षभाः॥ कल्पो व्याकरणं चैव निरुक्तं छंद एव च॥४॥ ज्योतिषं
च तथा नाना॥ विषया अपि बहवः॥ तत्रापरा ऋग्वेदादिलक्षणा श्रुतिपरिगणिता तायाऽपरविद्या
स्वानावदनात्मविषयत्वाद्दूरीकृतमहिती तत्त्वं न प्रतिपादयति॥ तथा तज्जन्या बुद्ध्याप्यग्निहोत्रादिकर्मविष
यत्वादनात्मविषया इति नासाम्युपरविद्यात्मत्वमित्यर्थः॥ अथ परा यया तदक्षरमधिगम्यत इति श्रुतिवा
क्यं संगच्छति॥ अथैषेति॥ अथैषा परविद्या सा यया तत्परमक्षरं॥५॥ गम्यते सुदृढं साक्षात् सोऽप्र
सादिभिः॥ यथा तत्त्वमस्याद्युपनिषद्वाक्यजनितया वक्ष्यमाणलक्षणं तदक्षरं ब्रह्म गम्यते प्राप्यते सा आ
त्मविषयाऽज्ञाननिवर्तकत्वेन मोक्षसाधनत्वात्परविद्येत्यर्थः॥ यत्तदद्रेश्यमित्यादिका श्रुतिः॥ स्वरूपतोऽप्यक्षरं सि
द्ध्यत इति इतः परं न पृथक्संवादः क्रियते॥ तदक्षरं निष्कलं किंलक्षणमिति विशिनष्टि यत्तदित्यादिना॥ यत्तदद्
रूपमग्राह्यमगोत्रं रूपवर्जितं॥६॥ अद्रेश्यमदृश्यं चक्षुःश्रोत्रादिज्ञानेन्द्रियाणामगम्यमित्यर्थः॥ वाक्पा
ण्यादिकर्मेन्द्रियाविषयत्वं अगोत्रमनन्वयं न ह्यनन्यदस्य कारणमस्ति येन सहान्वयः स्यात्॥ अवर्णमिति॥
श्रौतपदस्यार्थमाह॥ रूपवर्जितमिति॥ रूप्यंत इति रूपाणि स्थूलत्वादयो द्रव्यधर्मास्तै रहितं यः सर्वज्ञः सर्व
विदिति चेत् नाविद्याविशेषात्संसारिणामिवास्यापि प्रसक्तं चक्षुःश्रोत्रादिकरणसङ्गं व्यावर्तयति॥ अच

अग्राह्यमिति॥४

६६

यम   व४

चक्षुःश्रोत्रमिति॥ अचक्षुःश्रोत्रमस्यैवं तदपाणिपादं सदा॥ नित्यं विभुं सर्वगतं सुसूक्ष्मं च तदव्ययं।७॥ यद्भूतयोनिं धीमंतः परिप-
श्यंति चात्मनः॥ अपाणिपादमिति॥ कर्मेंद्रियरहितं सर्वत एवं ग्राह्यग्राहकरहितमातो नित्यं विभुं॥ विविधं ब्रह्मादिस्थावरांतप्राणिभेदैर्भ-
वतीति विभुः॥ अतएव सर्वगतमाकाशवद्व्यापकं॥ अथापि सुसूक्ष्मं अपंचीकृतभूतानि सूक्ष्माणि तत्कारणत्वात्ततोऽप्यतिशयेन सूक्ष्म-
त्मं॥ उदीरितरूपत्वादेव तदव्ययं न ह्यनवयवस्य स्वावयवगुणापचयलक्षणो व्ययः संभवति॥ भूतयोनिं॥ भूतानां वियदादीनां योनिः कारणं
भूतं धीरा इत्यत्र धीमच्छब्दार्थ इति व्याचष्टे॥ धीमंत इति॥ यदेतदद्रेश्यत्वादिलक्षणं परं ब्रह्म धीमंत आत्मना आत्मरूपेण स्वस्वरूपत-
या परिपश्यंति॥ तदक्षरं ब्रह्म यया गम्यते सा परविद्येति संबंधः॥ एतस्य श्रुतिवाक्यस्य ब्रह्मपरत्वं भगवता व्यासेनापि निर्णी-
तं॥ अदृश्यत्वादिगुणको धर्मोक्तेरिति॥ उक्तं भूतयोनिं सुदृष्टांतैः प्रतिपादयति॥ यथेति॥ यथोर्णनाभिः सृजते गृह्णते च सुरर्षभाः॥ यथा
पृथिव्यामोषधयः संभवंति यथा सतः॥ पुरुषात्केशलोमानि तथा चैवाक्षरात्सुराः॥८॥ विश्वं संभवतीहैव तत्सर्वं स्वपनोपमं॥ ऊर्ण-
नाभिर्लूताकीटः स यथा कारणांतरानपेक्षः स्वशरीरात्तंतून्बहिः प्रसारयति स्वात्मन्येवोपसंहरति च॥ यथा च पृथिव्यामोषधयः
स्वकारणसदृशाः पृथिव्यामुत्पद्यंते यथा च सतो विद्यमानाज्जीवतः पुरुषादचेतनानि केशलोमानि संभवंति॥ एवमेव कारणांतरान-
पेक्षादक्षराद्ब्रह्मणः सलक्षणं विलक्षणं चेतनाचेतनात्मकं सर्वं जगदुत्पद्यते॥ न चाविक्रियस्य ब्रह्मणः परमार्थतो जगद्भावः सं-
भवतीति मायामयत्वात्तत्सर्वं स्वप्नं जगत्स्वप्नप्रपंचवत्सदृशमित्यर्थः॥०॥ ब्रह्मण उत्पद्यमानं जगदनेन क्रमेणोत्पद्यत इति दर्शयति॥
तपसेति॥ तपसा चीयते ब्रह्म ततोऽन्नमभिजायते॥१०॥ तज्जगत्कारणं मायाशबलं ब्रह्म प्रथमं तपसा परिपक्वप्राणिकर्मवशादु-
त्पन्नेन तत्स्रष्टव्यपर्यालोचनापेक्षेण ज्ञानेन चीयते उपचीयते॥ प्रागवस्थातो निर्विकल्पकसृष्टेः सृष्ट्यादौ ईषद्विकृत्युन्मुखं भवतीत्यर्थः॥
तेन च ज्ञानेनोपचितात्तस्माद्ब्रह्मणः सकाशाद्दृप्यते भुज्यते संसारिभिरित्यन्नमव्याकृतं भोग्यप्रपंचस्यानिरानंतस्याचिकीर्षित

६६

स्वरूपेणोत्पद्यते स्रष्टव्यपर्यालोचनावस्थमायाशबलं तद्ब्रह्म व्याचिकीर्षावस्थाप्राप्तमित्यर्थः॥१०॥ अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतं॥ यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः॥११॥ तस्मादेत स्कूराब्रह्म नामरूपान्नपूर्वं॥ जायते सत्यवस्तुन्न प्रपंचो परममेव तत्॥१२॥ तस्मादाद्यान्नशब्दाभिधेयादव्याकृतात् क्षितिपवनसलिलसंयोगवशेनोच्छूनावस्थाद्बीजांकुरवत् पंचीकृतपंचभूततत्कार्यलिंगशरीरसमष्ट्युपाधिः सर्वज्ञः प्राणशब्दाभिधेयो हिरण्यगर्भ उत्पन्नः॥ अत्र हि हिरण्यगर्भोत्पत्त्यभिधानेनैवापंचीकृतभूतानि तत्सत्त्वरजोंशपरिणामरूपलिंगशरीरस्य चोत्पत्तिरर्थादुक्तेति द्रष्टव्यं॥ तस्मात्प्राणात् पंचीकरणविषयं मन उत्पन्नं ततस्तत्संकल्पात् सत्यशब्दाभिधेयानि वियदादीनि पंचीकृतानि पंचभूतानि उत्पन्नानि॥ सच्छब्देन प्रत्यक्षग्राह्यं पृथिव्यादित्रयमुच्यते॥ वाय्वाकाशौ तु परोक्षत्वात् परोक्षवाचिना तच्छब्देन॥ अत एव श्रूयते॥ सच्च त्यच्चाभवदिति॥ एवं भूतेषूत्पन्नेषु पुनरंडादिक्रमेण भूरादयो लोकास्तेषु च मनुष्यादीनां वर्णाश्रमधर्मोदितानि कर्माणि तेषु चामृतं कर्मफलं स्वर्गादि ज्ञाता तस्मादित्यादन्वयं तत्सप्तमित्येतान्यनेन क्रमेणोत्पन्नानीत्यर्थः॥ उक्तमेवार्थमुपसंहरति॥ यः सर्वज्ञ इति॥ सर्वं जानातीति सर्वज्ञः॥ विशेषतोऽपि सर्वं वेत्तीति सर्ववित्॥ यस्य च तपो ज्ञानमयं सर्वज्ञस्वाभाव्याज्ञानात्मकं न तु क्लेशरूपं चांद्रायणादिप्रयासलक्षणं तस्मादक्षराद्ब्रह्म सर्वं कार्यरूपं हिरण्यगर्भाख्यं ब्रह्म देवदत्तो यज्ञदत्त इत्या

नामधेयं तदस्ति धेयं नो। तपीनादिस्वरूपवद्दृश्यजातं ब्रह्मैव वादिलक्षणमनंतं सर्वं पू र्वोक्तक्रमेण ज्ञायते इत्यर्थः॥११॥१२॥ एवं
परविद्याविषयम क्षराक्षरस्वरूपं तटस्थलक्षणास्वरूपपदिश्य तद्विलानमेव मोक्षसाधनमिति निगमयति। तदेतदिति॥
तदेतदक्षरं सत्यं तद्विज्ञाय विमुच्यते। कर्मणा नास्ति तेनापि संसारस्य विनाशनं॥१३॥ अतो मंदकर्माणि स्वपरविद्या वि
षयप्रतिपादस्य वैराग्यजननार्थं तानि हि देवत्वस्थानस्य फलत्वे तदिस्यादिना प्रतिपादितानि साधनमेव प्रतिसंगच्छति॥
कर्मणेति॥१३॥ प्लवाह्येते अयज्ञरूपा अदृढाश्च न संशय॥ अदृढा इति। दृढो हि प्लवः पारप्राप्तिक्षमः अदृढत्वं मध्ये निमज्ज
ति। अदृश्चैमेय शादयस्तेन संसारान्मोक्षहेतवः इत्यर्थः॥ कर्मैव परमपुरुषार्थसाधनमिति ये मन्यंते तान्निंदति॥ एतिरेवे
ति॥ एतिरेव परं श्रेयः इति ज्ञानं तिय जनाः॥१४॥ ते मूढा अनिशं मृत्युं जरां चैवापियंति हि॥ ते मूढा इति॥ स्वर्गादिलक्षण
कार्यफलसाधनस्य कार्यं प्रति साध्यस्योपायत्वेनान्यथाग्रहणात्तेषां मौढ्यत्वं॥ एतदेव प्रपंचयति॥ कर्मनिष्ठा इष्टा इति॥
कर्मनिष्ठाः स्वयं धीरा मन्यमाना पंडितमानिनः॥१५॥ मूढाएव न विद्यासक्तिषां नानापरागतिः॥ अं धेनैव यथा धानयमा
नान्सुदारुणे॥१६॥ अंध कूपपातं स्यवता कर्मरतो जनः॥ कर्मनिष्ठा वयं सर्वे कृता यो इति मोहितः॥१७॥ अश्रिमन्यंत
नकर्मक्षये वः स्वयं पतंति हि॥ विनानास्तिपरं ज्ञानं तेषां कैवल्यमुत्तमं॥१८॥ इष्टापूर्तं मन्यमाना वरिष्ठमिति ये जनाः॥१९॥
एवमुक्तिप्रतिपादितं वैराग्य विधिं संगच्छति॥ ज्ञानेके इति॥ ज्ञानेकजन्मसंसिद्धः श्रोतस्मार्तपरायणः॥ अनित्यमि
ति विज्ञाय जगद्वैराग्यमाप्नुयात॥२०॥ परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायादिति॥ श्रुतेर्भक्तानं तांश्रुतिः। त
स्या॰ त्र परीक्ष्येत्यस्य पदार्थं अर्थं साधनमनित्यमिति विज्ञायेति॥२०॥ नास्त्यकृतः कृतेनेति वाक्यस्याभिप्रायमाह॥
तेमपरमं श्रेयो नैवयांति नसंशयः॥

विना नास्ति परं ज्ञानं तं पदं वेदवस्तु मुनमो ज्ञानादेवेति ज्ञानादेव हि संसारविनाशो नैव कर्मणा ॥ इति नाम्नां शिवज्ञानसि-
द्ध्यर्थं पुनराशिलका ॥२१॥ श्रोत्रियं ब्रह्मनिष्ठं च गुरुं गच्छेत् श्रियेण च । गुरुस्तस्मै परां विद्यां दद्याद् सुरपुंगवाः ॥२३॥ एवं
नित्यानित्यवस्तुविवेकज्ञानेन विरक्तस्य मुमुक्षोर्लक्षणगुरूपसदनमेव कर्तव्यमित्याह ॥ इति सा खेति ॥ गुरुस्तस्मा इति ॥ अ-
परविद्याविषयात् संसारफलादिरक्षायेत्यर्थः ॥२१॥२२॥ एवं साधनचतुष्टयसंपन्नस्य ब्रह्मविद्या परे श्रव्येत्युक्तं ॥ तदेत-
त्सत्यमिति द्वितीयस्य ब्रह्मणः एव संसारकारणमयुक्तं ॥ जीवानामपि परस्य विद्यमानत्वादित्याशंक्य तद्व्यतिरेकं दृष्टांते-
नोपपादयति ॥ विस्फुलिंगा इति ॥ विस्फुलिंगा यथा वाग्नेः सुदीप्तास्सर्वतश्च ॥ अपियंति तथा जीवा अक्षरे शिवसं-
ज्ञिते ॥२२॥ प्रभवंतीति चेति ॥ चशब्देनाग्नौ लुप्तास्तत्रैव पर्यवसानं संगृह्यते ॥ यथा स्फुलिंगादयः पादभे जायमानास्तत्रैव पुन-
र्लीयमानास्तत्तोति रिक्ताः एवं चिद्रूपा आत्मा जीवलक्षणा भावा अपि देहादिलक्षणोपाधिजननवशेन चिद्रूपाल्ल-
क्षणो जायमानास्तत्रैव शिवसंज्ञे अक्षरे तदुपाधिलयेन अपरिच्छिन्ने नभसि घटाकाशादिवल्लीयमानानन्ततोऽतिरि-
च्यंत इत्यर्थः ॥२३॥ ननु जीवब्रह्मणोस्यापि प्राणादिमत्त्वं किं न स्यादित्याशंक्य सर्वोपाधिविनिर्मुक्तस्वरूपमाह ॥ दिव्य इति ॥
दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यंतरो ह्यजः ॥ अप्राणो ह्यमनाः शुभ्रो मायायाजीवतपरः ॥२४॥ दिवि द्योतमाने स्वप्रका-
शात्मैतन्यलक्षणे स्वात्मनि स्थितो दिव्यः स्वमहिमप्रतिष्ठित इति यावत् ॥ स च दिव्यस्मादमूर्तो मूर्तिरहितः अत एव पुरु-
षः सर्वासु पूर्षु शरीरेषु व्याप्य वर्तमानः बाह्यमाभ्यंतरं च सकलं व्याप्य ताभ्यां सहवर्तत इति सबाह्याभ्यंतरः । अहो-
जनिरहितः ॥ एतच्च सर्वभावविकारोपलक्षणं । सर्वस्ताविकारोपलक्षणं ॥ एवं रूपोऽयमेव ह्यक्षितः प्राणादिमत्त्वे

३ रहित सि स्य धादी पि

णा५

जायते तत्स्वदृष्ट्या तस्य प्राणमनसी निस्त्तः॥ अत्र प्राणशब्देन प्राणनादिव्यापारनिमित्तक्रियाशक्तिरुच्यते॥ एतच्च कर्मे-
न्द्रियोपलक्षणं संकल्पाद्यात्मकं मनस्तच्च बुद्धेर्ज्ञानेन्द्रियाणां चोपलक्षणं। हि यस्मादेवमस्य प्राणादिसंबंधो नास्ति अ-
तः शुद्धो निर्मलः धर्माधर्मसंस्पर्शस्तावत्तन्मलत्वात्सकलसंसारमालिन्यस्येति भावः॥ अतो ऽक्षरो ह्यप्रपंचोपा-
दानभूताया मायायाः सकाशात् स सोपाधिकाज्जीवात्त्र्यायमुदीरितरूपो निरूपाधिक आत्मा परः इत्यर्थः॥ एतेनाक्ष-
रात्परतः पर इति श्रुतिर्व्याख्याता॥ ३४॥ उक्तमप्रमादिमत्त्वमुपपादयितुं प्राणादीनां तदुत्पत्तिमभिधत्ते॥ एतस्मा-
दिति॥ एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च॥ खं वायुर्ज्योतिरापश्च पृथिवी विश्वस्य धारिणी॥ २५॥ प्राणादय-
स्तत्कारणानि पंचमहाभूतानि चोदीरितरूपाद्ब्रह्मण उत्पद्यंते उत्पत्तेः प्राग्विद्यमानत्वेः कथं कार्यं तद्ब्रह्म प्राणा-
दिमत्स्यादित्यर्थः॥ २५॥ हिरण्यगर्भब्रह्मांडांतर्वर्तिनिस्तात् भूमाभिमानिनो विराजो ऽपि परस्माद्ब्रह्मण उत्पत्तिं तदनन्यत्वं च
प्रतिपादयति॥ अग्निर्मूर्धेति॥ अग्निर्मूर्धा चक्षुषी चंद्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः॥ वायुः प्राणो हृ-
दयं विश्वमस्य पद्भ्यां क्षेमिः शंकरोयं सुहितस्त्वः॥ २६॥ असौ वाव लोको गौतमाग्निरिति श्रुतेरत्राग्निशब्दो
द्युलोकवचनः॥ वाग्विवृता उद्घाटिताः वेदा अस्य वागित्यर्थः॥ हृदयं विश्वमस्येति॥ विश्वं सर्वं जगदस्य
विराजो हृदयमंतःकरणं। पद्भ्यां भूमिरित्युत्पन्नेति शेषः॥ शंकरोयमिति॥ अयमुदीरितरूपो विराडप्युप-
ध्याधिगमेसीति सत्यस्य भावः परात्मा एव नान्य इत्यर्थः॥ २६॥ उक्तामेव सृष्टिं विवृणोति॥ तस्मादिति॥ त-
स्मादग्निः समिधो यस्य सूर्यः सोमात्पर्जन्य ओषधयः पृथिव्यां॥ पुमान् रेतः सिंचति योषितायां बह्वीः प्रजा बहु-

६८ णा५ न ६८

यासंप्रसूताः ॥२७॥ तस्मादेवपरस्मात्पुरुषादग्निर्जायते। तं विशिनष्टि॥ समिध इति। यस्याग्नेः सूर्यः समि
धः समिंधनहेतुः सूर्येण समिध्यमानो द्युलोकोऽत्राग्निशब्दाभिधेय इत्यर्थः छांदोग्योपनिषद्यसौ वाव लोको
गौतमाग्निस्तस्यादित्य एव समिदित्यादिना पंचाग्निविद्यायां द्युपर्जन्यपृथिवीपुरुषयोषिद्रूपाः पंचाग्नय उपदि
ष्टाः। द्युलोकाग्निस्तस्मात्सोमात्पर्जन्यो जायते। तं विशिनष्टि। समिध इति। यस्याग्नेः सूर्यः समिधः समिध
नहेतुः सूर्येण समिध्यमानो द्युलोकोऽत्राग्निशब्दाभिधेय इत्यर्थः। छांदोग्योपनिषद्यसौ वाव लोको गौतमाग्निस्तस्यादित्य एव समि
दित्यादिना पंचाग्निविद्यायां द्युपर्जन्यपृथिवीपुरुषयोषिद्रूपाः पंचाग्नय उपदिष्टाः। द्युलोकाग्निस्तस्मात्सोमात्पर्जन्यो जायते त
स्माच्च पृथिव्यामोषधयः व्रीहियवाद्याः संभवंति तासु च पुरुषाग्नौ हुतासु पुरुषस्तदन्नं तेन रसरूपेण परिणतं योषितायां यो
षिद्रूपेण अग्नौ सिंचति। अनेन क्रमेणोत्पद्यमाना अपि सर्वाः प्रजास्तस्मादेव ब्रह्मण उत्पद्यंत इत्यर्थः ॥२७॥ तस्मादृच इत्यादि। रेतो
तस्मादृचः सामयजूंषि दीक्षाश्च यज्ञाश्च सर्वे क्रतवो दक्षिणाश्च। संवत्सरो यजमानश्च लोकाः सोमो यत्र पवते यत्र सूर्यः ॥२८॥
ऋक्सामादीनि कर्मसाधनानि कर्माणि तत्फलं च सर्वमपि तस्मादेवोत्पन्नमित्यर्थः। यूपरहिता अग्निहोत्रादयो यज्ञास्तद्वंतो ज्यो
ग५ तिष्टोमादयः क्रतवः संवत्सरः कर्मांगभूतः कालः यजमानः कर्ता लोकास्तत्फलभूताः सवित्रा यत्र सोमो यत्रेति। अविदुषां विदु
च१ षां पथा क्रमं प्राप्यो सोमसूर्यलोकाविद्यर्थः ॥२८॥ एवं कर्मांगभूता देवा अपि तत एवोत्पन्ना इत्याह। तस्माद्देवा इति। तस्माच्च
देवा बहुधा संप्रसूताः साध्या मनुष्याः पशवः पक्षिणश्च। प्राणापानौ व्रीहियवौ तपश्च श्रद्धा सत्यं ब्रह्मचर्यं विधिश्च ॥२९॥ बहुधा व
सुरुद्रादिगणभेदेन बहुप्रकारा इत्यर्थः। साध्या देवविशेषाः। मनुष्यादीनां संबंधिनो प्राणापानौ हविरर्थे व्रीहियवौ पुरुषसंस्का
रलक्षणं कर्मांगं तपः स्वतंत्रं च फलसाधनं सत्यं ब्रह्मचर्यं च सिद्धं ॥२९॥ विधिः इति कर्तव्यमिति विधानं। तस्मात्प्राणा इत्यादि।

तस्मात्प्राणा अर्चिषः सप्त सप्तहोमाः सुरश्रेष्ठाः समिधः सप्त चैव ॥ लोकाः सर्वे चोद्भवं साधु पूर्वं यथा नद्यः स्यन्दमानास्तथापि ॥ २० ॥
अतः समुद्रा गिरयश्च नद्यश्च तथा सर्वा ओषधयो रसाश्च ॥ सप्त शीर्षण्याः श्रोत्रादयः प्राणाः ॥ तथा तेषां सप्तार्चिषो विषयप्रकाश-
नशक्तयः ॥ सप्त होमास्तान्यानि विषयज्ञानानि ॥ समिधः इंद्रियसमिंधनेन तु तत्तद्विषयाः ॥ लोकास्तेषां स्थाना ... सर्वसाक्षी परमात्मा नि- सा
नंदोयं पुराणः सुपूर्णः ॥ ... सर्वस्यात्मेति ॥ सप्तानामिंद्रियाणां संचरणार्थानि गोलकानि ॥ २१ ॥ अतः
समुद्रा इत्यादि निगदसिद्धं ॥ सर्वस्यात्मेति ॥ सर्वस्यात्मा सर्वसाक्षी परमात्मा नित्यानंदोयं पुराणः सुपूर्णः ॥ २१ ॥ उक्तरीत्या साक्षीभूतः
परमात्मा सर्वस्यानात्मप्रपंचस्यात्मा स्वरूपमनतन्त्र कृतपरिच्छेदानुपपन्नेयं परिपूर्णो नित्यश्चोत्सर्वः ॥ २१ ॥ एवं संग्रहार्थे उत्तराभ्यां स्व-
रूपप्रतिपादनेनाक्षरस्वरूपं प्रतिपाद्य पुरुष एवेदं विश्वमिति कृत्स्नस्यास्य दृष्टस्य जगतस्तदनन्यत्वमवधारितं तत्संग्रहाति ॥ इद-
मिति न किंचिदपरमिति ॥ इदं सर्वमात्मिकात्पुरुषएवैनेवापरं न किंचिदपरं ततः सर्वं ब्रह्मास्तीति संग्रहितत् ॥ इत्येतदिमं मम वेदनं मुनिग-
णस्पर्शनोहीनं कथं चिदपि संशयः कृतिमतस्य मुक्तः खलु ॥ २२ ॥ अहो विषममायया मरणसर्वदुःखोदयोपतितमनुजा अमी प-
रशिवस्य विद्यां न विनां ॥ तरंति जननार्णवं परशिवस्य विद्या ... दिदं नु शिवविवेदनं शिवपदस्य सेवान्वयात् ॥ २३ ॥ उक्तरीत्या
ब्रह्मत्वादिलक्षवांतस्य सर्वस्य तत्कार्यत्वात्तस्मात्परं नास्ति अपरमिति प्रतीयमानं कार्यजातं तत्स्वरूपेऽध्यस्तत्वेन भ्रान्तिरूपं यत्न्नि-
र्ध्यायात् ॥ वस्तुतो नैव विद्यत इति भावः ॥ २३ ॥ गुहायां निहितमित्यादि ॥ गुहायां निहितं साक्षादक्षरं वेद चेन्नरः ॥ अविद्याविद्या-
महाग्रंथिं शीघ्रं गच्छेत्सनातनं ॥ २४ ॥ तदुदीरितस्वरूपमक्षरं ब्रह्म गुहाशब्दवाच्यहृन्मध्ये व्यवस्थितं यः स्यात्मतया साक्षा-
त्करोति स तद्विद्यया स्वीयाः स्वसंसारहेतुभूतमविद्याग्रंथिं छित्त्वा सर्वबाधरहितं ... देहस्थं परशिवस्वरूपं प्राप्नोतीत्य-

पत-८

र्थः॥३४॥ तदेतदक्षरमिति॥ तदेतदक्षरं ब्रह्म स प्राणस्तदु वाङ्मनः॥ तदेतदमृतं सत्यं तद्वेद्धव्यं मनीषि
भिः॥३५॥ तत्राटस्थ्येन प्राणुक्तं एतदिदानीं गुहायां निहितत्वेन स्मृतमत्यो क्रमनश्वरं यच्चैतन्यरूपं
ब्रह्म तदात्म बोहि सर्वं॥ प्राणेंद्रियादि संघातः॥ प्राणस्य प्राण मित्यादि श्रुतेः॥ अतस्तदेवामृतं नाश
रहितं ऐरं सत्यं तच्च मनीषिभिर्विद्वद्भिर्वेद्धव्यं मनसा धारयितव्यं तद्विषयं मनः कर्तव्यमित्यर्थः॥३५॥
वेधेन प्रकारमाह। धनुस्तारमिति धनुस्तारं शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते॥ अप्रमत्तेन वेद्धव्यं
शरवत्तन्मयो भवेत्॥३६॥ यथा लौकिकं धनुर्लक्ष्ये शरस्य प्रवेशकारणं॥ तथात्मशरस्य लक्ष्ये ब्रह्म
णि प्रवेशकारणमित्योंकारो धनुः सर्वप्रत्यय साक्षी सोपाधिक आत्मा शरः सरवत्कृपाधिपरित्यागे
न शरवल्लक्ष्ये ब्रह्मणि स्वात्मनैव समर्प्यतेत च ब्रह्म लक्ष्यं एतैश्च धनुरादिभिः साधनैरप्रमत्तेन वि
षयतृष्णादि प्रमादरहितेनैकाग्रचित्तेन पुंसा वेद्धव्यं॥ ततः सवेधनादूर्ध्वं शरवद्यथा शरो लक्ष्येणै
की भवति तथा देहादिसाक्षित्वात् लक्ष्यमानपरित्यागेन लक्ष्यभूते न ब्रह्मणैकीभूतस्तद्रूपो भवतीत्यर्थः॥३६॥
लौकिक वेधवैलक्षण्यमाह॥ लक्ष्यं सर्वगतं चैव शरो मे सर्वतो मुखः॥ वेद्धा सर्वगतश्चैव विद्धं लक्ष्यं
न संशयः॥३७॥ लौकिकवेधस्य हि लक्ष्यं परिच्छिन्नं बाणोप्येकमुखः वेद्धा च कचिदेवावस्थितः॥ अ
नस्तस्य लक्ष्य प्राप्तिविरहः पाक्षिकः संभवति॥ अत्र तु तद्वैलक्षण्याद्बुकलक्ष्यं विद्धमेव भवतीत्यर्थः॥३८॥

आत्मानमिति

१०

प्रणवेनात्मनो ब्रह्मस्वरूपत्वज्ञानं क्रियंतरे प्रतिपादितमिति संवादत्वेन दर्शयति॥ आत्मानमरणिं कृत्वा प्रणवं चो
त्तरारणिं॥ ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवत्॥ ३८॥ इति ब्रह्मोपनिषद्याम्नातौ॥ यथाऽधरोत्त
रारणिमंथनेन निगूढं दारुमध्ये निलीनमग्निं पश्यति॥ एवं प्रणवेन ज्ञायदा पवस्योपलक्षितं नि
त्यात्ममात्मानं ब्रह्मस्वरूपत्वेनानुसंदधानः सदभ्यासवशेन तद्रूपत्वं साक्षात्करोतीत्यर्थः॥ ३९॥ ॐ कृत्वमक्षरमाभि
लक्ष्यं तावद्दुर्लक्ष्यमिति सम्यक् पुनरप्युपदिशति॥ धौरंतरिक्षं भूमिश्च मनः प्राणः स्फुरोतमा॥ यस्मिन्नोतं
तमेवैकं विधात्मानं समाहितः॥ ३९॥ अन्यां विषयां वाचं वदेत्सततमात्मिकाः॥ अन्या वाच त्यजेदेष सेतुरेवा
मृतस्य च॥ ४०॥ धौरंतरिक्षमिति॥ इदमुपलभ्यमानं त्रैलोक्यं मनस्त्वाति॥ करानीन्द्रियाणि च तत्सर्वं यस्मि
न्नक्षरे ब्रह्मणि ओतं समर्पितं समाहितं मनस्केनो विदुषा तदैवैकं ज्ञातव्यं॥ तथा च तदेकविषयामेव वाचं वदेत्॥
अन्याः सर्वा नात्मविषया वाच उत्सृजेत्॥ तत्र कारणमाह॥ एष खल्वात्मा संसारार्णवोत्तरणे नाम तस्य
प्राप्तेः सेतुरतस्तदेकविषयैव वागुच्चारितव्येत्यर्थः॥ ४०॥ स चोक्तविध आत्मा क्वोपलभ्यत इति तदाह॥
यः सर्वज्ञ इति॥ यः सर्वज्ञः सर्वविद्यो यस्यैष महिमा भुवि॥ दिव्ये ब्रह्मपुरे व्योम्न्यात्मा वः साक्षात्प्रतिष्ठितः॥ ४१॥
सर्वज्ञः सर्वविदित्येतावुक्तार्थौ यस्यैष प्रसिद्धो महिमा विभूतिर्भुवि लोके दृश्यते सोऽयं वादिमे सर्वज्ञानान
मुपलब्धिस्थानत्वात् ब्रह्मणः पुरे हृत्पुंडरीके तत्रस्थे व्योम्नि प्रतिष्ठितः॥ उपलब्धिप्रायमेतत्॥
आकाशवत्सर्वगतस्य क्वचिदवस्थानानुपपत्तेः॥ ४१॥ तस्य स्वरूपं विशिनष्टि॥ मनोमय इति॥ मनोम

१०

17

यः प्राणशरीरनेता प्रतिष्ठितः सर्वहृदंबुजांतः ॥ तद्विज्ञानेन परिमुच्यंति धीरा यद्भाति चानंदवपुः स्वभावात् ॥४३॥
यः सर्वप्राणिहृदयमध्येवस्थितभिन्नरूपः शिवः समनोवृत्तिभिरेव तत्रोपलक्ष्य इति मनोमयः प्राणशरीरनेता ॥ प्राण
रूपी यत्सूक्ष्मशरीरं तस्य स्थूलशरीरं प्रतिप्रापयिता इत्यर्थः ॥ इदं च तृतीयदक्षरं ब्रह्म स्वभावात् कारणांतरमनपेक्ष्य
दुःखाऽसंस्पृष्टं नित्यं निरतिशयानंदस्वरूपं स्वतः सर्वभासते तज्ज्ञानं विवेकिनां मुक्तिसाधनमित्यर्थः ॥४३॥ अस्य ब्र
ह्मात्मज्ञानस्य फलमाह ॥ भिद्यत इति ॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः ॥ क्षीयंते चास्य कर्माणि तस्मिन्
दृष्टे परावरे ॥४४॥ परं कारणमवरं कार्यं तदुभयरूपेणावस्थिते तस्मिन्नद्वितीये ब्रह्मणि यथावन्न दृष्टे साक्षा
ना।) त्कृते सति हृदयमनसि ग्रंथिरूपेणावस्थिता अविद्यावासना प्रचयो भिद्यते विनश्यति विद्यया अविद्यानिवृत्तेः
तत एव कारणाभावात् सर्वे ज्ञेयविषयाः संशयाः छिद्यंते ॥ अस्य च निवृत्तविपर्यासस्य छिन्नसंशयस्य विदुष इह जन्म
नि जन्मांतरे वा संचितानि अनागतजन्मापादकानि अप्रवृत्तफलानि पुण्यपापरूपाणि कर्माणि क्षीयंते ॥ तथा च
व्याससूत्रं ॥ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादिति ॥४४॥ हिरण्मय इत्यादि ॥ हिरण्म
ये परे कोशे विरजं ब्रह्म निष्कलं ॥ तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः ॥४५॥ हिरण्मये ज्योतिर्मये विज्ञान
प्रकाशसहिते असिकोशे व कूलसेपः उपलब्धिहेतुत्वेन कोश इव तस्मिन् सर्वांतरत्वात् परे एवंविध हार्दाकाशे व्यवस्थितं अवि
रजं अविद्यादिरजोमलवर्जितं ॥ निष्कलं निर्गताः कला अवयवा यस्मात् तथाविधं ब्रह्म तदेव शुभ्रं तच्च परिच्छिन्न
यत्परमिव स्वस्वरूपं तदुक्तविशेषणात् शुभ्रं शुद्धं ज्योतिषां सर्वप्रकाशात्मनामग्न्यादीनां ज्योतिः सर्वावभासकं नहि चै
तन्यप्रकाशव्यतिरेकेणाग्न्यादयः प्रकाशंते । आत्मविदो यत्तच्चैव विवेकतो जानंति तत् उक्तविधमित्यर्थः ॥४५॥ कथं

मतद्रूपा तज्ज्योतिरिति तत्प्रतिपादयति ॥ न तत्र सूर्यश्चंद्रश्च तारका विद्युतोऽनलः ॥ विभांति यं करैः साक्षात्स्वयं भाने चिदात्मके ॥ ४६ ॥
सूर्यादीनां तत्त्वावभासने कारणमाह ॥ तमेवेति ॥ तमेव स्फुरन्तं भान्तमनुभाति स्वभावतः ॥ तस्य भासा सर्वमिदं विभाति सत एव हि ॥ ४७ ॥
७१
चैतन्यस्य स्फुरणपुरःसरं हि चैतन्यस्य स्फुरणमतः पश्चाद्भासमानं तत्प्रथमभाविनश्चैतन्यस्य न प्रकाशकमिति स्थितः ॥ न चानुभानं प्र
पितस्य स्वात्माधिकमित्याह ॥ तस्य भासेति ॥ तस्य परशिवस्वरूपचित्प्रकाशेनैव सर्वमिदं तत्त्वाध्यक्षं विविधं भाति न तु तमीयत्वेने
त्यर्थः ॥ ४७ ॥ एवं तत्र सूर्यो भातीति श्रुतिं संग्रह्य तस्याः तात्पर्यगम्यमर्थमाविष्करोति ॥ न तत्र चंद्रार्केति ॥ न तत्र चन्द्रार्कवपुः प्र
काशते न वांति वाताः सकला देवताश्च ॥ स एष देवः कृतस्तमोवनः स्वयं विशुद्धो विरजः प्रकाशते ॥ ४८ ॥ एवं स्वप्रकाशचिद्रूप
स्य ब्रह्मणः सर्वजगत्कारणत्वेन पराप्तत्वमुपपादितं तदुपसंहरति ॥ ब्रह्मैवेदमिति ॥ ब्रह्मैवेदममृतं तत्पुरस्तात् ब्रह्मानन्तं
परमं चैव पश्चात् ॥ ब्रह्मानन्तं परमं दक्षिणेन ब्रह्मानन्तं परमं चोत्तरेण ॥ ४८ ॥ ४९ ॥ ननु जीवेश्वरौ संसारित्वाद्धि संसारित्वादि
धर्मभेदात् ॥ तत्पात्तपनद्विलक्षणस्वभावौ कथमनयोरैक्यमित्याशंक्य निरस्यति ॥ द्वा सुपर्णाविति ॥ द्वौ सुपर्णौ शरीरे
ऽस्मिन् जीवेशाख्यौ सह स्थितौ ॥ तयोर्जीवः फलं भुंक्ते कर्मणो न महेश्वरः ॥ प्रकाशते स्वयं भेदः कल्पितो मायया तयोः ॥ ५१ ॥ ६०
सुपर्णौ शोभनपतनौ जीवः फलमिति ॥ उपाधितादात्म्यापन्नत्वात् जीवस्तत्कर्मपुण्यपापफलं सुखदुःखात्मकं भुंक्ते ॥ ईश्व
रस्तूपाधिसंस्पर्शविरहेण कर्तृत्वाभावात् तत्फलं न भुंक्ते ॥ आत्मा भोगं विहाय केवलं साक्षिचिद्रूपेण साक्ष्यादिविक्त एव स्व
यं प्रकाशते ॥ एवं च तयोर्भेदो भोक्तृत्वाभोक्तृत्वलक्षणधर्मभेदात् प्रतिभासमानो यो भेदः स मायया परिकल्पितो न वास्तवः ॥
॥ ५१ ॥ प्रतिपादितमर्थं दृष्टान्तेनोपपादयति ॥ यथेति ॥ यथाकाशो घटाकाशमहाकाशप्रभेदतः ॥ कल्पितः परचिज्जी
वशिवरूपेण कल्पिता ॥ ५२ ॥ तत्त्वतश्चिच्छिवः साक्षात् जीवश्च स्वतः सदा ॥ यथैकमेवाकाशस्वरूपमुपाधि

141

स्तेदा घटाकाशमहाकाशप्रभेदेन कल्प्यते। एवमेकमेव चिद्रूपं ब्रह्मोपाधिगतमालिन्यशुद्धिभ्यां जीवेश्वरभेदेनैव कल्प्यते॥ परमार्थत
स्तूपाधिगतभेदपरित्यागे तु तयोरपि तयोरनादिनिधनासंवेदयस्वरूपमित्यर्थः॥ ननु ईश्वरस्य चित्सर्वविषया जीवस्य तु
परिमितविषयेति कथमनयोरैक्यं संभवतीत्यत आह॥ चिच्चिदाकार इति॥ चिच्चिदाकारतो भिन्ना न भिन्ना चित्त्वहानितः॥ ५३॥
चितिश्चिन्न चिदाकाराद्भिद्यते जडरूपः॥ भिद्यते चेज्जडो भेदश्चिदेकास्ति सर्वदा खलु॥ ५४॥ चितो ईश्वरपरिमितसर्व
विषयत्वं तु उपाधिकृतमालिन्यविशुद्धिकृतं न तु स्वरूपकृतं। अतश्चिदाकारेण जीवेश्वरयोरुभयत्राकारस्थैव चिदेकै
वा न भिन्ना। किं चाकारा भिद्यत इति वदन्नुवादाग्रहस्य॥ किं वा चिदाकारेण भिद्यते उत जडरूपेणेति विकल्प्याद्यं दूषयति॥
चित्त्वहानितः इति॥ विमता चिन्न भवति चिदाकाराद्भिन्नत्वात् कुड्यवदित्येवं चित्त्वहानिप्रसंगादित्यर्थः॥ द्वितीये तु जडस्ये
व भेदो न चित इत्याह॥ जडरूपत इति॥ ५४॥ तर्कतश्च प्रमाणाच्च चिदेकत्वे व्यवस्थिते॥ अपि पापवतां पुंसां विपरीता
मतिर्भवेत्॥ ५५॥ श्रौतस्मार्तसमाचारैर्विशुद्धस्य महात्मनः॥ प्रसादादीश्वरस्य चिदेकत्वे मतिर्भवेत्॥ ५६॥ तर्कतश्च प्र
माणाच्चेति॥ उदीरितरूपात्तर्कात् चिद्विज्ञादंसर्वं कारणतो चेत्सर्वमाद्यागमप्रमाणाच्चिदेकत्वमित्यर्थः॥ ५६॥ चिदेकत्वपरि
ज्ञानात् न शोचति न मुह्यति॥ अद्वैतं परमानंदं शिवं याति तु केवलं॥ ५७॥ चिदेकत्वपरिज्ञानादिति॥ एकस्मिन् श
रीरे विद्यमानयोर्लौकिकयोर्जीवेश्वरयोरुपाधिकृतभेदपरित्यागेन यच्चिन्मात्ररूपेणैक्यं तज्ज्ञानमेव शोकमो
हादिसंसारभयनिवर्तनेन परमानंदावाप्तिलक्षणायाः मुक्तेः कारणमित्यर्थः॥ ५७॥ एवं द्वा सुपर्णेति मंत्रस्य सर्वार्थ
व्याख्यानेन भेदपरत्वं सुदस्योक्तार्थस्य साक्षात्प्रतिपादकं समाने वृक्षे इति मंत्रं व्याचष्टे॥ शिवस्थानं इति॥ शिव
नस्थाने शरीरेऽस्मिन् तस्य तत्रापि स्वात्ममायया॥ दुःखादिसागरे मग्नो मुह्यमानश्च शोचति॥ ५८॥ स्वात्ममा
येति॥ स्वात्मना जीवोपाधिरूपतया स्वमायया मलिनसत्त्वप्रधानातया विवशो हि ततस्त्वर्थः॥ ५८॥ स्वचस्मादन्य

दा० २५

७२ तमेति ॥ स्वस्मादन्यतया भातमीशं स्वेनैव सेवितं ॥ अधिष्ठानं समस्तस्य जगतः सत्यचिद्घनं ॥ ५९ ॥ अहमस्मीति निश्चि-
त्य वीतशोको भवत्ययं ॥ अस्य चिन्मात्ररूपस्य स्वस्य सर्वस्य साक्षिणः ॥ ६० ॥ महिमानं यदा वेद परमाद्वैतलक्षणं ॥
तदैव विद्यया साक्षाद्वीतशोको भवत्ययं ॥ ६१ ॥ स्वस्मात् संसारिणोन्यतमावैलक्षण्येन भासमानं सकलसंसारिकदुः-
खजातहीनं स्वात्मनैव श्रवणमननादिभिरुपायैः सेवितं परशिवस्वरूपमेव ज्ञानं तस्योदीरितं परमाद्वैतलक्षणं
महिमानं यदा साक्षात्करोति ॥ स्वस्य सर्वस्येति । समानाधिकरणषष्ठ्यौ स्वशब्देन कारणं ब्रह्मपरामृश्यते स्वात्म-
कस्य स्वविवर्तस्य सर्वस्य साक्ष्यस्येत्यर्थः ॥ ननु नानाविजन्मापादकयोः पुण्यपापयोः सतोः तद्देवस्वात्मनो ब्रह्मरूपते-
गोचरया विद्यया संसारबन्धविनिर्मुक्तो भवतीत्यर्थः ॥ ननु नानाविजन्मापादकयोः पुण्यपापयोः सतोः स्तोत्रातिबद्ध्यात्
परया विद्यया कथं जीवस्य मुक्तिरित्याशंक्याह ॥ ब्रह्मयोनिं सदा पश्यन् रुक्मवर्णं महेश्वरं ॥ अपश्यन्नेव पश्यन्तं क-
र्तृत्वेन प्रकाशितं ॥ ६२ ॥ ब्रह्मयोनिमिति ॥ ब्रह्मणोऽपरस्य हिरण्यगर्भाख्यस्य योनिं कारणं रुक्ममिति श्रुतिगतपुरु-
षशब्दस्याख्यानं ॥ अपश्यन्नेवेति ॥ कर्मकर्तृतावेनापश्यन्नेव स्वरूपप्रकाशेन प्रकाशनाद्दर्शनक्रियाकर्तृत्वेन
प्रकाशितमित्यर्थः ॥ ६२ ॥ अनेककोटिभिः कल्पैरर्जितैः पुण्यकर्मभिः ॥ तर्कतश्च प्रमाणाच्च प्रसादात् परमेश्वरात् ॥ ६३ ॥
पश्यति श्रद्धया चापि मुदा विद्वान् सुरर्षभाः ॥ पुण्यपापविधूयायमसक्तः स्वहेतुभिः ॥ ६४ ॥ सर्वाकारतया साम्यं परमाद्वै-
तलक्षणं ॥ उपैति मात्रसंदेहः कर्तव्य श्रमनाशिभिः ॥ ६४ ॥ रुद्ररूपं परशिवं यदा स्वात्मतया पश्यति तदा सर्वविकार-
नानाविजन्मापादके संचिते पुण्यपापे विधूय तद्धेतुभूते सर्वैरपि देहेन्द्रियादिभिर्वर्ज्यैरसक्तः सन् सर्वप्रकारेण शिवसाम्य-
तद्देक्यं प्राप्नोतीत्यर्थः ॥ ६५ ॥ ननु जीवेश्वरयोर्भिन्नाचरूपयोः साम्यं तत्सोपाधिकयोः नाप्य इत्याह ॥ चिन्मात्रे-
हीति ॥ चिन्मात्रे हि सतारूपमुभयोः शिवजीवयोः ॥ तथापि विरूपं साम्यं चिन्मात्रे भेदवर्जिते ॥ ६६ ॥

२७ सास्ति ६ ७२

चिन्मात्ररूपेण तयोर्भेदो नास्तीति प्रागुक्तं साम्यं च भेदापेक्षमिति न तत्र युक्तमित्यर्थः॥ ६६ ॥ द्वितीयं प्रत्याह। उपाध्युपयुक्तरूप
इति। उपाध्येयुक्तरूपेण तु तयोः साम्यं भवेद्यदि। तदापि नैव साम्यं स्याज्जीवस्य परमात्मनः॥ ६७ ॥ नैव साम्यं स्यादि। सोपाधिकयोः
किंचिदंशं वेशत्वादियोगेनात्यंतवैलक्षण्यात्सुतरां न साम्यं स्यादित्यर्थः॥ ६७ ॥ सोपाधिकयोः साम्यानुपपत्तिं दृष्टांतेनोपपादय
ति। महाकाशस्य घटपटाकाशस्य सर्वथा। यथा साम्यं नास्ति तथा साम्यं न जीवस्य शिवेन तु॥ ६८ ॥ महाकाशेति॥ ६८ ॥ एवं जी
वेश्वरस्वरूपपर्यालोचनया साम्यमाक्षिप्य कारणपर्यालोचनया तदाक्षिपति। अस्तु वेत्याहो। अस्तु वा साम्यमीशेन जीवस्या
स्य तदापि तु। कर्मणा विद्यया वैतत्साम्यं सिध्यति नान्यथा॥ ६९ ॥ तत्साम्यकरणं किं कर्म उत विद्येति विकल्पाद्यं निराकरोति।
कर्मणा चेदिति। कर्मणा चेद्विनाशः स्यात्कर्मसाध्यं हि नश्वरं। विद्ययैव तु चेत्साम्यं पुरस्तादेव चास्ति हि॥ ७० ॥ कार्यस्यानित्य
त्वव्याप्तत्वादित्यर्थः। द्वितीयं तु विद्याया अनुपयोगमाह। विद्ययेति। ज्ञानं हि प्रागेव स्थितस्य साम्यस्य ज्ञापकं न तु कारकं।
तथा च तत्साम्यं प्रागेवाऽनयोर्विद्यत इति न तद्विद्याफलं भवतीत्यर्थः॥ ७० ॥ ज्ञानस्य बोधकत्वमेव न तु कारकत्वमित्येतद्विषयी
तत्र प्रसिद्धमिति दर्शयति। पुरस्तादेवेति। पुरस्तादेव सिद्धस्य बोधकं खलु वेदनं। अभूतार्थस्य चोत्पत्तिं न करोति कृ
चन॥ ७१ ॥ एवमाक्षेपे सिद्धांते स्वाभिमतं तत्साम्यं ब्रूते। तत्रैवमिति। तत्रैवं सति साम्यं तु तयोः सर्वात्मनैव तु। पुरस्ताद
व चास्त्येव तदा हि शिवजीवयोः॥ ७१ ॥ तुशब्दः पक्षं व्यावर्तयति। यद्यपि न सर्वात्मना समं तत्तदेवेत्यैक्यलक्षणं भेदनिरपे
क्षमीदृग्विधं साम्यमत्र विवक्षितुं न सादृश्यं येन भेदाभावात्साम्यं नोपपद्यते इत्यर्थः॥ ७२ ॥ यत्तु साम्यस्य विषयाश्राव्य
स्येव पुरस्तादेव तस्यादित्यापादनं तदिष्टमेवेत्यंगीकरोति॥ ७२ ॥ लक्षणे कस्त्वत इति। चिन्मात्ररूपस्यात्साक्षिणः सर्वसाक्ष्य
स्फुरणहेतुत्वेन सर्वदा सङ्गावास्यैमास्पदतया सुखरूपसाध्यस्य ज्ञानानंदैकरसत्वं परशिवस्येव। सत्यं ज्ञानमनंतमि
ति श्रुत्या तादृगूपत्वं प्रतिपादितमिति। योर्लक्षणे कस्त्वं तस्मात्समानलक्षणयोगित्वात्तयोरेकत्वं सर्वदा सिद्धमित्यर्थः॥

स्वम

स्वट पुरस्तादेवेति। पुरस्तादेव चैकत्वं लक्षणे कस्तनोऽस्ति च। तथा सति शिवो भिन्नो विषयाभिन्नव
स्तुतः॥ ७३ ॥

भाविद्ययाभिन्नवदिति। अविद्यया हि स्वतो मिथ्याभूतापरशिवस्वरूपस्य न पारमार्थिकं भेदमावहतीति श्रुतेरर्थः॥ ७२॥ वि
द्ययाऽतद्विनाशेन स्वसाम्यं याति नान्यथा॥ अतः साम्यं तयोः साक्षादैक्यमेव न चेतरत्॥ ७४॥ विद्ययाऽविद्यानिवृत्तौ स्वतः सि
द्धमैक्यमेव जीवेश्वरयोरवशिष्यते। तदेव साम्यं ब्रह्मभावेनावस्थितमिति निगमयति। अत इति॥ ७४॥ प्राणो ह्येष इति वाक्य
स्यार्थं नास्य यतः संगच्छतीति। स्वमिति। एवं जीवः स्वकं रूपं शिवं पश्यति चेद्धृदि॥ स्वात्मन्येव रतिं क्रीडामन्यत्कुरुते सदा॥ उक्तश्री
स्यापि जीवस्यात्मनो निष्कृपं च शिवरूपं ततो निर्विचिकित्सं साक्षात्करोति तदा च स्वांतराभावात्स्वात्मविषयैव क्रीडादिकं
तस्य विदुषो भवतीत्यर्थः॥ अन्यच्चेति। ध्यानपूजादिकर्मेत्यर्थः॥ ७५॥ क्रियावानिति पदं व्याचष्टे। बहिरिति। बाह्येष्व
चमय्ये वा शिवे सत्यसुखात्मके। इति जानाति सर्वं तु स्वात्मनैव हि भासतो॥ ७६॥ स्वात्मनैव स्वयं स वं यदा प्रपञ्चनिर्भयः॥ न
मुक्तो न मुक्तश्च बद्धस्यापि विमुक्तता॥ ७७॥ हस्तपादादिचलनरूपा या बाह्यक्रिया सापि मत्तो नातिरिक्तेति जानतो न किंचित्क
र्तव्यमवशिष्यत इत्यर्थः॥ तदा मुक्तो न मुक्तश्चेति। बंधस्याविद्यामयत्वान्मोक्षोऽपि तादृश इति। परमार्थदृष्ट्या तु मुक्तत्व
मपि तस्य नास्तीत्यर्थः॥ अत एवोक्तमाचार्यैः॥ न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः॥ न मुमुक्षुर्न वै मुक्त इत्येषा परमा
र्थतेति॥ ७७॥ अथ परविद्योत्पत्तौ सहकारि साधनं प्रतिपादकं सत्येन लभ्यस्तपसेति मंत्रं संगच्छति। एवंरूपेति। एवं
रूपा परा विद्या सत्येन तपसापि च। ब्रह्मचर्यादिभिर्धर्मैर्लभ्या [illegible] वेदान्तवर्त्मना॥ ७८॥ सत्ये मया वचनपरित्यागः
तपश्चैकाग्र्यं तथात्मदर्शनानुकूलं न तु कृच्छ्रचांद्रायणादि। अत एव स्मर्यते। मनसश्चेंद्रियाणां चैकाग्र्यं तप उच्यते
इति। ब्रह्मचर्यादिभिरित्यादिशब्देनाहिंसास्तेयादियोगांगस्य संग्रहः॥ वेदांतवर्त्मनेति श्रोतव्यो मंतव्यो नि
दिध्यासितव्य इत्यनेन प्रकारेणेत्यर्थः॥ ७८॥ शरीरांतरिति। शरीरांतः स्वयंज्योतिः स्वरूपं स्वकमीश्वरं। क्षीणदोषाः प्रपश्यं
ति नेतरे माययावृताः॥ ७९॥ श्च शरीरमध्ये हृत्पुंडरीक इति यावत्। क्षीणदोषा इति। कामक्रोधादयः क्षीणा न मालिन्यापाद

देषास्ते क्षीणाः प्रज्ञान्ता ये पापा तेन योक्ताः॥ सत्समेव कृपतिनान्नत इति॥ वाक्यस्यार्थमाह॥ नेतर इति॥ मायाख्यावृतरू
पा अतत्सत्यावतारीकृताः स स्वरूपप्राप्त्या स्वयं नेइष्टं भवतीत्यर्थः॥ बृहच्च तद्दिव्यमिति मंत्रं तात्पर्यतः संगृह्णाति॥ एवं स्व
पमिति॥ स्वस्वरूपमिति॥ तिरस्वं रूपपरिज्ञानं यस्यास्ति परेभ्यो भिन्नः॥ कुत्रचिद्गमनं नास्ति तस्य संपूर्णरूपिणः॥८॥ स्वात्मनो
परिच्छिन्नपरक्रीवरूपत्वं विदुर्योगमनादिकं न संभवति॥ नस्य परिच्छिन्नेष्वर्मत्वात्॥८॥ एतदेवद्दृष्टांतेनोपपादयति॥
आकाशमिति॥ आकाशो यथैव संपूर्णं कुत्रचिन्नैव गच्छति॥ तद्वत्स्वात्मा विभुत्वेन कुत्रचिन्नैव गच्छति॥८॥ यदेतत्स्वा
त्मनः परिपूर्णचिद्रूपत्वं तदुपलब्धौ सहकारिसाधनं सत्यादिकमुपदिष्टमधुना तत्साधारणं कारणमुपदिशति॥
न चक्षुषेति॥ न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा॥ ज्ञानप्रसादेन विशुद्धसत्त्वः ततस्तु तं पश्यते निष्कलं ध्यायमानः॥ इति मंत्रस्य
तिरूपमैत्री॥८॥ रूपादिरहितत्वाच्चक्षुराद्यविषयत्वं॥ नान्यैर्देवैरिति॥ चक्षुर्वागादिरिक्तैरिन्द्रियैरित्यर्थः॥ न तपसा
कृच्छ्रचान्द्रायणादिना॥ कर्मणाग्निहोत्रादिरूपेण॥ ननु चक्षुरादिभिर्न गृह्यते चेत्कथं तर्हि तदुपलब्धिस्तत्राह॥ ज्ञा
नप्रसादेनेति॥ विशुद्धसत्त्वः शुद्धान्तःकरणः पुरुषो ज्ञानप्रसादेन विषयेन्द्रियसंसर्गजनितरागादिमलकृतकालुष्य
विरहे सति ज्ञानस्य यः प्रसादः आदर्शवत्स्वच्छता तेन स्वकीयं सर्वोपाधिविनिर्मुक्तं परमेश्वरं रूपं साक्षात्करोति॥८॥
विशुद्धसत्त्वस्य सगुणध्यानमपि निष्कलज्ञानोत्पत्तौ कारणमित्याह॥ ध्यानेन परमेश्वरस्य सांबमूर्तिधरस्य चो
स्वानिष्कलपरिज्ञानं जायते नान्यहेतुना॥८॥ ध्यानेनेति॥८॥ एषोऽणुरात्मेति वाक्यस्यार्थं संगृह्णाति॥ एष आत्मेति॥ ए
ष आत्मा सुसूक्ष्मोऽपि वेदितव्यो ध्यायिना॥ पंचधा संनिविष्टो यस्मिन् सर्वाश्रयः सुरः॥८॥ सर्वजगत्कर्तृत्वेन ना
स्य देयस्मिन्नदेहरमध्यावस्थिते परमात्मा स्वसुः प्राणः प्राणापानादिपंचवृत्तिभेदेन प्रविष्टवान्॥ एष आत्मा वक्ष्ये
रके पाचिवरात्सुसूक्ष्मोऽपि ज्ञानप्रसादेन हेतुभूतेनैकाग्र्येण मनसा पूर्वोक्तप्रकारेणापरिच्छिन्नपरचिद्वस्तुरूप
त्वेन ज्ञातव्य इत्यर्थः॥८॥ एवमुक्तलक्षणं सर्वात्मानमात्मत्वेन प्रतिपन्नस्य सर्वावाप्तिलक्षणं फलमाह॥ सर्वकाती

स्व ४

146

यस्मादेवं सर्वे कामा विदुषः स्वरूपभूतास्तस्मात्तस्येश्वर्याभिरतस्यापि भक्तस्य न फलावाप्तिः सिध्यतीत्यर्थः ॥ ८६

ति ॥ संविभाति संचिन्तयति नयं यं लोकं विशुद्धधीः ॥ सदा कामयते यांश्च तं जयत्यखिलं ततः ॥ ८५ ॥ एवं विशुद्धधीर्विद्वान्स यदि पितृलोककामो
स्स वतीत्यादिश्रुत्यंतरप्रतिपादितं यं यं लोकं मनसा संभावयति यांश्च तत्तत्कामान्कामयते तस्य सर्वस्य स्वात्मनाऽनन्यत्वेन तत्सर्वमिहैव लभत एवमा
प्नोतीत्यर्थः ॥ ८५ ॥ तस्मादात्मविदं साक्षात्स्वयं भावतारकं ॥ अर्चयेद्भूतिकामस्तु स्वशरीरेण वा यतिः ॥ ८६ ॥ उदाहृतमात्मतत्त्वमुक्तेण
यद्यतिरिक्तेनान्येन न तावच्छक्यत इति दर्शयति ॥ नायमिति ॥ नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ॥ यमेवैष वृणुते
तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वां ॥ ८७ ॥ प्रवचनेन वेदशास्त्रार्थपठनेन ॥ न मेधया ग्रंथार्थधारणया शक्त्या ॥ बहुना श्रु
तेन बहुशः श्रवणेन ॥ एतैरुपायैर्न लभ्यो न लब्धुं शक्यः ॥ केन तर्हि लभ्य इति ॥ उच्यते ॥ एष विद्वान् यमेवोक्तविधं परमात्मानं वृणु
ते प्राप्तुमिच्छति तेन कारणेन सा आत्मा लभ्यो न साधनांतरेण ॥ तस्य श्रवणमननादिभिस्तमात्मानं प्रार्थयमानस्य विदुष एष आ
त्मा स्वविद्याछन्नां स्वकीयां तनुं विवृणुते प्रकाशयति ॥ श्रवणादिसाधनजनितया विद्यया तदविद्यानिवृत्तौ तत्स्वरूपमाविर्भव
तीत्यर्थः ॥ ८७ ॥ आत्मप्रार्थनासहायभूतानि च बलादीनि च संपादनीयान्याह ॥ नायमिति ॥ नायमात्मा बलहीनेन लभ्यः प्रमा
दतस्तपसो नाप्यलिंगात् ॥ एतैर्यत्नं यः करोत्येव धीमांस्तस्यात्मायं विशते ब्रह्मधाम ॥ आत्मनिष्ठाजनितं वीर्यं बलं तद्रहिते
न ... पुत्रपश्वादिविषयसंगनिमित्तात्प्रमादादनवधानात् ॥ अन्यलिंगात् उत्तमाश्रमलिंगरहितात् ॥
नपुंसकं नासौ लभ्यः ॥ तथा ... तपांसि विशिष्टाश्रययुक्तानि तदधिगमेनांतर
तपस्तपोवज्ञानं तथा विधात्मज्ञानादपि नासौ ज्ञातुं शक्यते ॥ एतैर्यत्नमिति ॥ एतैरुक्तैर्बलादिभिरित्यर्थः ॥ तस्मा
गसाधनानीत्यर्थः ॥ एतैरुपायैर्यतते ... इति वाक्यसंग्रहाति ॥ ... तस्य विदुषोयमात्मा साक्षिचिन्मात्ररूपो यत्धाम तेजोरूपमपरिच्छिन्नं ब्रह्मविश
यमात्मायमिति ॥ बलादिभिर्यतमानस्य तस्य विदुषो यमात्मा सा ... ॥ संप्राप्यैनमिति ॥ संप्राप्यैनमृषयो ज्ञानतृप्ताः कृतात्मानो वीतरागाः प्रशां
ते प्राप्नोतीत्यर्थः ॥ ८८ ॥ विदुषस्तत्प्राप्तिप्रकारमाह ॥

७४ न्याने परमा सं श्रु

147

विदुषस्तस्याप्तिप्रकारमाह ॥ संप्राप्यैनमृषयो ज्ञानतृप्ताः कृतात्मानो वीतरागाः । ते सर्वगं सर्वतः प्राप्य धीरा युक्तात्मा
नः सर्वमेवाविशंति ॥ ८८ ॥ एवमात्मानं संप्राप्य सम्यक्ज्ञानेनावाप्य ऋषयो दर्शनवंतस्तेनैव ज्ञानेन तृप्ताः कृतात्मा
नः कृतनिश्चयाः वीतरागाः रागमोहादिसंसारिकदुःखरहिताः प्रशांताः उपरतेंद्रियाः ॥ ते आत्मविदः सर्वग
माकाशवत्सर्वगतं सर्वप्रकारेणापि प्राप्य उपाधिकृतं परिच्छेदं विहाय धीराः विवेकिनः संतो युक्तात्मानो नित्यसमाहि
तमनस्काः शरीरपातकालेऽपि भिन्नघटाकाशवदविद्याकृतोपाधिपरिच्छेदनाशेन सर्वात्मकमपरिच्छिन्नं ब्रह्मैव
विशंति ॥ वेदांतविज्ञानेति ॥ वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः ॥ ते ब्रह्मलोकेषु परांतका
ले परामृतात्परिमुच्यंति सर्वे ॥ ९० ॥ तत्त्वमस्यादिवेदांतमहावाक्यजनितं ब्रह्मात्मैक्यविषयं यद्विशिष्टं ज्ञानं तेन सु
निश्चितः उद्दीपितरूपार्थो येषां ते तथोक्ताः ॥ संन्यासयोगात्सर्वकर्मपरित्यागेन केवलब्रह्मनिष्ठाः स्वरूपाद्योगा
धनयोयतनशीलास्तत एव शुद्धांतःकरणा एवंभूतास्ते सर्वे परांतकाले भूतभौतिककार्यापेक्षया परं तत्कारणमज्ञा
नं तस्य नि[illegible] समुपजातात्परामृतात् ॥ निरतिशयामृतत्वसाधनात् ब्रह्मलोके लोक्यत इति लोकः ब्र
ह्मैव लोको ब्रह्मलोकः स्वस्वरूपतयालोक्यमानं ब्रह्माणि परिमुच्यंति परितः सर्वस्मादपि संसारबंधनान्मुच्यंते ॥ अत्रास्थिता
एव ज्ञानेनोपाधिविलये विलयं संति घटाकाशादिवदपरिच्छिन्नब्रह्मरूपतामजंत इत्यर्थः ॥ ९० ॥ तस्य मुक्तस्य प्राणा
द्याः कलाः कथं भवंतीत्येतत्प्रतिपादयति ॥ गताः कला इति ॥ गताः कलाः पंचदश प्रतिष्ठा देवाश्च सर्वे प्रतिदेवतासु ॥
कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवंति ॥ ९१ ॥ ताश्च प्रश्नोपनिषदि षोडश कलाः अभवन्निति प्रस्तुत्या
म्नायंते ॥ स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मंत्राः कर्म लोकाः लोके
षु च नाम चेति ॥ ताश्च प्राणाद्याः कलाः संसारिणो देहांतरारंभहेतवः विदुषस्तु मुक्तिसमये नामरूपे इति कास्ताः स्वस्वदेवताः

कळाः प्रतिष्ठाः द्वितीयार्द्धं वचनांतमेतत् स्वस्वकारणं गतास्तत्र प्रलीना भवंतीत्यर्थः॥ यानि चानारब्धफलानि कर्मा
णि यश्च विज्ञानमयो विज्ञानप्रायो बुध्याद्युपाधिविशिष्टः कर्तात्मा ते सर्वे अव्यये नाशरहिते विकारजातासरे अद्वि
तीये ब्रह्मणि एकीभवंति॥ यथा जलभाजनानि नदीपात्रापनयेन तु जलाः सूर्यप्रतिबिंबाः सूर्ये इति दृष्टित्यर्थः॥१॥ उक्तमे
कीभवं दृष्टान्तेनोपपादयति॥ यथा नद्य इति॥ यथा नद्यः स्यंदमानाः समुद्रे अस्तं यांति नामरूपे विहाय॥ तथा
विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषं ब्रह्म याति॥१२॥ नामरूपादिति॥ देवदत्तो यज्ञदत्त इत्यादिनामरूपात्तरत्ति
रूपेस्थूलगौरीशादिलक्षणमुपाधिभेदहेतोस्तस्माद्विमुक्तो विविक्तः सन्न्यासस्वकार्यया पेक्षत्वात् परं मायातत्
परं पुरुषं पूरि शायं पूर्णं ब्रह्मस्वरूपं प्राप्नोति॥१३॥ जीवब्रह्मभेदस्याविद्यामात्रनिबंधनत्वात् तन्निवृत्तौ च वि
द्यातिरिक्तसाधनानपेक्षाद्वैदनमात्रेण कंठगतचामीकरवद्ब्रह्मप्राप्तिः सिध्यतीति दर्शयति॥ सयो ह वाइति
सयो ह वै तत्परमं ब्रह्म वेद स ऋषिसत्तमाः॥ ब्रह्मैव भवति ज्ञानान्नोऽस्ति संशयकारणम्॥१४॥ नास्या ब्रह्मवित्कुले
भवति तस्यार्थमाह॥ सुनिश्चितमिति॥ सुनिश्चितं परं ब्रह्म वेद चेत्स्यात् तु भवति ततः॥ कुले भवति नाब्रह्मवित्
स्य सुरपुंगवाः॥१५॥ ब्रह्मविदः कुले यो यो जायते स सर्वोऽपि ब्रह्मविदेव भवतीत्यर्थः॥१६॥ शोकं तरतीत्यादि॥ शो
कं तरति पाप्मानं गुहाग्रंथिं विनश्यति॥ अमृतो भवति प्राहुः सत्यमेव मयोदितम्॥१७॥ शोकमनेकैर्वैत्यनि
त्तं मानसं तापं तरति॥ जीवन्नेव तिक्रमति॥ पाप्मानं संसारहेतुभूतं धर्माधर्मं तरति॥ गुहाग्रंथिं हृदयस्थो
विद्यावासनाग्रंथिः सोऽपि विनश्यति॥ एवं प्राज्ञोऽपि मुक्तः स्वयं तत्र विषयाऽमृतत्वं प्राप्नोतीत्यर्थः॥१८॥
प्रतिपादितमुपनिषदर्थं निगमयति॥ सर्वमुक्तमिति॥ सर्वमुक्तमिति शौनकं मया शौनकमोहपटलस्य भेदकं
आमुक्षस्य सुखबोधवस्तु दं वेदमानविरतस्य भास्वतो॥१९॥ ॥इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञवैभ
वखंडे ब्रह्मगीतासूपनिषत्सु सप्तमोऽध्यायः॥७॥ ॥इति श्रीमत्कोटीविभास श्रीक्रियाशक्तिपरमभक्त

श्रीमच्छंकरपादाब्जसेवापरायणेन उपनिषन्मार्गप्रवर्तकेन माधवाचार्येण विरचितायां सूतसंहितातात्पर्यदीपि
कायां यज्ञवैभवखंडस्योपरिभागे ब्रह्मगीतासूपनिषत्सु सप्तमोऽध्यायः॥७॥ ॥अथ कैवल्योपनिषदोऽपु रूब्रह्मा
त्मैक्यपरत्वं दिदर्शयिषुस्तां संग्रहाति॥ आसीनं त्वामित्यादिना॥ ॥ब्रह्मोवाच॥ ॥आसीनं त्वं परं साक्षाद्धिरंरुद्रादिसं
ज्ञितं॥ तदवश्यं महामासाद्दितव्यं मनीषिभिः॥१॥ तद्धि यामतीनैः सेव्यानि गूढानीव श्रुत्यभेना॥ अचिरात्सर्वपापघ्नी
परब्रह्मप्रदानां॥ २॥ ब्रह्मविष्णुरुद्रादिसंज्ञितामिति॥ निरतिशयानंदरूपं त्वाच्छिवइति। रूसंसारदुःखं तस्य द्रावकत्वा
द्रुद्र इत्येतादृशीं संज्ञां प्राप्तामित्यर्थः॥ एवंविधायां विषये प्रतिज्ञायां तस्यामधिकारिणं प्रयोजनं च क्रमेण दर्शयति।
तदवश्यमित्यादिना। एवं हि श्रूयते॥ अथाश्वलायनो भगवंतं परमेष्ठिनं परिसमेत्योवाच॥ अधीहि भगवन्ब्रह्मविद्यां व
रिष्ठां सदा सद्भिः सेव्यमानां निगूढां ययाऽचिरात्सर्वपापं व्यपोह्य परात्परं पुरुषं याति विद्वानिति। एवं सर्वत्र वक्ष्यमा
णोऽप्यर्थः श्रुतिरनुमेया॥ ३॥ तस्याः परविद्यायोऽपमत्तावनुकूलसाधनान्युपदिशति॥ श्रद्धयेति॥ ॥श्रद्धया च
महाभक्त्या ध्यानेन च सुरोत्तमाः॥ योगेन च परा विद्या लभ्या सा नैव कर्मणा॥ ४॥ न प्रजाभिर्न चार्थेन त्यागेनैषां सुर
र्षभाः॥ श्रद्धा गुरुपदिष्टेऽर्थे विश्वासः॥ भक्तिः सर्वदा तत्र तात्पर्यं। तस्मिन्नुपदिष्टेऽर्थे अज्ञानीय प्रत्यय प्रवाहो ध्यानं॥ वि
विक्तदेशे च सुखासनस्थ इति श्रूयमाणो वक्ष्यमाणस्वरूपो योगः॥ एतत्सर्वं परविद्याप्तौ साधनं॥ इदानीं विधसा
धनसंपन्नस्य ईषणात्रयपरित्याग एव मोक्षसाधनं नान्यदिति दर्शयति॥ सा नैवेति। कर्मणा यज्ञदानादिना। प्रजा
भिः पुत्रपौत्रादिभिः॥ अर्थेन धनेन एतानि नित्यानित्यफलसाधनानि॥ परविद्यालंतथा विधेति एषां कर्मादीनां म
ध्ये न च प्राप्येत्यर्थः॥ ५॥ ॥ अथ परविद्याप्राप्त्याव साधारणाभिधानपुरःसरमधिकारिणस्तथा प्राप्यं फलमाह॥

ये वेदांतेति। ये वेदांतमहावाक्यश्रवणोत्पन्नविचयथा॥४॥ सुनिश्चितार्था यतयो विशुद्धहृदयाश्चरां। अस्त्वद्वये त्वारीरे त्रिमन्नंतकाले पवस्य
तु॥५॥ अज्ञानाख्यस्य ते सर्वे मुच्यंते हि परामृताः॥ ॥उक्तार्थमेतत्कृते ध्याये॥ ॥५॥ एवं विषयप्रयोजनसाध्यनाधिकारिभिः सह विद्यास्व
रूपदिष्टं अथ तत्साधनभूतं योगमुपदिशति॥ अतइत्यादि॥ अतो विद्याप्तिसिध्यर्थं मुमुक्षुर्मतिमत्तमः॥६॥ विविक्तदेशमाश्रित्य सुखासीनो मका
सुचिः॥ समग्रीवशिराकायः सितभस्मावगुंठितः॥७॥ इंद्रियाणि समस्तानि निरुध्य सुपुरपुंगवाः॥ प्रणम्य स्वगुरुं भक्त्या विचिंत्य हृदयांबुजं॥८॥
विशुद्धं विरजं तस्य मध्ये विशदमीश्वरं॥ अनंतं सूक्ष्ममव्यक्तमचिंत्यं संसर्वजंतुभिः॥९॥ विशुद्धं विरजमिति। विषयवैलक्षण्येन तद्रूपभोगजूनि
तत्कालुष्यराहित्याद्विरजं निर्मलमत एव विशुद्धं हृदयांबुजमिति संबंधः॥ तस्मिन्हृदयकमले मध्ये नुसंधेयं वस्तु संदर्शयति॥ विशदनिर्मले॥
विशुद्धसत्त्वप्रधानमायोपाधिवशादीश्वरं॥ अनंतमंतो विनाशस्तद्रहितमत एव सूक्ष्मं॥ शब्दस्पर्शादीनामभिव्यक्तिहेतूनामभावादव्यक्तिहेत
नामभावादव्यक्तमत एवासंतं निर्विकल्पकत्वान्मनसाप्यचिंत्यः॥९॥ शिवं प्रशांतममृतं वेदयोनिं सुरर्षभाः॥ आदिमध्यांतनिर्मुक्तमेकं साक्षाद्वि
भुं तथा॥१०॥ परानंदरूपतया शिवं मंगलं प्रकं॥ संसारसंस्पर्शविरहान्निर्मलरागसमुद्भवस्त्रांतं॥ अमृतममृतत्वसाधनभूतं॥ वेदयोनिमि
ति श्रुतिगतब्रह्मपदस्य व्याख्यानं॥ आदिमध्यांतनिर्मुक्तमादौ मध्ये चांते चावस्थितेन वस्त्वंतरेण परिच्छेदकेन विनिर्मुक्तं॥ एकमद्वितीयं॥
विभुं सार्वं व्यापकं॥१०॥ अरूपं सच्चिदानंदमद्भुतं परमेश्वरं॥ उमासहायमीशं प्रभुं साक्षात्त्रिलोचनं॥११॥ नीलकंठं प्रशांतं तं ध्यायेन्निमु
सुमं तद्वितः॥ अरूपं लौकिकाकाररहितं॥ एवं तटस्थेन प्रतिपादितस्य स्वरूपप्रतिपादनं सच्चिदानंदमिति॥ उमासहायस्त्वशक्त्यासह
तं॥ साक्षिपरशिवस्य स्वरूपानतिरेकिणीति प्रतिपादितमत एव ॐमर्थं प्रणवप्रतिपाद्यं शिवशक्तिवाचकस्य सोहमिति परमात्म
मंत्रस्य सकारहकारयोर्लोपे सति प्रणवस्यैव प्रसन्नत्वात्॥ उक्तं स्वाचार्यैः॥ सकारं च हकारं च लोपयित्वा प्रयोजयेत्॥ सोपि चैवं स्वरूपं
पारख्यं ततोसौ प्रणवो भवेदिति॥ एवं निष्कलंकं निरूपमममभिध्याय ध्येयत्वेन लीलाविग्रहमुपदिशति॥ त्रिलोचनमिति॥११॥ एवं ध्या
नपर इति॥ एवं ध्यानपरः साक्षान्मुनिर्ब्रह्मात्मविद्यया॥१२॥ भूतयोनिं समस्तस्य साक्षिणं तमसः परं॥ गच्छेत्सेनैव संदेहः स समुत्क्रम

याभुराः॥१३॥ उक्तविधं परशिवस्वरूपं त्वकीयहृदयांबुजे ध्यायतः आत्मनस्तद्रूपतया ध्याकारेण विमदादिभूतत्त्वोति कस्य सर्वस्य जगतः कारणां तस्य सर्वस्य साक्षिणं तमसोमसः परं एवंविधं परं शिवस्वरूपं प्राप्नोति॥ १४॥ तस्य ध्येयत्वेनोपदिष्टस्य परशिवस्वरूपस्यैक मद्वितीयत्वं सार्वात्म्येन प्रतिपादयति॥ योयमिति॥ योयं ध्येयत्वे विज्ञेयः शिवः संसारमोचकः॥ स ब्रह्मा स शिवः सेन्द्रः सोक्षरः परमः स्वराट्॥ १५॥ स एव विष्णुः स प्राणः स कालोऽग्निः स चन्द्रमाः॥ स एव सर्वं यद्भूतं यच्च भव्यं सनातनं॥ १५॥ स एव विद्याविद्याच न ततोन्यत् किंचन॥ ज्ञात्वा तं मृत्युमत्येति नान्यः पंथा विमुक्तये॥ १६॥ ब्रह्मादिदेवतारूपेण परशिव एकः एवो व्यपदिश्यते अतोस्मात् नपृथग्भूतः सत्तथाविधः परशिवः अक्षरनामापि तिलातिब्रह्मेन्द्रादीनामपि कारणं परमः स्वराट् स्वयमेव राजमानः स्वतंत्रः अन्येलु तत्परतंत्रा न तु स्वराजः॥ किं बहुनादृश्यं सर्वं जगद्भूतमतीतकालावच्छिन्नं तद्भव्यमागामिकालावच्छिन्नं तदुभयमपि तत्स्वरूपान्नातिरिक्तं एवं परशिवस्वरूपव्यतिरिक्तस्य कस्यचिदप्यभावात् अनन्तरूपत्वं ज्ञानेनैव मृत्युमुपयतीति दर्शयति॥ ज्ञात्वेति॥ मृत्युमरणं जन्मादि लक्षणं संसारं॥ १६॥ सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि॥ संपश्यन् ब्रह्म परमं याति नान्येन हेतुना॥ १७॥ सर्वभूतस्थमिति॥ भूतशब्दोपलक्षितं स्य प्रतिष्ठितत्वात् सर्वभूतस्थमात्मानं सर्वत्र कारणत्वेनावस्थितमात्मानं पश्यति॥ आत्मनि च कल्पितत्वात् सर्वभूतानि तानि सर्वाणि तानि पश्यति एवं सार्वात्म्यं पश्यन् अनेनैव ज्ञानेन तदद्वितीयं परं ब्रह्म प्राप्नोति॥ १७॥ ननु चोदितविधाज्ञानोत्पत्तिः श्रुतिबंधकपापप्रबाहुल्यान्न संभवतीत्याशंक्य तन्निरसनोपायमाह॥ आत्मानमिति॥ आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिं॥ ध्याननिर्मथनाभ्यासात् पाशं दहति पंडितः॥ १८॥ उक्तार्थमेतस्मिन् ध्यायेत् ब्रह्मध्यानस्य पापक्षयहेतुत्वं स्मृतावपि प्रसिद्धं॥ उपपापेषु सर्वेषु पातकेषु महत्सु च॥ प्रविश्य रजनीपादं ब्रह्मध्यानं समाचरेदिति॥ १८॥ जाग्रदाद्यवस्थासु सुखदुःखोपभोक्ता संसारी जीवः ईश्वरस्तत्साक्षी तथा विधयोः ईश्वरस्य कथमनयोरैक्यमित्यत आह॥ स एव भगवानीशो मायया वा मितत्तया॥ मुच्यमानः इव स्थित्वा स्वस्वान्तं ब्रह्मैव केवलं ननु॥ १९॥ शरीरमिर

स्मा ४

नर

सर्व

मास्पणयकरोतिसकलंपुनः॥जाग्रत्संज्ञमिदंधामप्रकल्प्यस्वीयमायया॥२०॥राजपुत्रादिवत्तस्मिन्क्रीड
याकेवकेहरः॥अन्नपानादिभिश्चित्रैर्भिस्त्रीसिमेतिसुखंभाः॥२१॥स्वप्नकल्पितयात्राभुजीवत्वेनप्रकाशितः॥सुखदुः
खादिकाभोगान्भुंक्तेस्वेनविनिर्मितान्॥२२॥ सारखेवेति॥सुषुमान्तरवेति। नतुपरमार्थतस्तस्यमोक्षः सं भा
वइतीचशब्दार्थः॥२२॥सुषुप्तिकालेसकलेविलीनेतमसावृतः॥स्वस्वरूपमहानंदंभुंक्तेरूपविवर्जितः॥२३॥
पुनःपुर्वक्रियायोगाज्जीवत्वेनप्रकाशितः॥जाग्रत्संज्ञमिदंधामयातिस्वप्नमथापिवा॥२४॥सकलेविलीने
इति।स्वभावस्थायांहिबाह्येंद्रियरूपतेषुपिनत्तस्वाप्नपदार्थाकारेणपरिणाममानमंतः करणमपित
दपिसुषुप्तिकालेविलीयते अतः सर्वस्मिन्करणग्रामेविलीनेसतिभावरूपाज्ञानरूपेणतमसाआवृतः
सेनस्वरूपभूतमानंदमनुभूयसाक्षात्करोति अतएवहिस्वापोत्थितस्यसुखमहमस्वाप्समितिपरामर्शः
॥२४॥पुरत्रयमिदमिति॥पुरत्रयमिदंसोभोगायैवविनिर्मितं॥भोगार्थोस्यसदाक्रीडानंदुखायकदा
चन॥२५॥जाग्रत्स्वप्नसुषुप्त्याख्यंस्थानत्रयंपुरुषस्यभोगायैवपरमेश्वरमायया विनिर्मितं यर्थः नन्वीश्व
ररस्यजीवस्वरूपप्राप्तस्यतस्यस्वभोगोनयुज्यते॥अनश्नन्नन्योअभिचाकशीतिश्रुतेरित्यतआह॥
भोगार्थास्येति।स्वर्गनरकादिसकलदुःखोपभोगाप्यस्यक्रीडानंदुःखहेतुः॥२५॥ कुतइत्यतआह।
विश्वाधिकोमहानंदःस्वतंत्रोनिरुपद्रवः॥असंगःसर्वदासोऽयंरूपदुःखीभवेत्कथं॥२६॥ यस्मादसौ
विश्वस्मादपिजगतोऽधिकस्तदारोपबाधयोरधिष्ठानावधित्वेनावस्थानात्तत्त्वतोभोगोऽस्यनदुः

दुःखहेतुः ॥ किंवा परमहानंदः अस्य लेशस्तांगोन्यात्र अनिष्ठुरवानि इतोपि वैषयिकसुखेषु भोगोऽत्यल्पमात्रमित्यर्थः ॥ २६ ॥ नन्वेवमी
श्वर एव स्वतंत्रो निरुपद्रव इति ॥ पारतंत्र्यादिकं हि दुःखहेतुः अयं तदत्रावालक्षणः दुःखीज इवेत्यर्थः ॥ २६ ॥ नन्वेवमीश्वर ए
व न खलु जीवस्तु तत्परतंत्र इति तस्य वास्तव एव भोगः किं न स्यादित्यत आह ॥ स न जीव इति ॥ स न जीवः शिवादन्यो यो भुंक्ते क
र्मणां फलं ॥ सदा स्वात्मप्रकाशोऽसौ नैव कर्मफलमर्हति ॥ २७ ॥ जीवेश्वरयोर्वास्तव भेदो नास्ति तत्रावस्थितस्य चिन्मात्ररूप
स्य सदा साक्षस्य भोगाभावप्रतिपादितत्वात् ॥ किंच चैत्यं हि कर्मफलं तदपि चित्स्वरूपे अध्यस्तं चेन्न मिथ्याभूतः कथं तद्वि
षयो भोगश्चिद्रूपस्यात्मनो वास्तवः स्यादित्यर्थः ॥ २७ ॥ एवं जाग्रत्स्वप्नसुषुप्त्यवस्थासु जीवभावापन्नस्य परशिवस्य
वास्तवभोगासंभवात् तत्तदवस्थानिर्माणं तन्तु भोगार्थं सर्वोपि लीलामात्रमिति निगमयति ॥ अत इति ॥ अतः सर्वज
अतः सर्वजगत्साक्षी चिद्रूपः परमेश्वरः ॥ जीवोऽहमिति यो महानंदः क्रीडया भोगमर्हति ॥ २८ ॥ धामत्रयमिदं साक्षान्
न दुःखाय कदाचन ॥ क्रीडारामतया भाति न चोद्यो हि महेश्वरः ॥ २९ ॥ क्रीडारामेति ॥ जाग्रदादिस्थानत्रयमीश्व
रस्य केवलं क्रीडार्थमुपात्तं ॥ आत्मकामस्य तत्र प्रयोजनान्तरासंभवादतो न तस्य भोगप्रसक्तिरिति न चोदनीयमित्यर्थः ॥
॥ २९ ॥ नन्वेतत्स्थानत्रयं क्रीडारामतयापि घटते चेद्द्वैतापत्तिरित्यत आह ॥ इदमिति ॥ इदं धामत्रयं साक्षाद्विच्छेदेन न विद्य
ते ॥ शंभुरेव तथा भाति न ह्यन्यत्परमेश्वरात् ॥ ३० ॥ जाग्रत्स्वप्नसुषुप्त्याख्यावस्थारूपेण भाति यः ॥ स विश्वतैजसप्रा
ज्ञसमाख्यः क्रमतो भवेत् ॥ ३१ ॥ स विश्वतैजसेति ॥ स्वात्मन्यपरिकल्पितजाग्रदाद्यवस्थारूपसापेक्ष्यभेदात्तत्तत्सा
क्ष्यविशेषघटिततत्साक्षिचिन्मात्ररूप आत्मा विश्वतैजसप्राज्ञसंज्ञां क्रमेण लभत इत्यर्थः ॥ ३१ ॥ तेषां स्वरूपविशे
षमाह ॥ विश्वो हीति ॥ ॥ विश्वो हि स्थूलभुङ्नित्यं तैजसः प्रविविक्तभुक् ॥ प्राज्ञ आनंदभुक् साक्षी ... सुख

प्या

नसुगः ॥३२॥ जाग्रदवस्थासाक्षी विश्वाख्य आत्मा स्थूलभुक् ॥ पंचीकृतशब्दस्पर्शादिविषयः स्थूलः ॥ यदा सर्वलोकस्याधारभ्यो
नेभ्यः रमायतीनि मितो भोग्यप्रपंचः स्थूलस्तं भोक्ता ॥ तैजसस्तु स्वप्नावस्थासाक्षी ॥ प्रविविक्तभुक् प्रविविक्तो भोक्त्रंतरप्र
कवेणाविनिक्तः स्यादविद्यापरिकल्पितमसाधारणमेव विषयजातं भुंक्ते ॥ प्राज्ञस्तु सुषुप्त्यवस्थासाक्षी ॥ स विषयेंद्रियवर्गस्य
अंतःकरणेन सार्द्धं कारणेऽज्ञाने विलयादिदृक्षोपाभावेन स्वरूपेण आनंदभुंक्ते ॥३३॥ एवमस्यासंबंधत्वात एवास्य भोगः
स्वरूपतस्तु परानंदरूपः केवलः साक्षी चिन्मात्ररूपः ॥३३॥ त्रिषु धामस्विति ॥ ॥त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् ॥ ते
लः ॥ तुन्त्यं ब्रह्म यो वेद स तु ज्ञानो न लिप्यते ॥३३॥ जाग्रदादिस्थानत्रयोपि भोग्यप्रपंचस्य निरूपाधिकपरशिवरूपेऽध्य
स्तत्वेन मिथ्यात्वाद्भोक्तृभोगादिप्रपंचस्य धर्मीगमेसतितरनन्यत्वाद्भोक्तृभोग्यात्मकमनुत्तमम्पब्रह्मैवेति विजानतो भोगजनितपुण्यपापकृतलेपो न स
वतीत्यर्थः ॥३३॥ ॥ एतदेव विवृणोति अश्वमेधेति ॥ ॥अश्वमेधसहस्राणि ब्रह्महत्याशतानि च ॥ कुर्वन्नपि न लिप्यते यद्येकत्वं प्र
पद्यति ॥३४॥ ३४ ॥ ॥एवमेकत्वज्ञानस्य फलमुक्त्वा तदेकत्वमुपपादयति ॥ जीवरूपेणेति ॥ ॥जीवरूपेण वस्थितो यः कोऽपि पुरत्रये ।
न स जीवः सदाशंभुः सत्यमेव न संशयः ॥३५॥ ईश्वर एव कोऽप्यव्याजेन जीवरूपेणावस्थितो न तु जीवस्ततोऽन्य इति ॥३५॥ प्रतिज्ञातमर्थं
साधयति ॥ ततस्तु जातमिति ॥ ॥ततस्तु जातं सकलं विचित्रं सत्यवस्तु राः ॥ सत्यत्वोसत्यसाक्षित्वात्साक्षित्वाच्चिदात्मकं तथा ॥३६॥ य
दीदृतायं ब्रह्म तस्मादेव जातो रम्भोग्यात्मकं विचित्रमिदं सर्वं जगन्मायावशात्कल्पितमुत्पन्नं न तु परमार्थतः ॥ सत्यचिन्मात्ररूपस्य
वात्मनो ब्रह्मलक्षणयोगाज्जीवैकत्वं वक्तुं साक्षित्वात्मनाप्रतिपादयति ॥ सत्यमिति ॥ ॥अस सत्यस्य सर्वस्य द्रष्टृत्वनियमात्साक्षी
दृक्स्वरूपश्चात्मा सत्य एवेत्यर्थः ॥ अत एव जडप्रपंचसाक्षित्वाच्चिद्रूपः ॥३६॥ ॥प्रेमास्पदत्वाद्द्वैतभेदात्मा वास्तवः ॥ तस्मि
न्नेव लक्ष्यतिपृच्छयामि दंततः ॥३७॥ परप्रेमास्पदत्वात्सुखस्वरूपः ॥ आगुत्क्रेत्याद्यचिदपि भेदस्यद्वीनिरूपत्वेन स्वरूपत्वेन स्व

रूपत्वाभावादद्वैतः ॥३७॥ न जीवो जीववन्नाति साक्षाद्ब्रह्मैव केवलं । अज्ञानाज्जीवरूपेण भासते न स्वभावतः ॥३८॥ एवं सच्चिदानं
दरूपेण यः साक्षी तस्मिन्नेव जाग्रदाद्यवस्थात्रये लीयते यस्मादवस्थानत्रयसाक्षी एवंरूपस्तस्मादसौ न जीवः किंतु उपाधिवशाज्जी
ववद्भासमानः सन्निरस्तसमस्तोपाधिकत्वे ब्रह्मैव । कस्तर्हि जीववद्भाने उपाधिरित्यत आह । अज्ञानादिति ॥३८॥ एवं जीवस्य स
च्चिदानंदाद्वितीयलक्षणं स्वरूपं प्रतिपाद्य ब्रह्मणोपि तटस्थलक्षणया तत्प्रतिपादयति । ब्रह्मणो जायत इत्यादि । ब्रह्मणो जायते प्राणो म
नः सर्वेंद्रियाणि च । खं वायुर्ज्योतिरापश्च भूमिर्विश्वस्य धारिणी ॥३९॥ यत्परं ब्रह्म सर्वात्मा विश्वस्यायतनं महत् । सूक्ष्मात्सूक्ष्मतमं नि
त्यं तत्त्वमेव त्वमेव हि ॥४०॥ सूक्ष्मात्सूक्ष्मतममिति । सूक्ष्मप्रपंचीकृतं वियदादिकं ततोपि सूक्ष्ममव्याकृतं तस्मादपि सूक्ष्मं यज्जगत्का
रणं ब्रह्म तदेव जीववाचिनस्त्वंशब्दस्यार्थः ॥४०॥ यस्त्वंशब्दस्य लक्ष्यार्थः स तत्पदार्थ एव हि । तत्त्वंशब्दौ स्वतः सिद्धे चिन्मात्रे पर्यवस्यतः
॥४१॥ जगत्कारणवाचिनस्तच्छब्दस्य देहाद्युपाधिविशिष्टात्मवाचिनस्त्वंशब्दस्य च विरुद्धांशत्यागेनोभयत्रानुगतचिन्मात्ररूपेणै
क्यप्रतिपादनपरत्वं पंचमेध्याये प्रपंचयितं तत्त्वमहंशब्दवाच्यार्थस्येवेत्यादिना । तदेतद्धि हृदयं हृत्सोच्यते चिन्मात्रे पर्यवस्यतइति ॥४१॥
यः पदद्वयलक्ष्यार्थस्तस्मिन्भेदः प्रकल्पितः । मायाविद्यात्मकोपाधिभेदेनैव न वस्तुतः ॥४२॥ यः पदद्वयलक्ष्यार्थ इति । तत्त्वमिति पदद्वये
न वाच्यागतं सर्वज्ञत्वाल्पज्ञत्वादि विरुद्धांशं परित्यज्य लक्षणया चिन्मात्ररूपोर्थो लक्षणया प्रतिपादितः स एव पारमार्थिकः । तस्मिन्मायावि
द्योपाधिवशाज्जीवेश्वरयोर्भेदः कल्पितः । विशुद्धसत्त्वप्रधाना स्वाश्रयाव्यामोहकरी मायाईश्वरोपाधिः मलिनसत्त्वप्रधाना स्वाश्रयव्या
मोहकरी अविद्या जीवोपाधिः । अतस्तयोरुपाधिभेदेन भेदो न वास्तव इत्यर्थः ॥४२॥ स्वतः सिद्धैकताज्ञानं श्रुतस्य श्रुतिवादतः । स्वभावसि
द्धमेकत्वं बोध्यत्वापेक्षकारिणः ॥४३॥ एकताज्ञानमिति । स्वतःसिद्धं यदैकत्वं तद्याथार्थ्यज्ञानमित्यर्थः । श्रुतिवादतः इति । साक्षात्तिरेवा
सूक्ष्मात्सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव हि ॥४४॥ अस्य श्रुतिवाक्यस्य निष्पन्नमर्थमनुवदति । आत्मादिति । आत्मस्वरूपं ब्रह्मस्थुस्यादिप्र

७९

पंच सुंनभातिमत्त।। तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते।।४४।। यस्तु ब्रह्मविजानाति स्वात्मनात्मसुदृढं नरः।। तस्य स्वानुभवे स्वेवं
स्वभावादनुवर्त्तते।।४५।। जाग्रदाद्यवस्थारूपेण च यद्ब्रह्म परोक्षेण भाति तदेतत्खलु महं वा ब्रह्म स्वमापरोक्ष्येण भासमानं प्रत्यचैतन्यमि
वाक्यार्थः।।४६।। एवं ब्रह्मात्मैकत्वविद्रूपो जीवन्मुक्तस्यानुसंधानप्रकारमाह।। त्रिष्विति।। त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च
यस्तथा।। तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः।।४७।। मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितं।। मयि सर्वं लयं याति तद्ब्रह्मा
द्वयमस्म्यहं।।४८।। अणोरणीयानहमेव तद्वन्महानहं विश्वमहं विश्व विभुद्धः।। पुरातनोहं पुरुषोहमीशो हिरण्मयोहं शिवरूप
मस्मि।।४९।। अपाणिपादोहमचिंत्यशक्तिः पश्याम्यचक्षुः स शृणोम्यकर्णः।। अहं विजानामि विविक्तरूपो न चास्ति वेत्ता मम चित्स
दाहं।।५०।। न चास्ति वेत्तेति।। अन्यो विदिता मम नैवास्ति अहमेव सर्वदा चिद्रूपः सर्वस्य विदितेत्यर्थः।।५१।। वेदैरनेकैरहमेव वेद्यो
वेदांतकृद्वेदविदेव चाहं।। न पुण्यपापे मम नास्ति नाशो न जन्म देहेंद्रियबुद्धयश्च।।५०।। न भूमिरापो मम नैव वह्निर्न चानिलो मेस्ति न चां
बरं च।। स एवाहमेवाहमिति स्फुरामि स्वभावतश्चेदमिति स्फुरामि।।५१।। आभातरूपेण तथैव सर्वदा विभातरूपेण च भानरूपतः।। अ
भानरूपेण च सर्वरूपतः स्फुरामि देवो हमतः पुरातनः।।५२।। ईदृग्विधानुसंधानस्य फलमाह।। एवमिति।। एवं विदित्वा परमात्मरूपं
गुहाशयं निष्कलमद्वितीयं।। समस्तभानं सदसद्विहीनं प्रयाति शुद्धं परमात्मरूपं।।५३।। प्रतिपादितमर्थं निगमयति।। श्रुतश्चवे
दांतवचोभिरंजसा मुमुक्षुभिर्नियमत्रोपनायकः।। गुरूपदेशान्न च तर्कतस्तथा विचिंतनीयश्च वेदत्रापतः शिवः।।५४।। केवल्यो
पनिषदां परब्रह्मायुक्तायदुश्चेर्मुत्तमो वा चप्रमितो जसैरपि हरिब्रह्मादिभिश्चादृतं।। हे देवा अहमुक्तवाननि सूक्ष्म ब्रह्मापरोक्षाय
त सर्वेषामधिकारिणां मतमिदं विजानाति भक्त्या सह।।५५।। इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञवैभवखंडस्योपरिभागे ब्रह्म
गीतासूपनिषत्सु ब्रह्म अष्टमोध्यायः।।८।। विभक्त्येति।। एवं केवल्योपनिषदस्तात्पर्यं गम्यं मया प्रतिपादितमर्थं हे देवाः पूर्ययं शि
ति।।

७९

श्रुत इ ते

न जानीतेत्यर्थः॥५५॥ इति श्रीमत्र्यंबकपादाब्जसेवापरायणेनोपनिषन्मार्गप्रवर्तकेन माधवाचार्येण विरचितायां सूतसंहिता-
तात्पर्यदीपिकायां यज्ञवैभवखंडस्योपरिभागे ब्रह्मगीतास्वष्टमोऽध्यायः॥८॥ ॐ नमः शिवाय॥ ७॥ अथ बृहदारण्य-
कस्याप्युक्तब्रह्मात्मैक्यपरत्वमध्यायद्वयेन प्रतिपाद्यते तत्र मैत्रेयीब्राह्मणे अमृतत्वसाधनस्याद्वितीयात्मदर्शनस्य तत्सा-
धनानां श्रवणादीनां च प्रतिपादनेन तत्संपूर्णोपदेशरूपत्वात्तदर्थं प्रथमं संगृह्णाति॥ प्रत्यग्रूप इत्यादिना॥ ॥ब्रह्मोवाच॥ ॥
प्रत्यग्रूपः शिवः साक्षात्सुखानंदस्वलक्षणः॥ परप्रेमास्पदत्वेन प्रतीतत्वात्स्फुटं बुधाः॥१॥ अहमिति प्रसक्तेन भासमानो जी-
वभावापन्नोऽयं परशिवः साक्षात्परमानंदरूप इत्यत्र हेतुमाह॥ परेति॥१॥ मोहे रप्रत्योजकत्वं निरूप्यते॥ परप्रेमेति॥ ॥
परप्रेमास्पदानंदः सुख आनंद एव हि॥ प्रियो भवति भार्यायाः पतिः सोऽयं सुखप्रदः॥२॥ पतिर्न यस्याः कामाय प्रियो भवति सर्वथा॥ किं-
त्वात्मनस्तु कामाय ततः प्रियतमः स्वयं॥३॥ यद्यपि परमास्पदकृतः पुत्रविषयजनित आनंदः स साक्षादानंदो न भवति तस्यात्म-
शेषत्वात्तथापि यो निरतिशयप्रेमास्पद आनंदः स तु स्वप्राधान्यात्साक्षादानंद एवेति परप्रेमास्पदत्वमानंदरूपत्वस्य गमक-
मित्यर्थः॥ तच्चात्मनि असिद्धमित्याशंक्य श्रुतौ न वा अरे पत्युः कामाय पतिः प्रियो भवतीत्यादिश्रुतिभिः पर्यायैः पतिजायापुत्रवि-
त्तादीनामात्मशेषत्वेनैव प्रियत्वोपन्यासेन तस्य सर्वप्रियतमत्वं प्रतिपादितं तदभिधत्ते॥ प्रियो भवतीत्यादिना॥ जायायाः पतिः प्रि-
यो भवतीति यत्तन्न पत्युः कामाय किंतु जायायाः स्वात्मनः सुखायैव च॥ तथा च यो यच्छेषतया प्रीतिविषयो भवति स तच्छे-
षतया न जायादिकं पुत्रे॥ एवं स्वात्मशेषतया प्रिया पत्युरपि जायायाः स्वात्मा अतिशयेन प्रिय इत्यर्थः॥३॥ जायायास्त्विति॥ ॥
जायायास्तु न कामाय नहि जायापि सा मता॥ किं त्वात्मनस्तु कामाय ततः प्रियतमः स्वयं॥४॥ पत्युर्जाया प्रिया भवतीति यत्त-
च जायायाः सुखायापि न पत्युः स्वात्मनः सुखायेति प्रियतमः पत्युः स्वात्मा॥ ॥ पुत्राणां तु न कामाय प्रियाः पुत्रा-
भवंति च॥ किं त्वात्मनस्तु कामाय ततः प्रियतमः स्वयं॥५॥ एवं पुत्राणां तु न कामायेत्यादिषु पर्यायेष्वंतरं द्रष्टव्यं॥५॥ ॥ब्रह्म-
णस्तु न कामाय न ब्रह्म भवति प्रियं॥ किं त्वात्मनस्तु कामाय ततः प्रियतमः स्वयं॥६॥ ब्रह्मणस्त्वेवेति ब्राह्मणजातेरित्यर्थः॥६॥

= मैत्रेय्याश्च विमुक्तिं मम्ब्रसर्वतद्दर्शनादिभिः ॥५॥ विदितं तदभेदेन सर्वस्यत्वनसंशयः ॥ ॥ ८

८०

क्षत्रस्यैव तु कामाय न क्षत्रं भवति प्रियं ॥ किंत्वात्मनस्तु ॥७॥ वित्तस्यैव तु कामाय न वित्तं भवति प्रियं ॥ किंत्वात्मनस्तु० ॥८॥
लोकानामेव कामाय न सर्वतोऽप्रिया भवन्ति ॥ किंत्वात्म० ॥९॥ देवानामपि कामाय प्रिया देवा भवन्ति न ॥ किंत्वात्म० ॥१०॥
वेदानामेव कामाय प्रिया वेदा भवन्ति न ॥ किंत्वात्म० ॥११॥ भूतान्यपि च भूतानां कामाय न कुर्वन्ति ॥ किंत्वात्म० ॥१२॥
एवं पतिजायापुत्रवित्तादिकान्प्रियान्विद्यमानान्भावान्विशेषानुपन्यस्यानुक्तसंग्रहायाह ॥ सर्वस्यैवेति ॥ सर्वस्यैव
कामाय न सर्वं भवति प्रियं ॥ किंत्वात्मनस्तु कामाय ततः प्रियतमः स्वयं ॥१३॥ अतः प्रियतम इति ॥ ॥ अतः प्रियत
मो ह्यात्मा सुखैव सुखलक्षणः ॥ सुखाभिलाषिभिः सोऽयं सकामकर्मोपासनैः ॥१४॥ द्रष्टव्यस्तु मुमुक्षुभिर्नित्यं श्रो
तव्यश्च तथैव च ॥ यत एवं सर्वमात्मशेषतया प्रियतमः सर्वप्रियतमश्चात्मा हि शेषो हेतोः ॥ यस्मादेवं परप्रेमास्प
दस्तस्मात्सुखलक्षणो निरतिशयानन्दस्वरूपः ॥ अतः परिच्छिन्नसुखसाधनानि कर्माणि परित्यज्य अपरिच्छिन्न
सुखाभिलाषिभिर्मुमुक्षुभिस्स्वात्मरूप आत्मा सादरं द्रष्टव्यः साक्षात्कर्तव्यः ॥ तस्य च दर्शनस्य मनननिदिध्या
सनसहकृतं वेदान्तमहावाक्यश्रवणमेव साधनमित्याह ॥ श्रोतव्यश्चेति ॥ तत्र श्रवणं नाम ... तात्पर्य

८

न्यायानुसंधानं ॥ न्यायतः श्रुतिप्रतिपादितस्यार्थस्यासंभावनादिनिरासनतथागमकयुक्त्यनुसंधानं मननं
एवं श्रवणमननाभ्यामधिगतेऽर्थे साक्षात्कारं जनयितुं विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहो निदिध्यास
नोपरपर्यायैर्विचिन्तनं ॥ तथा चाम्नातं ॥ आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति ॥ अस्य च वाक्यस्य
तात्पर्यमाचार्यैरुक्तं ॥ आत्मदर्शनं फलमुद्दिश्य मनननिदिध्यासनाख्यफलोपकार्यङ्गकं श्रवणं नामाङ्गी विधीयत
इति ॥ आत्मनो वा अरे दर्शनेनेत्यादिना यद्दर्शनस्य सर्वावाप्तिलक्षणफलमाम्नातं ॥ तद्व्याचष्टे ॥ सर्वं तदिति ॥ दर्शनादि

निरिस्ताशब्देन गुरुमुखे श्रवणमननध्यानसंग्रहः॥ अस्मिन्निश्चयतमेकाग्र्यात्तेन श्रवणादिभिर्दृढे सति पश्चात्तस्मिन्नभ्यस्तं तत्त्वेषतया द्वितीयं भागु
पश्यत्सर्वं जगत्सर्वं तद्भेदेनैव स्फुरत्तदन्यच्च नाविदितमवस्तवतीत्यर्थः॥ ननु तावता कथं संसारदुःखनिवृत्तिरित्यत आह॥ ॥दुःखरा
शेरिति॥ ॥दुःखराशेर्विनाशाय परमाद्वैतनिष्ठो भवेत्॥ २६॥ ॥परमाद्वैतविदः पुरुषस्य स्वातिरिक्तदुःखहेत्वभावाद्भवपरंपराप्री
तो दुःखराशिर्विनश्यतीत्यर्थः॥ २६॥ ननु दुःखराशेर्विनाशेपि स्वर्गादिसुखहेतोः पुण्यस्य सद्भावात्तन्निमित्तसंसारो विदुषोपि कुतो नेत्य
त आह॥ परमाद्वैतेति॥ ॥परमाद्वैतविज्ञानात्संसारः प्रविनश्यति॥ स्वतःसिद्धाद्वयानंदः स्वयमेव विभाति च॥ २७॥ ॥अद्वितीयब्रह्मा
त्मैक्यस्य साक्षात्कारोत्तरकालं कर्तृत्वभोक्तृत्वादिमदंतःकरणस्य निखिलपुण्यपापाश्रयस्याविवेकरूपकल्पितसुखदुःखोपभो
गलक्षणः सर्वोपि संसारो विदुषः प्रविनश्यति॥ इदंविधस्य मोक्षस्य सुखदुःखवत्स्वर्गादिसुखस्यापि निवर्त्तनात्पुरुषार्थमाश
ङ्क्याह॥ स्वतःसिद्धेति॥ कारणांतरानपेक्षोयमात्मनः स्वरूपभूतो नित्योनतिशयोद्वितीयानंदस्तस्य स्वरूपप्रकाशेनैव स्फुरण
मितोक्तदोषप्रसंग इत्यर्थः॥ २८॥ एवं मोक्षसाधनमद्वैतपरात्मदर्शनमुपन्यस्य पश्चाद्भेददर्शनानिंदा ब्रह्मत्वपरादादिशब्दैः पर्यायैः
श्रुतौ प्रतिपादितां तां संगृह्णाति॥ परादाच्चेति॥ ॥परादाच्चं सुरा ब्रह्म स्वतोन्यत्र लवेदयः॥ तथा परादात् क्षत्रं तल्लोकाश्च
पितथैव च॥ २९॥ देवादेवाश्च भूतानि परा दुःखभूतं पशुः॥ यः पुरुषः स्वात्मनोन्यत्र ब्राह्मणजातिं वेद तं ब्रह्म भेददर्शिनं तं
पुरुषं परादाद्बहिष्कुर्यात् किंदनेन सत्तस्य सुखदुःखहेतुर्भवतीत्यर्थः॥ एवं परादाः क्षत्रमित्यादियोजना॥ तं पशुमिति॥ योन्यद्ब्र
ह्मक्षत्रादिकं जगत्स्वव्यतिरेकं पश्यति स यथा पशुरेवं स एव पशुः॥ तथा चाम्नातं॥ अथ योन्यां देवतामुपास्तेन्योसाव
न्योहमस्मीति न स वेद यथा पशुरेवं स देवानामिति॥ अस्मै व ब्रह्मक्षत्रादिरिति स्वात्मनः परादानं ब्रह्मक्षत्रादिभेदस्तु संसिद्धः
कथमपलपितुं शक्यते इत्यत आह॥ स्वस्वरूपादिति॥ ॥स्वस्वरूपात्परं किंचिदपि पश्यन्न नश्यति॥ ३०॥ प्रतीयमानस्य भेद
स्य शुक्तिकारजतादिवद्विभ्रमत्वाद्वस्तुतः स्वातिरिक्तं ब्रह्मक्षत्रादिकं जगत्परं पश्यन्स्वकृतपुण्यपापवशीकृतो जन्ममरणादिलक्षणं

संसारं प्राप्नोति ॥ श्रूयते हि ॥ मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति ॥ १९ ॥ कथं तर्हि प्रतीयमानं ब्रह्मक्षत्रादिकं वेदनीयमित्या
शंक्य तत्सर्वमात्मत्वेनैव ज्ञातव्यमिति मदाम्नातमितीदं ब्रह्मेदं क्षत्रमित्यादिना तदाह ॥ ब्रह्मक्षत्रादिभेदेनेत्यादिना ॥ ॥ ब्रह्म
क्षत्रादिभेदेन प्रतीता ह्यखिला अमी ॥ वर्णास्तथाश्रमाः सर्वे संकराः सकला अपि ॥ २० ॥ देवगंधर्वयक्षाद्याः प्रतीता निम्नु वनानि च ॥
अस्तिनास्तीति शब्दार्था नैव चान्यच्च किंचन ॥ २१ ॥ मायाविद्यातमोमोहप्रभेदा अखिला अपि ॥ सर्वमात्मैव नैवान्यदन्यबुद्धि
र्हि संसृतिः ॥ २२ ॥ मायाविद्येति ॥ विशुद्धसत्त्वप्रधाना प्रकृतिर्माया ईश्वरोपाधिः मलिनसत्त्वप्रधानाविद्या जीवोपाधिः
तमःशब्देन विषयदर्शित्वोपादानात्तमःप्रधाना प्रकृतिरुच्यते ॥ मोहशब्देन कार्यस्य तत् शुक्तिरूप्यादिविभ्रमो विवक्षितः ॥ स
र्वमात्मैवेति ॥ यदिदं ब्रह्मक्षत्रादिकं मायातत्कार्यजातमनूक्तं तत्सर्वमात्मैव न ततोऽतिरिक्तं तस्य स्वरूपेऽध्यस्तत्वेन शुक्तिरूप्यादि
वदधिष्ठानादन्यत्वेन निर्वक्तुमशक्यत्वात् ॥ अन्यबुद्धिर्हीति ॥ ब्रह्मक्षत्रादिजगतः प्रत्यगात्मनश्च या भेदबुद्धिः सा संसारहे
तुः ॥ द्वितीयाद्वै भयं भवतीत्यादिश्रुतेरित्यर्थः ॥ २२ ॥ तस्माद्द्वितीयब्रह्मात्मविषयैव निःशेषदुःखोच्छित्तिमन्निरतिशयानन्दहे
तुर्वाखिलक्षणाया मुक्तेः साधनमित्याह ॥ निर्विकल्प इति ॥ ॥ निर्विकल्पे परे तत्त्वे विषया बुद्धिविभ्रमः ॥ सा हि संसारविच्छित्ति
र्नापरा पुरुषाधिकाः ॥ २३ ॥ निर्विकल्पे निरस्तसमस्तोपाधिके सत्यज्ञानानन्दैकरसे विकारजातेऽस्यः परे ब्रह्मणि श्रवण
दिसाधनजनितया तत्त्वतया विद्यया तदावरणाविद्यानिवृत्तौ सत्यां वियांतरा भावेन विक्षेपवासनारहितया बुद्ध्या तत्त्वके
स्तत्रप्रत्यग्रूपे ब्रह्मणि यो विश्रमः स एव परमः पुरुषार्थलक्षणो मोक्ष इत्यर्थः ॥ २३ ॥ ज्ञानिनः प्रभावमाह ॥ प्रेतीतीमिति ॥ ॥
ग तीनाम् विशेषणसकलं ब्रह्मयः पुमान् ॥ वेदतं शिरसा नित्यं प्रणमामि जगद्गुरुं ॥ २४ ॥ नन्वेवंविधं मद्वितीयब्रह्मात्म
विज्ञानं किमिति न सर्वे संलब्धमिति तत्कारणमाह ॥ वेदाइति ॥ ॥ वेदा बहुमुखासोति मरतयश्च तयश्चतथेव च ॥ पुरा
णानि समस्तानि कुर्वाहं द्वागमा नराः ॥ शैवाश्च वैष्णवाश्चैव मदुक्ता आगमा अपि ॥ अपरे तराः समस्ताश्च केवलं लोकिकं

ति ॥२६॥ तर्काश्च विविधाः सूक्ष्माः स्थूलाश्च सकला अपि। परस्परविरोधेन प्रभांति सकलात्मनां ॥२७॥ परस्परवि
रोधेनेति॥ यावज्जीवमग्निहोत्रं जुहुयात्॥ न कर्मणा न प्रजया धनेन। द्वा सुपर्णा सयुजा सखाया। एको देवः सर्व
भूतेषु गूढः॥ इत्येवं परस्परविरुद्धार्थप्रतिपादकत्वेन श्रुतिस्मृतिपुराणादयः सर्वेषामविशेषतः प्रतिभासंते॥२७॥
तेषामेवाविरोधेनु कालोयान्विधीमतां॥ कथंचित्कालसंज्ञेयाविरोधोनसिध्यति॥२८॥ धीमतां विदुषामपि। ते
षां श्रुतिस्मृतिपुराणादीनामविरोधं परस्परविरोधपरिहारकर्तव्ये सति तावदर्थेन सर्वमायुरपगच्छति॥ कथंचित्स
ज्ञेयाविरोधो न सिध्यति॥ तत्त्वशास्त्रपरिशीलनएव बुद्धेरुपक्षीणत्वादित्यर्थः॥ एतेनास्य महतो भूतस्य निश्वसि
तमेवं तमेवं घ ऋग्वेदो यजुर्वेद इत्यादि श्रुतेस्तात्पर्यं यथार्थं न भवति॥२८॥ प्रतिपादितमैक्यात्मतत्त्वामनुपसंहरति।
अत इति॥ अतः सर्वं परित्यज्य मनसो मलकारणं॥ यथा सा तनरूपेण शिवे परे स्यत्सु निश्चलः॥२९॥ कृमिकीटपतं
गेभ्यः पशवः प्रज्ञयाधिकाः॥ पश्वादिभ्यो नराः प्राज्ञास्तेषु केचन कोविदाः॥३०॥ तेभ्यस्तेभ्यश्च गंधर्वाः पितरो मति
मत्तमाः॥ अन्यच्च तारतम्येन पंडिता उत्तरोत्तरं॥३१॥ सूर्यस्तल्लोकगाः प्राज्ञाः सर्वेषामपि हे सुराः॥ युष्मभ्यो हं मह
प्राज्ञो मत्तः प्राज्ञो जनार्दनः॥३२॥ जनार्दनादपि प्राज्ञः ^ ततोन्यो नास्ति कश्चन॥ ॥ यतो बहुविधश्रुतिस्मृतिपुरा
णादिपरिशीलनेन मनसो विक्षेपहेतुः अतस्तत्सर्वं परित्यज्य वेदांतमहावाक्यजनितात्मज्ञानवान् भूत्वा यद्य
द्वस्तु येन रूपेण भासते तेन सर्वेण रूपेण तदधिष्टानमद्वितीयं परशिवमेव सर्वत्रावलोकयेदित्यर्थः॥३३॥ तस्माद्वि
धामिमां त्यक्त्वा ब्रह्म सर्वं विलोकयेत्॥३४॥ तस्माद्विधामिमामिति॥ कृमिकीटादीश्वरांतानामुत्तरोत्तरप्रज्ञायाः सा
तिशयत्वेन सार्वज्ञत्वसंभवादनवछिन्नज्ञानः परशिव एव साक्षात्सर्वज्ञः॥ यत्तु यस्माद्देवतस्मादिमात्रा गुरोरितां

^= शंकरो गुणमूर्तिषु॥ ततः प्राज्ञतमः साक्षाच्छिवः सांबः सनातनः॥३३॥ स एव साक्षात्सर्वज्ञ =^

त ४ मा २

श्रुतिस्मृत्यादिलक्षणा मनात्मविषयी विधायत्का सर्वत्र ब्रह्मात्मनैवानुसंदध्यादित्यर्थः॥३४॥ आयासस्तावदि
त्यादि॥ ॥आयासस्तावदत्यल्पः फलं मुक्तिरिहैव तु॥ तथापि परं द्वैतं नैव वांछति मानवाः॥३५॥ कदाचिद
पि चित्तस्य भयं किंचिन्न विद्यते॥ तथापि॥०॥३६॥ स्वस्वरूपातिरेकेणानास्ति मानविरोधि च॥ तथापि॥०॥३७॥
स्वस्वरूपातिरेकेण कैश्चन हि विद्यते॥ तथापि॥०॥३८॥ श्रुतिस्मृतिपुराणानि प्राहुरद्वैतमात्मनः॥ तथापि॥०॥३९॥
अनुग्राहकतर्कश्च कुरुतेऽद्वैतवेदनं॥ तथापि॥०॥४०॥ शैवागमेषु चोद्दिष्टं तं बभाषे परमेश्वरः॥ तथापि॥०॥४१॥
कुत्र ह्यात्मज्ञानस्य मत्तोऽव्यापारमात्रसाध्यत्वादायासस्तावदल्प एव फलं तु परमपुरुषार्थरूपा मुक्तिस्त
थाप्यविद्यावासनाभिरपिहितहृदयः संसारिणस्तदद्वैतं नैव वांछतीत्यर्थः॥४१॥ इत्थं स्वप्रतिपादितमप्य
न्यानपि देवान्संपादयति। नारायणेनापीति॥ नारायणोऽपि चाद्वैतं बभाषे स्वागमेषु च॥ तथा॥०॥४२॥
अर्हन्वा वोचमद्वैतं मदुक्तेष्वागमेषु च॥ तथापि॥०॥४३॥ अन्ये च योगिनः सर्वे प्राहुरद्वैतमात्मनः॥ तथापि॥०॥४४॥
विष्णुरुद्रादि नानादेवा निष्ठाप्य द्वैतगोचराः॥ तथापि॥०॥४५॥ केचित्सामान्यादिना॥ ॥केचित्सामान्यमद्वैतं वद
ति भ्रान्तचेतसः॥ विशेषं द्वैतमाश्रित्य न तेषामस्ति वेदनं॥४६॥ भेदाभेदवादिनो हि कारणब्रह्मरूपेण सामान्य
रूपेण सर्वमिदमद्वैतं वदन्ति वियदादिभूतभौतिकविशेषाकारेण चेतज्जगत्प्रतिभासोऽपि सत्य इति संगिरन्ते।
तेषां सम्यक्ज्ञानमेव नास्ति द्वैताद्वैतयोः परस्पराप्तमद्वैयोरेकत्राऽसंप्रयुक्तत्वादित्यर्थः॥४६॥ द्वैतमे
वाहीति॥ द्वैतमेव हि सर्वत्र प्रवदन्ति हि केचन। न ते मनुष्याः कीटाश्च पतंगाश्च घटादिवत्॥४७॥ भेदाभे
दपक्षस्यायुक्तत्वात्सर्वप्रकारेणापि भेद एव परमार्थ इति यद्वैशेषिकाद्यामन्यन्ते तैश्चेतनाएवनस्युरिति कि

८२ ८२ ते॰

तु घटादिवद्वचेतनाः ॥४७॥ तेदाभिर्वचनीयत्वस्य प्राक्प्रतिपादितत्वात् ॥ अतः सर्वप्रकारेणाद्वैतमेव वास्तवमित्युपसंहरति ॥ अविशेषेणेति ॥ ॥अविशेषेण यः सर्वं तु यः पश्यति महेश्वरं ॥ स एव साक्षाद्विज्ञानी स शिवः स तु दुर्लभः ॥४८॥ विशेषस्य सर्वस्य मायामयत्वेन मिथ्यात्वात् सर्ववास्तव परशिवस्वरूपमेवेति यः पश्यति स एव सम्यग्ज्ञानी स एव परमशिवस्तादृशः पुरुषः क्वचित्केन तु सर्वत्र सुलभ इत्यर्थः ॥ एतावता भ्यत्र हि द्वैतमिव भवतीत्युपक्रम्य यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति पारमार्थिकाद्वैतप्रतिपादिका श्रुतिर्व्याख्याता भवति ॥४८॥ तस्य दृढत्वं सत्वमुपपादयति ॥ जगदिति ॥ जगदिति प्रीत सा व्यवहारतः परतस्तु परमार्थतः ॥ इति मतिर्न सत्वस्यापि कस्य सिद्धा शशिधरस्मरणेन हि सिद्ध्यति ॥४९॥ जगदिति प्रतिभापि च शांकरीमितिमतामिति मेऽस्तु विनिश्चयः ॥ इति मतिर्विमला तिश्रुता वहा शशिधरस्मरणेन हि सिद्ध्यति ॥५०॥ जगदिति प्रतिभासमपेक्ष्य च श्रुतिरपि प्रियहेतु मिहाहहि ॥ नीहजगन्मिति सा सेन चसा श्रुतिजिपकस्सकश्च शिवस्त्वतः ॥५१॥ इतीमतिर्विमला तु न जायते यदि जनः शिव एकतां दृशः ॥ यस्या हि परमेश्वरस्मरणमास्ति तस्यैव दृशा प्रतिपत्तिर्नेतरस्येत्यर्थः ॥ श्रुतिरपि प्रियहेतुमिति ॥ व्यावहारिकजगत्प्रतीत सा समपेक्ष्याग्निहोत्रं जुहुयादित्यादि श्रुतिरपि स्वर्गादिफलसाधनमग्निहोत्रादिकमुपदिशति ॥ नैतावता जगत्सत्यत्वमित्यर्थः ॥ एवं च व्यावहारिकजगत्प्रतिभा सर्वलोकैव प्रभास्तेन वस्तुत इति प्रतिपादयति ॥ न हि ह निर्मितानि मितिगमनागमे दयः सर्वे पिनावाव्यावहारिकजगत्प्रतिभा सबलोदे व प्रभासः तेन वस्तुत इति ॥ न हि जननिर्मरणं न भाग मोनहिमत्वं विमलतिरित्यादिना ॥ ॥ न हि लतिः सकलापि महात्मनो यदि कृतिः पञ्चरे व समानवः ॥५२॥ विसृज्य संदेहमशेषमास्तिकाः प्रतीतमेतन्निरिवनन्वेदनं ॥ शिवमिदं सकलं हि विभासते स्फुटतरं परमस्य तु योगिनः ॥५३॥ विलोकनं चापि शिवं विलोकयेद्धि लोकनं चापि शिवं विलोकयेत् ॥५४॥ ॥ विलोकनं चापरेति ॥ यदद्वितीयत्रसात्मविलजप्राज्ञ ॥ गरूपदे शेन शिवं विलोकयेद्धि लोकनं चापि शिवं विलोकयेत् ॥ न तत्तद्विज्ञानमपि कृतकरजोन्यायेन तत्रैव विलायमान तावदेतत्पर्यविज्ञानं तत्कालात्तदतिरिक्तं सर्वस्य तन्मात्र रूपतापश्यन्न न तत्तद्विज्ञानमपि कृतकरजोन्यायेन तत्रैव विलायमानत्वाच्चेदं पर्यविज्ञानं तत्कालात्तदतिरिक्तं सर्वस्य तन्मात्ररूपतां पश्यन्नवलोकनं चापि विसृज्य केवलं ॥ स्वभाव सत्तः स्वचितावशिष्य कमवलोकयेदित्यर्थः ॥५४॥ विलोकनं चापि शिवं विलोकयन्विलोकनं चापि विसृज्य केवलं ॥ स्वभावसत्तः स्वचितावशिष्य कमवलोकयेदित्यर्थः ॥

ति९
ग५

तोऽवशेषितप्रपञ्चनतस्यतत्त्वतः॥५५॥ निश्चानस्यमहासनःस्फुरद्वरावकुंभयाशक्यतेनप्रौढेनशिवेनवामुनिगणैर्नारायणेनापिच॥ वेदेना
पिपुरातनेनपरयाशक्त्यापरेणायवामक्लीसावमुपैतितत्त्वविदुषांनिश्चाहितादृग्विधा॥५६॥ सर्वमुक्तमितिवःसुरर्षभसाकेवलेनक
रुणाबलेनच॥ वेदएवसकलार्थबोधकःशैवएवंवचनंचतस्यमे॥५७॥ इतिश्रीस्कंदपुराणेसूतसंहितायांयज्ञवैभवखंडस्योप
रिभागेब्रह्मगीतासूपनिषत्सुनवमोऽध्यायः॥ ॥ ॥ स्वभावतःस्वचितेति॥ ब्रह्मात्मैक्यविषयांतःकरणवृत्तावपिसत्यांका
रणेनसहाविलीयानोसत्स्वप्रामवृत्तिछेदकाभावाद्विदुषःस्वभावभूतायास्वकीयायाश्चितेःतयैवकेवलमवशिष्यते॥ चिन्मात्ररूपेणैव
केवलंविद्वानवतिष्ठते। तस्याश्चिद्रूपस्यपरमार्थतोऽशिवत्वमपिनसंभवति॥ अवशेषप्रतियोगिन्यस्यविद्यमानावादित्यर्थः॥
॥५८॥ इतिश्रीमत्त्र्यंबकपादाब्जसेवापरायणेनोपनिषन्मार्गप्रवर्तकेनमाधवाचार्येणविरचितायांसूतसंहितातात्पर्यदीपि
कायांयज्ञवैभवखंडस्योपरिभागेब्रह्मगीताव्याख्यायांनवमोऽध्यायः॥ ॥९॥ ॥ एवमद्वितीयात्मविज्ञानंनिःश्रेयससाध
नमित्युक्तंसवात्माकिंरूपइत्येतत्सविशेषंप्रतिपादयितुमुपक्रमश्लोकंसंगृह्णाति॥ अस्तिसर्वांतरइत्यादिना॥ ॥ ब्रह्मो
वाच॥ अस्तिसर्वांतरःसाक्षीप्रत्यगात्मास्वयंप्रभुः॥ तदेवब्रह्मसंपूर्णमपरोक्षतमंसुराः॥१॥ तत्रहियाज्ञवल्क्यंप्रतिउष
स्तप्रश्नेएवमाम्नायते॥ यत्साक्षादपरोक्षाद्ब्रह्मयआत्मासर्वांतरस्तंमेव्याचक्ष्वेति॥ अस्यचप्रश्नस्यएषतआत्मासर्वांतरइ
त्यनेनयनस्वानुभवगम्यात्मविषयंप्रतिवचनमुपन्यस्तमेवप्रश्नप्रतिवचस्यासिद्धार्थःसंगृह्यते॥ सर्वांतरःसर्वस्मात्कारणसं
घातादभ्यंतरः॥ साक्षीसाक्षादव्यवधानेनसर्वस्यद्रष्टा। सोपाधिकस्यह्युपाधिकर्मीभूतचैतन्यकरणवृत्तिव्यवधानेनैवद्र
ष्टृत्वं॥ यस्तुसर्वांतरोनिरुपाधिकःसाक्षात्साक्षीत्वेनसाक्षीस्वयंप्रकाशमानेध्वसर्वप्रत्यग्भूतआत्मा। तदेवासतंसंशयति
प्रसिद्धमबाधितमस्वयंप्रकाशमानमपरिच्छिन्नंब्रह्मज्ञानेनयाऽवेदितव्यमित्यर्थः॥१॥ एषआत्मेत्यभिधानेननिरु
पाधिकमात्मस्वरूपमुपदिष्टमप्यजानंतस्तस्यावस्तत्स्यबोधनायप्राणेनप्राणितीत्यादिनाश्रुतौयत्तटस्थ
लक्षणमाम्नातंतत्संगृह्णाति॥ योऽयंप्राणेनसकलंसुराः॥ प्राणापानादिभेदस्यप्रसिद्धस्फुरणप्रदः॥ यस्य
=प्राणापानादिभेदस्येति।१।

१२

१२

त

165

संनिधिमात्रेण चेष्टते सकलं करणं सुरासुराः ॥२॥ अभेदेन प्रतिभासमानस्य प्राणापानादिकार्यकारणसंघातस्य दारुयंत्रवत्स्वभावतो चेतनस्य
यदधिष्ठानवशात् सन्मात्रास्फुरणे जवतः ॥ तच्च प्राणापानादिकं सर्वं संनिधिमात्रेण प्राणापानादिचेष्टावद्भवति अयस्कांतसंनि
हितायोवत् ॥२॥ यश्चेति ॥ ॥यश्च सर्वस्य चेष्टायामसक्तो निष्क्रियः स्वयं ॥ सोऽहं सर्वांतरः साक्षादात्मानान्यः सुरर्षिभिः ॥३॥ तस्य स
त४ चेत्सु कारणतैः संघातस्य सत्तामात्रे प्राणापानादिरूपायां चेष्टायां योऽभिरुपाधिकश्चिन्मात्ररूप आत्मा स्वयं नाधिक्रियः सन्…
ण्यपापादिभिर्निर्लेपः सोऽहं ते सर्वखलु प्रादुर्भूत इतः सर्वांतरत्वादिलक्षण आत्मेत्यर्थः ॥३॥ योऽयमित्यादि ॥ ॥योऽयं सर्वांतरः स्वात्मा सोऽह
मर्थो न विग्रहः ॥ द्रष्टृत्वादस्य देहस्य द्रष्टा यो स स एव सः ॥४॥ अहं ब्रह्मास्मीत्यादौ प्रत्यगर्थवाचिनोऽहमिसस्य अस्य सर्वां
तरः सर्वप्रत्यग्भूतः तद्वर्णित आत्मैव मुख्यार्थः न तु पाञ्चभौतिकं स्थूलशरीरं ॥ घटादिवदचेतनत्वेन तस्य दृश्यत्वाद् स्य च स्थूलदेहस्य
यो द्रष्टा स एव सर्वांतर आत्मेत्यर्थः ॥४॥ एवं स्थूलशरीरादात्मन आंतरत्वं प्रतिपाद्य लिंगशरीरादपि तत्प्रतिपादयति ॥ योऽयमिति ॥
योऽयं सर्वांतरः स्वात्मा सोऽयं न प्राणपूर्वकः ॥ दृश्यत्वात्प्राणपूर्वस्य द्रष्टा योऽस्य स एव सः ॥५॥ न प्राणपूर्वक इति ॥ प्राणापानाद्याः पंच वायवः श्रोत्रे
ंद्रियाणि दश बुद्धिर्मनश्चित्ते सेन स सप्तदशात्मकोऽयं सूक्ष्मदेहः सोऽपि नात्मा तस्यापि भूतकार्यत्वेन दृश्यत्वात् तत्कार्यत्वं चास्माभिः
हास्य खंडे प्रतिपादितं ॥ एवं कार्यकारणसंघातस्य यो द्रष्टा स सर्वांतर आत्मेति ॥ तटस्थं निरुपाधिकं स्वरूपं लक्षि
तं ॥५॥ न दृष्टेर्द्रष्टारं पश्येरित्यादिना श्रुतौ साक्षादेव तत्स्वरूपं भंग्यांतरेण स्वप्रकाशचिदात्मकं लक्षितं तत्संग्रहतीति ॥
दृष्टेर्द्रष्टेति ॥ ॥दृष्टेर्द्रष्टा श्रुतेः श्रोता मतेर्मंता च यः स्मृतः ॥ विज्ञातेरपि विज्ञाता स हि सर्वांतरः परः ॥६॥ रूपरसाद्यादिविषयसं
प्रयुक्तचक्षुरादिद्वारकपरिणामजायमानां स्वरूपच्छायापन्नां बुद्धिवृत्तिं दृष्टिश्रुत्यादिशब्दैतत्पदैर्विवक्षिता ताः दृष्टि
श्रुत्यादयो स्वनात्मभूतं रूपादिविषयजातमेव प्रकाशयंति न तु स्वात्मानं श्रोतृत्व प्रकाशेन … रूपादिरहितं प्रत्यगा
त्मानं । स खलु लौकिक्या दृष्टेर्द्रष्टा चैतन्यस्वरूपया स्वभावभूतया दृष्ट्या या न पाकधर्मकभूतया लौकिक्या दृष्ट्याऽपि इति ॥ एवं श्रु
तेः श्रोतेत्यादावपि योजनीयं ॥ एवं बुद्धिवृत्तेः प्रकाशकः स्वप्रकाशचिदात्मा स एवोक्तविधः सर्वांतरः परमात्मेत्यर्थः ॥६॥ दृष्टेः सर्वां

तरमात्मानं स्वरूपतटस्थलक्षणाभ्यामुपदिश्यत एवेति रिक्तस्य मिथ्यात्वमाम्नायते॥ अतोन्यदार्तमिति॥ ॥अ-
तोन्यदार्तं सद्रूपं नसत्स्येतु निरूपणे॥ स एव सर्वं नैवान्यदिति सम्यग्विरूपणं॥७॥ तद्धस्मि प्राय मा विश्वरोति॥ अत
इति॥ अतोस्मात्सर्वान्तरादात्मनोन्यच्च कार्यकारणादिरूपं तन्मोक्तिरूपं जगदस्ति तदार्तं मधिष्ठानतया याथात्म्य-
ज्ञानेन मुक्तिरूपत्वव्द्वाचितमत एतस्य व्यवहारदशायामेव सत्त्वं परमार्थनिरूपणे तु नैव तत्सत्यं॥ किंतु सर्वो-
ऽपि प्रत्यगात्मन्यध्यस्तत्वेन तत्रैव लीयमानमधिष्ठानमात्रेणावशिष्यत इत्यर्थः॥७॥ एवमध्यात्मप्रत्यगात्म-
नः सर्वान्तरत्वमुपदिश्याधिभूतमपि तदुपदेष्टुं गार्गी आह्मणं संगृह्णाति॥ यथा पृथिव्यामित्यादिना॥ ॥यथो-
पृथिव्यामोतं च प्रोतं च सद्रूपं सुराः॥ तथा प्सु सद्रूपं देवा ओतं प्रोतं न संशयः॥ ॥ तत्र हि सर्वान्तरस्यात्मनो नि-
रतिशयसूक्ष्मत्वं व्यापित्वं च दर्शयितुं पृथिव्यादीनां अप्रकोत्तराणामुत्तरोत्तरमोतप्रोतभावेन सूक्ष्मता-
व्यापित्वेनान्तरत्वमनाद्वेनाम्नायते॥ यदिदं सर्वमोतं चेत्यादिना॥ यथा तन्तुषु पटो दीर्घसूत्रेस्तिर्यक्सूत्रे च ओ-
तप्रोतभावेनावस्थितः॥ ॥तथा पार्थिवं सर्वं जगत्कारणभूतायां सूक्ष्मायां व्यापिकायां पृथिव्यामोतप्रोतभा-
वेनावस्थितं॥ यथैवं तथा तत्सर्वं पृथिवीतत्त्वं कारणभूतास्वप्सु ओतप्रोतभावेनावस्थितं॥ यथैवं तथोत्तरत्रै-
वमुत्तरत्रापि योज्यं॥ ॥आपश्च वायाविति॥ ॥आपश्च वायौ हे देवा ओताः प्रोतास्तथैव च॥ अंतरिक्षेषु वायुश्च
लोकेषु स्थपुंगवाः॥९॥ अंतरिक्षाश्च लोकाश्च तथा गंधर्वरूपेषु च॥ लोकाः कादिलोकेषु स्थिता गंधर्वसंज्ञिताः॥१०॥
नन्वापामग्निः कारणं॥ अग्नेराप इति श्रुतेः॥ तथा चापोग्नाविति वक्तव्यं॥ नैष दोषः॥ अग्नेः पार्थिवं वायव्यं चातु-
मनाश्रित्य तर भूतवत्स्वातंत्र्येणावस्थानं नास्तीति तत्कारणभूते वायावपामोतप्रोतभावो व्यपदिश्यते॥ अं-
तरिक्षेषु वायुश्चेत्यादि॥ अंतरिक्षाख्यलोकानां वायोः संचरणस्थानत्वात्स न ओतप्रोतभावेनावस्थितः॥ सूक्ष्मतार-

तम्यत्वावक्रमेणोत्तरोत्तरं सातिशयभोगाऽप्याकारेण परिणतानि संहृतानि पंचस्थानान्येवावस्थानविशेषैर्वर्तितानि लोकव्यपदिश्यं
ते ॥ अत एव सर्वत्र आत्मासु लोकेषु गंधर्वलोके व्यावृत्येवमेकैकस्मिन्लोके बहुवचनप्रयोगः ॥ १ ॥ १० ॥ ॥ चंद्रलोकेषु चादित्यलो
काश्चोतास्तथैव च ॥ चंद्रलोकाश्चानंतलोकेषु सुरपुंगवाः ॥ ११ ॥ देवलोकेषु नक्षत्रलोका ओतास्तथैव च ॥ देवलोकाश्च हे देवा
इंद्रलोकेषु संस्थिताः ॥ १२ ॥ प्राजापत्येषु लोकेषु स्थिताः ऐंद्राः सुरर्षभाः ॥ प्राजापत्यास्तथा लोका ब्रह्मलोकेषु संस्थिताः ॥ १३ ॥
प्राजापत्येषु लोकेष्विति ॥ प्रजापतिः स्थूलप्रपंचाभिमानी विराट् तस्य शरीरारंभकाणि वैराजपदोपभोगसाधनानि पंचभूता
नि प्राजापत्या लोकास्तेष्वित्यर्थः ॥ प्राजापत्यास्तथेति ॥ हिरण्यगर्भस्वरूपापन्नेन ब्रह्मणा पंचीकृतानि ब्रह्मांडारंभकाणि तान्येवावि
यदा दृष्टानि ब्रह्मलोकशब्देनोच्यंते ॥ तेषु कारणभूतेषु कार्यभूताः प्राजापत्यलोका ओतप्रोतभावेनावस्थिता इत्यर्थः ॥ १३ ॥
विष्णुलोके महेदेव ब्रह्मलोकाः सुसंस्थिताः ॥ विष्णुलोकाः स्थिता ओता रुद्रलोकेषु हे सुराः ॥ १४ ॥ रुद्रलोकाः स्थिता लोके ध
ईश्वरस्य सुरर्षभाः ॥ सदाशिवस्य लोकेषु स्थिता ह्यैशाः सुरर्षभाः ॥ १५ ॥ ओताः प्रोताश्च ते लोका ब्रह्मसंज्ञे परे शिवे ॥ १६ ॥
एवं सर्वे सदा साक्षि स्वरूपे प्रत्यगात्मनि ॥ सर्वांतरतमे प्रोता ओता अध्यासतः स्थिताः ॥ १७ ॥ सर्वाधिष्ठानरूपस्तु प्रत्यगात्मा
स्वयंप्रभः ॥ न कस्मिंश्चित्स्थितः साक्षी स्वस्वरूपः सुरर्षभाः ॥ १८ ॥ अध्यासतः स्थिता इति ॥ यथैवमेते सर्वे लोकाः स्वस्वव्या
पके प्रध्यासतः एवावस्थिता एवं अतो न वास्तवाः एवमेव सर्वदा ते सर्वे लोका ब्रह्मलोकांताः स्वगतात्याधिष्ठानभूते सच्चिद्रूपे प्रत्यगा
त्मनि सर्वांतरे मायावेशेनोतप्रोतभावेनावस्थिताः ॥ सर्वाधिष्ठानभूतस्तु प्रत्यगात्मा स्वव्यतिरिक्ते कस्मिंश्चित् ओतप्रोतभा
वेनावस्थितो भवति किंतु स्वमहिम्नि प्रतिष्ठितः ॥ पराधीनप्रकाशानां सिद्धिलक्षणानामेव सत्तास्फुरणसिद्धये तेषु वस्तुष्वोतप्रो ६
तभावः ॥ स्वयं तु स्वयंप्रकाशरूपप्रकाशमानः सत्त्वभावश्च कुतोऽप्यन्यस्मिन्नाधारे ओतप्रोतभावेनावतिष्ठत इत्यर्थः ॥ १९ ॥

एवं पृथिव्यादीनां ब्रह्मलोकांतानां सर्वेतिरे प्रत्यगात्मनिअध्यस्ततया सतीतिं प्रतिपाद्य परमार्थतो धिष्ठानाव्यतिरिक्तत्वमाह ॥ यस्मिन्निति ॥ ॥
यस्मिन्नध्यस्तरूपेण स्थितं तं सर्वमिरूपेण ॥ स एव स्वकं नान्यदिति सम्यग् रूपेण ॥ १९ ॥ १९ ॥ एवं सर्वजगत्कल्पनास्पदत्वेनालनः
सर्वांतिरत्वमुपपाद्यांतर्यामितयापि तत्रातिपादयितुमंतर्यामिब्राह्मणस्य गृह्णीति ॥ यायमात्मेत्यादिना ॥ ॥ यो यमात्मा स्वयं सर्वांतिरस्त
यान्यविवर्जितः ॥ स एव साक्षात्सर्वेषां मतः यामी न चापरः ॥ २० ॥ सर्वांतरः आ उदारि तत्र आत्मा स्वभावः स एव सर्वेषां पृथग्वस्था
पनियमादंतर्यामी न त्वन्यः ॥ मनस्तस्मादन्यः कश्चिदित्यर्थः ॥ २० ॥ अतो धिदेवतमधिभूतमध्यात्मं चतदुपादानत्वेनांतर वस्थि
तः सिस्तस्तमस्तोपाधिकप्रत्यगात्मा तत्तन्नियमनव्यापारयोगादंतर्यामीत्याम्नातः ॥ यः पृथिव्यां तिष्ठन्नित्यादिना तत्करोति ॥
पृथिव्यामिति ॥ ॥ पृथिव्यामपि यस्तिष्ठन् पृथिव्या अंतरः सदा ॥ यं न वेद स्वयं पृथ्वी शरीरं यस्य सर्वपि ॥ २१ ॥ यो तरो यमयत्ये
नां परमि निष्क्रियरूपतः ॥ एव ए वी तन्वसाक्षादंतर्यामी परात्मनः ॥ २२ ॥ यः कारणत्वतत्रात्मा पृथिव्यामपि तिष्ठन् सर्वत्रपृ
थिव्याबहिरवस्थितानतां नियंतुं शक्तो न त्वयमिस्यविशिनष्टि ॥ पृथिव्याअंतर इति ॥ उपादानकारणत्वेन पृथिव्या अभ्यंतर अदृश्
पिव्याप्यवर्तमानत्वात्स पृथिव्या अंतरः ॥ एवमंतवर्तमानं यं पृथिवीदेवता न वेद मत्सदन्यः कश्चिदयं नियंता वर्तत इति यस्य च
या पृथिवी शरीरं शरीरवदात्मादिकानवलोकितं शरीरमस्ति ॥ एवंभूतो यः परमात्मा एतां मत्तमंतरवस्थितः सन्नियमयति
स्वव्यापारे प्रेरयति स एव एवांतर्यामी ॥ नन्वंतर्यमनलक्षणव्यापारयोगात्तस्य विक्रियासिक्रियत आह ॥ यत्तस्य पारमार्थि
कं निष्क्रियरूपं तदपरित्यागेनैवोपाधिवशान्नेष्यतीत्यर्थः ॥ ननु सोपाधिकत्वादयमस्मदादिवत्कश्चिज्जीव एवेत्याशंक्याह ।
परात्मेत इति ॥ अंतर्यामिणोपाधेरासीयत्वेनाभिमानस्याभावादयमेव परात्मनः ॥ विकारजातेष्वयः परः स्वासादिकेः
परात्मेत इति ॥ अंतर्यामिण उपाधेरात्मीयत्वेनाभिमानस्याभावादयमेव परात्मनः ॥ २२ ॥ ॥ अप्सु तिष्ठन्नपां देवो अंतरो यं न ता विदुः ॥ आपः शरीरमस्यैता यो तरो यमयत्यपः ॥ २३ ॥
स्वाद्यसंस्पृष्टः परमात्मेत्यर्थः ॥ २२ ॥

निष्क्रियेति ४

३ = वायुपूर्वस्यसर्वस्यचेतनाचेतनस्य च॥ एषएवहिनःसाक्षादंतर्यामिपरामृतः॥२५॥

एषएवहिनः साक्षादंतर्यामीपरामृतः॥एवमग्नेश्चयोनेनाचांतरिक्षस्यहे सुराः॥२४॥अप्सुतिष्ठन्नितिपर्यायेप्येवंयोज्यं॥
एवपर्यायिद्वयंयथाश्रुतिश्रयायित्वायोगेनेतिष्ठन्यांतरिक्षेतिष्ठन्निसेवंमादीन्यपर्यायान्समानपाठत्वादतिदेशेनसंगृह्णाति॥
एवमिति॥२४॥वायुपूर्वस्येतियोवायौतिष्ठन्नितिनिर्दिष्टोवायुःपूर्वोयस्यपृथिवितिष्ठन्नित्यादिनानिर्दिष्टस्यपूर्वस्यतेःसत
थोक्तः॥तस्यचेतनात्मस्यसर्वस्यकार्यप्रपंचस्ययोनेतास्वव्यापारेषुनियमेनप्रेरयितारषएवसर्वांतरःप्रत्यगात्मैवांतर्यामी
भवतीत्यर्थः॥२५॥नन्विममंतर्यामिणंस्वात्मनिनिष्ठतमस्मदादिवत्पृथिव्यादिदेवताअपिकस्मान्नविदुरित्यतआह॥अदृ
ष्टोयमिति॥अदृष्टोयंसुराश्रोतैवायंतथाश्रुतः॥अमतश्चनथामंताविज्ञाताकेवलंसुराः॥२६॥रूपराहित्येनकस्यचि
दपिचक्षुर्दर्शनस्यायमविषयइत्यदृष्टः॥स्वयंतुचक्षुर्विसंहितत्वादृष्टिस्वरूपइतिद्रष्टा तथाशब्दराहित्यात्कस्यचिदपि
श्रविषयतामनापन्नइत्यश्रुतः॥सर्वश्रोत्रेषुसन्निधानेनालुप्तश्रवणशक्तित्वाच्छ्रोता॥संकल्पात्मकंमनस्तेनाविषयीकृ
तत्वादमतः॥स्वयमलुप्तमननशक्तिःसन्सर्वत्रमनस्सुसंनिधानान्मंता॥निश्चयात्मिकाबुद्धिर्विज्ञानंतत्रसंनिधा
नात्केवलंविज्ञातेवनतुतेनविज्ञानेनविषयीकृतइत्यर्थः॥एतेनादृष्टोश्रुतःश्रोतेतिश्रुतेरर्थःसंगृहीतः॥एवमंतर्या
मिणएवदृष्टृश्रोतृत्वादिरूपेणप्रतिपादनान्नियंतव्यानांदृष्टृप्रतीनामन्यएवनियंतेतिभेदश्चनिमोव्युदस्तः॥अतएव
श्रूयतेनान्योतोस्तिद्रष्टानान्योतोस्तिश्रोतेत्यादि॥२६॥ननुतर्यामित्वेप्यन्यएवजाग्रत्स्वप्नाद्यवस्थासुखदुःखोपस्त्रो
त्कारःसंसारित्वेजीवाइत्याशंक्यतदनन्यत्वप्रतिपादनायषष्ठाध्यायगतंज्योतिर्ब्राह्मणसंगृह्णाति॥रविसोमेत्या
दिना॥रविसोमाग्निपूर्वेषुविनष्टेषुसमास्तिकः॥चित्तसाक्षितयाभातिस्वप्रकाशेनकेवलः॥२७॥ज्योतिर्ब्राह्मणे
हिजाग्रत्स्वप्नाद्यवस्थासुतत्तदवस्थांतर्गतपदार्थव्यवहारलोपस्यात्मविधस्यात्मनस्तत्कृतपुण्यपापादिसंकल
धर्माननुगमनमसंगत्वंस्वयंज्योतिष्ट्वादिनिरतिशयानंदस्वाभाव्यमद्वितीयत्वंचेत्येतानिप्रतिपादितानि॥तत्रा

चेतना४

नि७

मंतरसा

र्श७

170

८६

नस्थात्रयसाक्षिण आत्मनः स्वयंज्योतिष्ट्वप्रतिपादनाय यदाम्नायते॥ अस्तमित आदित्ये याज्ञवल्क्य चंद्रमस्यस्तमिते शांतेऽग्नौ शांतायां वाचि किंज्योतिरेवायं पुरुष इत्यात्मैवास्य ज्योतिर्भवतीत्यादि तेत्संगच्छति॥ रविसोमेति॥ सूर्यादिषु बाह्यज्योतिषु व्यावृत्तेष्वपि आत्मा स्वस्वरूपभूतेश्चैतन्यप्रकाशाश्चित्तस्यांतःकरणस्य साक्षितया स्वरूपप्रकाशेनैव सर्वदा भाति न तु स्वप्रतिभाने बाह्यं ज्योतिरपेक्षत इत्यर्थः॥२७॥ एतेन जाग्रदवस्था वर्णिता॥ चित्तव्यापारेति॥ ॥चित्तव्यापारनाशे तु तदभावं सुरर्षभाः॥ स्वप्रकाशो न जानाति सुषुप्तौ वेदितारमपि॥२८॥ यदा तु स्वप्नावस्थायां चक्षुरादीन्द्रियाणामुपरतत्वाच्चित्तस्यापि बाह्यविषयव्यापारोपरमः केवलं स्वाप्नपदार्थाकारपरिणामेनावस्थानं॥ तदा स एवात्मा स्वप्रकाशांतरनिरपेक्षेण स्वरूपचित्प्रकाशेन स्वस्वप्नावस्थां जानाति॥ सुषुप्तौ वेदेति॥ यदा तु कारणभूतभावरूपाज्ञाने इन्द्रियांतरवच्चित्तमपि विलीयते तदा निर्विकल्पज्ञानमयीं तामप्यवस्थां स्वरूपचित्प्रकाशेनैव अयमात्मा जानाति॥२८॥ आविर्भावतिरोभावरहितस्तु स्वयंप्रभः॥ ज्ञाताज्ञाताखिलं सर्वं सदा यो वेद केवलः॥२९॥ ज्ञाताज्ञातावासनावेधसमस्तं सुरपुंगवाः॥ वेत्त्येवायं न चैवान्यो यदिति समाधिरूपेण॥३०॥ अतस्तिसृष्ववस्थासु स्वयंप्रकाशमानश्चिदात्मा आविर्भावतिरोभावरहितः अनएव सुप्तस्सर्वदा भावाभावौ सर्वं ज्ञाताज्ञातभेदेन द्विविधं सर्वं जगत् केवलो निरस्तसमस्तोपाधिः स्वप्रकाशचिन्मात्ररूपोऽयमात्मा जानाति॥ ज्ञाताज्ञातवासनेति ज्ञाताज्ञातरूपेणेत्यर्थः॥ उक्तं ह्याचार्यैः॥ सर्वं वस्तु ज्ञाततयाऽज्ञाततया वा साक्षिचैतन्यस्य विषय एवेति॥ एवं रविसोमादिबाह्यप्रकाशनिरपेक्षत्वाज्जाग्रदाद्यवस्थासु स्वयं सर्वस्य चासङ्गत्वादात्मनः स्वयंज्योतिष्ट्वं॥ व्यावर्तमानास्ववस्थास्वनुवृत्तेरतस्तद्व्यतिरिक्तश्चेतावत्सिद्धमिति गमयति॥ नेत्येवेति॥ नेत्यवेदितैव ब्रह्मैव केवलं विषयतेन चान्यद्द्वैधमस्ति तस्य परिकल्पितत्वेन मिथ्यात्वादित्यर्थः॥३१॥

८८

म द्वैतेन न पश्यन् द्वैतं न पश्यतीत्याद्याः श्रुतिं व्याचष्टे॥ एवं द्वैतमित्यादिना॥ ॥ एवं द्वैतविचारेण स्वात्मानं वेद यः पुमान्॥
स योगी सर्वदा द्वैतं पश्यन्नपि न पश्यति॥३१॥ एवमुक्तरीत्यावस्थात्रयसाक्षिणं ततो विविक्तं स्वयंज्योतिःस्वभावमेवमात्मा
नं स्वात्मत्वेन यो जानाति स योगी सर्वदा सर्वावस्थासु पश्यन्नपि द्वैतं न पश्यतीत्यन्वयः॥ अयमर्थः॥ विदुषः स्वव्यति
रिक्तस्याविद्यातत्कार्यस्य विद्यया निवर्तितत्वात्तादृशो द्वैतं जगच्चक्षुरादीन्द्रियजनितविशेषविज्ञानेन न पश्यति अ
पि स्वरूपज्ञानेन भासमानमेवं भवति॥३१॥ कुत इत्यत आह॥ द्रष्टृदृष्टेरिति॥ ॥श्लोकः॥ द्रष्टृदृष्टेर्न नाशोऽस्ति
दृश्यमेव विनश्यति॥ न च द्वैतं द्वितीयं नास्ति द्रष्टुरात्मनि केवले॥३२॥ द्रष्टुरात्मनः स्वप्रकाशरूपा यो दृष्टिस्तस्या नाशो
नास्ति यथा मेरोर्दृष्टं यावदीयं साक्षि तथा अविनाशिन आत्मनो दृष्टेरप्यविनाशिनाया वृत्तद्रव्यभावात् अतः स्वस्याः
नाशकाभावान्न कार्य इत्यर्थः॥ एतेन न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वादित्येषा श्रुतिर्व्याख्याता॥ ननु
सा दृष्टिः सर्वदा विद्यते चेत्तर्हि सर्वदा द्वैतस्य जगतः प्रतिभासः कुतो नेत्यत आह॥ दृश्यमेवेति॥ हि यस्माद्दृश्यं द्विवि
यद्वैतं जगन्नश्यति अधिष्ठानयाथात्म्यज्ञानेन प्रतिपन्नोपाधौ विलापितं भवति॥ अतो विषयाभावकृत
बाधपोहौ प्रतिभासेन तु चित्स्वरूपविपरिलोपस्तदित्यर्थः॥ अतस्तद्द्वैतं द्रष्टुः प्रसंगात्स्वस्वरूपप्रकाशेन प्रका
स्यं समाधिसुषुप्त्याद्यवस्थासु नैवास्ति द्रष्टा चिदात्मैव केवलो विद्यते॥ एतेन तु तद्द्वितीयमस्तीत्यादिश्रुतिस्
शार्थी भवति॥३२॥ एवमद्वितीयात्मज्ञाननिष्ठस्य यत्फलं स्यादीनां निरतिशयत्वमाम्नायते॥ एषास्य परमा गति
रित्यादिना तत्संगृह्णाति॥ एषास्येति॥ एषास्य परमा संपदिति च परमास्य तु॥ एषोऽस्य परमो लोक
इति हि परमसुखं॥३३॥ यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति सैषा ब्रह्मनिष्ठा परमा संपत्॥

ॐ

इतरास्तांसंपदां ह्वलक्षणेनानिरस्यान्निस्यादितीयेपरमात्मनिक्षेवपंबसिन्नासंपदिस्यर्थः॥ तथाएषैवास्यविद्वुष्योगतिः परमा॥ ब्रह्मादि
स्तंबपर्यंतासु न्यागतयः॥अविद्यापरिकल्पितत्वादपरमाइत्यर्थः॥ तथास्यविदुषएषएवपरमोलोकः येकर्मफलाश्रयालोकास्तेअप
रमाः॥इदीरितब्रह्मात्मानिष्ठत्सुखावानाविकत्वाच्चपरोलोकइत्यर्थः॥ एतदेवहिपरमंसुखंयन्निरतिशयानंदब्रह्मात्मभावेनावस्थ
स्थानंनखलुनिस्सतरंस्म॥ वैषयिकसुखंष्ठनित्यत्वादपरमंतल्लेशात्मकत्वादुपेक्षणीयमित्यर्थः॥ एवंब्रह्मीभूतःपुरुषःपुनः
कार्यकारणसंघातंनात्मत्वेनाभिमन्यतइत्येतत्सदृष्टांतंश्रुत्याप्रतिपादितं॥ तद्यथाहिनिर्ल्वयनीवल्मीकेमृताप्रत्यस्ताशयीतं॥ यत्का
ति॥ अहिनिर्ल्वयनीमुक्तामिति॥ ॥अहिनिर्ल्वयनीमुक्तांयथाहिस्वात्मनापुनः॥ नपश्यतितथाविद्वान्नदेहंहंमतिस्तवेद॥
॥२४॥ अहिनिर्ल्वयनीसर्पत्वक्सर्पाश्रयेवल्मीकादौ निर्मुक्तांत्यक्तांत्वचंयथाअहिःपुनःस्वात्मत्वेनापेनपश्यति॥ एवंब्रह्म
विद्वानपिविविक्तंदेहादिकंनकान्वितोऽहमात्मावेनाभिमन्यतइत्यर्थः॥२४॥ अपिच॥ देहाद्यात्मतावस्थभेदाधीनत्वान्नस्य
निरूपणादिस्यासमप्रत्ययेननिषेधश्रुतिमुदाहरति॥ नेहनानास्तीत्येवंरहितसमस्तंतेनपूर्वोक्तेषधादिधिकरणलिंगेनदिष्टिं
वर्णानिसवधिारइति॥ सर्वाधारेस्वतःसिद्धेनिरधिवेसन्नोसजिमत्ले॥ प्रत्यग्रूपपरानंदेनेहनानास्तिकिंचन॥२५॥ यस्माद
कांचधर्मब्रह्महैतजगत्कीतिसारस्याधिष्ठानमतस्तदेवतन्नित्यवधस्यावधिरिति॥ युक्तंहैतप्रपंचबन्नस्याध्यस्तत्वशंकांवारयति
स्वतःसिद्धमिति स्वतएवसिद्धंनपुनरधिष्ठानांतरेध्यस्तत्वेनान्याधीनसत्ताकमितियावत्॥ निर्मलइतिमायाव्युदासः॥ एवंभ
तोशिवसंज्ञेप्रत्यग्रूपेणावस्थितेस्मिन्नात्मनिप्रथगपरंनीकमवस्तुपरमार्थतोनास्तीत्यर्थः॥२५॥ श्रुत्युक्तं विधि बाधकमुदा
रति॥ मृत्योरिति॥ मृत्योःसमृत्युमाप्नोतियइहनानेवपश्यति॥ योस्मिन्नात्मगात्मभावेनावस्थितेब्रह्मणिभेदंपश्यति अह
मन्यःअन्यज्जगदीश्वरादिकमितिसोयमविद्यावशीकृतःसन्मृत्योमरणात्पुनःमृत्युं मरणं प्राप्नोति॥ पुनःपुनर्जायमानो
म्रियमाणश्चभवतीत्यर्थः॥ अतउक्तोविधर्मदितीमदर्शनमेवशास्त्रमितिनिगमयति॥ तस्मादिति॥ तस्मादध्यस्तमज्ञानात्का

र्थं चात्मरूपतः ॥२५॥ यस्मादेवं पारमार्थिको भेदो नास्ति तस्माद्ब्रह्मानन्तकार्यं च विषयादि भूतभौतिकं जगच्च सर्वं मय्यद्वितीये
ब्रह्मण्यध्यस्तं। अतश्चेदं सर्वमधिष्ठानात्मरूपेणैकप्रकारेणैव द्रष्टव्यं। यस्मादेकधैवेत्ययमुत्तरश्लोकः ॥२६॥ एवं ह्याम्नातं।
एकधैवानुद्रष्टव्यमेतदप्रमेयमजं ध्रुवमिति। तदयमर्थः ॥ एकधैव महावाक्याद्द्रष्टव्यो हि मुमुक्षुभिः ॥ अयमात्माप्रमेय
श्चाविरजश्च महाध्रुवः ॥२७॥ एकधैवैकेनैव प्रकारेण विज्ञानघनैकरसत्वलक्षणेनायमात्मा मुमुक्षुभिर्महावाक्या
द्द्रष्टव्यः। श्रवणादिलक्षणसाधनकलापानुष्ठानजनितमहावाक्यजन्यात्मसाक्षात्कारः संपादनीयः। महावाक्यादिति
मीति ल्यब्लोपे पंचमी ॥ ननु तद्रूप आत्मा स चेद्द्रष्टव्यस्तर्हि [illegible] कर्मत्वाद्घटवन्नाश्यत्वं स्यादित्यत आह। अ
प्रमेयश्चेति ॥ अन्य एव त्वन्येन प्रमीयते अद्वितीयस्यात्मनः कथमन्येन प्रमेयः स्यादतः स्वविषयसाक्षात्कारे संजातेऽपि स्व
रूपप्रकाशेनैव प्रकाशत इति जवत्यसावप्रमेयः ॥ विरजश्चेति। रजो नाम धर्माधर्मादिमलं तद्रहितः। महान् सर्वका
रणत्वेन सर्वव्यापी ॥ ध्रुवः कूटस्थोऽविनाशी ॥२७॥ तमेव धीर इति मन्त्रं संगृह्णाति। तमेवेति। ॥ तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत
ब्राह्मणः ॥ नानुध्यायेद्बहूञ्छब्दान्वाचो विग्लापनं हि तत् ॥२८॥ तमुक्तविधमात्मानमेव धीरो धीमान्मनुष्यदेहस्थस्तच्छास्त्रेण श्रवि
ज्ञाय पुनः स्वविषयां साक्षात्काररूपिणीं प्रज्ञां कुर्वीत। न खल्वपरोक्षभ्रमः परोक्षज्ञानेन निवर्तत इति भावः। एवमात्मविदि
नात्मविषयान्बहूञ्छब्दान्नानुध्यायेन्नानुचिंतयेत् ॥ ध्यायतेर्लिङ्घाडागमः। कुत इत्यत आह वाच इति। हि यस्मात्तद्बहुशब्दा
नुचिंतनं वाचो विग्लापनं वागिन्द्रियस्य विशेषेण ग्लानिकरं तस्मादित्यर्थः ॥२८॥ उक्तमर्थं प्रमाणयितुं श्लोकेनोपनिषद्वाक्यानि प्रमाणयति पा
देन परा स वा एष महानज आत्मा योऽयमित्यादिकां पञ्चखण्डिकां समाम्नातां संगृह्णाति। स वा एष इति। ॥ स वा ए
ष महानात्माऽजन्मनाशादिवर्जितः ॥ वशी सर्वस्य लोकस्य सर्वस्येशान एव च ॥२९॥ तच्च तावद्रूपस्वरूपं प्रतिपादयते ॥

सर्वो लोको जगत्कारणभूतः परब्रह्मण्यवस्थितः योयं महानपरिच्छिन्न आत्मा जन्मनाशादि सद्भावको सौ साक्षिरूपत्वात्सर्वविकारर-
हितः ॥२१॥ स एव सर्वस्य ब्रह्मेन्द्रादिजनस्य वशी सर्वे अस्य वशे वर्तन्ते ॥ आम्नायते हि ॥ भीषास्माद्वातः पवते भीषोदेति सूर्य इत्या-
दि ॥ न केवलं वशी तस्य च ब्रह्मादिस्तंबांतस्य सर्वस्य ईशान ईशिता च भवति ॥ तत्रेशानत्वं निरंकुशमित्याह ॥ सर्वस्याधिपति-
रिति ॥ ॥ सर्वस्याधिपतिः शुद्धो न भूयान् साधुकर्मणा ॥ कर्मणा साधुनानेव कनीयानसुरपुंगव ॥४९॥ अधिपतिरधिष्ठा-
य पालयिता स्वतंत्र इत्यर्थः ॥ यो ह्यधिष्ठाय पालयति स ईष्टे यस्येशानः स वशी भवत्येवं त्रयाणां विशेषणानामुत्तरोत्तरस्य
पूर्वं पूर्वं हेतुत्वं द्रष्टव्यं ॥ यतोयमात्मा शुद्धो नाधेयातिशयस्वरूपः ॥ अतः साधुना शास्त्रविहितेनाग्निहोत्रादिकर्मणा न
भूयान्न भवति पूर्वावस्थातः केनचिद्गुणेन उपचितो न भवतीत्यर्थः ॥ तथा असाधुना शास्त्रप्रतिषिद्धेन ब्रह्महननादिना
कनीयानल्पतरोपि न भवति पूर्वावस्थातो न हीयत इत्यर्थः ॥ कर्मवशीकृतस्य ह्यात्मनः साध्वसाधुकर्मजन्यातिशयसंभ-
वः संभवति ॥ एष तु निरुपाधिक आत्मा सर्वेश्वरः ॥ स हि तस्य सर्वस्य जगत ईशानशीलः अतस्तं प्रति तत्र साध्वसाधुक-
र्मणि तस्मिन्नुपचयापचयलक्षणं वैकार्यं जनयितुं न प्रभवत इत्यर्थः ॥५०॥ ॥ एष सर्वेश्वरः साक्षाद् भूताधिपतिरेव च ॥
भूतपालश्च लोकानामसंभेदाय हेतुराः ॥५१॥ एष सेतुर्विधरणस्तमेवं ब्राह्मणोत्तमाः ॥ वेदानुवचनेनापि यज्ञेन स-
त्कृतेन च ॥५२॥ दानेन तपसा देवास्तथैवानशनेन च ॥ ॥ तथा साक्षादेष एव प्रसंगात् ब्रह्मादिस्तंबांतानां सर्वेषां
भूतानामधिपतिः ॥ तथा तानि भूतानि पालयतीति भूतपालः ॥ का ब्राह्मणक्षत्रादीनां असंभेदो लोकानां नाम संभेदा-
य तेन तन्मर्यादायाः संभेदो विक्रमो माभूदित्येतदर्थं एष एवात्मा विधरणो वर्णाश्रमादिव्यवस्थायां विधारयि-
तासन् सेतुर्भवति ॥ यथा लौकिकः सेतुः संभेदहेतुस्तद्वदयं भवतीत्यर्थः ॥ अयं भावः ॥ तं प्राणी तत्कृतिस्तत्से-
के मार्गे योनुतिष्ठति तज्जन्यसुकृतेन संसारार्णवसंतारयतीति सेतुः एवं वेदस्वरूपं प्रतिपाद्यतेन दृष्टोसमो

१।

=यज्ञेनाग्निहोत्रादिना दानेन श्रुतिस्मृतिपुराणविहितेन तुलापुरुषादिना तथा अनशनरूपेण =

पं७

वेदानुवचनादेर्यत्साधनत्वमाम्नातं तमेतं वेदानुवचनेनेत्यादिना संगृह्णाति तमेवेति। मंत्रब्राह्मणात्मकस्य कृत्स्नस्य वेदस्य नित्यस्वाध्यायलक्षणमनुवचनं॥ तथा तत्प्रतिपादनं नित्यनैमित्तिकरूपेण तपसानाशकेन कृच्छ्रचान्द्रायणादिना॥ अनशनमनाशकं न कामानशनं विवक्षितं न तु भोजननिवृत्तिस्तथा सति जीवनलोपप्रसंगेन विद्यानुत्पत्तिप्रसंगात्॥ एवं मुनिर्भवतीत्येवं विद्वान्स मुनिर्नतभोजनः॥४॥ नेति नेतीति निकृष्टेऽयमेष सर्वसाधकः॥ एवमेतैर्वेदानुवचनादिभिस्तमुक्तविधमात्मानमेव यो वेत्तुमिच्छति॥ अत्र तृतीयाश्रुत्या अंतःकरणशुद्धिद्वारा वेदानुवचनादीनां विविदिषासाधनत्वमुपन्यस्तं सन्योतानन्तविविदिषुः पुनर्वक्ष्यमाणैः शांतिदांत्यादिभिः श्रवणादिभिश्चोत्पन्नया विद्यया तमुदीरितरूपमात्मानं साक्षात्कुर्वन्नेव मननधर्मयोगान्मुनिर्योगी भवति। तद्विरोधात्मज्ञो जनस्तस्य त्वनात्मविषये सत्यपि मनने कर्मसंबंधात्कर्मित्वमेव न मुनित्वं। आत्मवित्तु कृतकर्तव्यता केवलं मुनिरेव। अनेन त्व एतमेव विदित्वा मुनिर्भवतीति श्रौतमवधारणं व्याख्यातं भवति। सर्वस्य वशी सर्वस्येशान इत्यादिना विधिमुखेन प्रतिपादितस्यात्मतत्त्वस्य सोपाधिकत्वशंका मा भूदिति पुनर्व्यतिरेकमुखेन यद्वाङ्मनसागम्यस्वरूपं प्रतिपादितं स एष नेति नेत्यात्मेत्यादिश्रुत्या तत्संगृह्णाति। नेति नेतीति॥ इदमर्थद्वा वीनेति शब्देन सन्निहितं स्वयं परात्मस्वरूपं वीप्सया च तस्य सर्वस्य प्रतिषेधः॥ तदयमर्थः॥ यदिदं द्वैतं जातमस्ति तत्सर्वं नेति नेति स एष सर्वसाधकः अविद्याकर्मादिसर्वव्यवहारनिष्पादकः॥ नान्यः कश्चित्कर्ता भोक्ता परमार्थतो विद्यत इत्यर्थः॥४॥ तस्य च सर्वनिषेधावधिभूतस्यात्मनः स्वाभाविकं रूपमाह। सोयमिति। सोयमात्मा सदाग्राह्यः स्वरूपो न हि गृह्यते॥५॥ योयमुदीरितरूपः प्रत्यगात्मा स सर्वदा ह। स्तपादादिभिरिंद्रियैरग्राह्यस्वभावः न ह्यसौ केनचिदिंद्रियेण गृह्यते॥ इंद्रियाणां रूपादिमत्त्वे विषयत्वात्॥४॥

=ति नेति नेतीति विलाप्य सर्वनिषेधावधिभूतो योयं निकृष्टो निरस्तसमस्तोपाधिक आत्मा स एष =४

६

तथा शीर्यते न तावद्ग्रहदेवानैर शीर्यते॥ असंगः [illegible] भगवान्सर्वदा न हि सज्जते॥४५॥ तथायमात्मा अध्यस्तजयं च वदिहारणैस्त्वस्तुपो
पि न भवति न स्थलत्वसो शीर्यते निरवयवत्वेन [illegible]धारणासंभवाद तो हस्य निबाधावधिभूतं न तत्त्वं सर्वदा बाधविभुरस्तुरूपमि
त्यर्थः॥ नन्वपगमापगमनवतो हस्य स्पसंपर्कवशात्तदधिष्ठानस्यात्मनोपि विकारः किन्न स्यादत आह॥ असंगरूप इति॥ पद्म
पत्रवन्निर्लेपस्वरूपः न हि सौ[illegible] ऽत एवासौ सीयते न [illegible] पिरप्यस्ति मानाभावात्॥ असक्तिहेतोर्दृश्यत्वस्य च मिथ्याभू
तस्य परमार्थतया आत्मसंगकल्पाभावात्संभवाच्च हि मोऽस्मरादि[illegible] भिरात्क्रियते इति भावः॥४५॥ तदेतदृचा
भ्युक्तमिति श्रुत्या प्रतिपादितार्थं संवादितमेनोदाहरति [illegible] मन्त्रसंगच्छते ति॥ एषमित्य इति॥ ॥एष नित्यो महिमा ब्राह्मण
स्य न वर्धते कर्मणा नो कनीयान्॥ तस्यैव स्यात्पदवित्तं विदित्वा न लिप्यते कर्मणा पापकेन॥४६॥ स एष नेति नेत्यात्मेति श्रुत्या
अतद्व्यावृत्तिमुखेन यदात्मनः स्वरूपं प्रतिपादितं एष एव ब्राह्मणस्य ब्रह्मविदो नित्यो महिमा अन्ये तु महिमानः कर्मकृत
त्वादनित्याः अयं तु स्वाभाविकत्वान्नित्य इत्यर्थः॥ कुतो नित्यत्वमत आह॥ न वर्धत इति॥ पुण्यपापरूपेण द्विविधेन कर्मणा वृद्धिं वृद्धिल
क्षणां विक्रियां न प्राप्नोति॥ विकारहेतुसंगविरहस्य प्रतिपादितत्वात्॥ अतो निर्विकारत्वादेव एष नित्यो महिमेत्यर्थः॥ तथा
च तस्यैव महिम्नः पदवित्स्यात्॥ पद्यते गम्यते ज्ञायते इति पदं स्वरूपं तस्य पदस्य वेदिता स्यादित्यर्थः॥ तद्वेदनस्य फलमाह
तं विदित्वेति॥ तं नित्यमहिमरूपमात्मानं साक्षात्कृत्य विद्वान्पापकेन कर्मणा न लिप्यते॥ अत्र पापशब्देन पापवत्पुण्यस्या
पि संसारहेतुत्वाच्चोभयं विवक्षितं॥ अतः संसारहेतुभूतेन पुण्यपापरूपेण द्विविधेन कर्मणा लेपो विदुषो विषयानि
वर्तत इत्यर्थः॥४६॥ तत्र विद्यासंगो बहिरंगसाधनानि वेदानुवचनादीनि प्रागदर्शितानि अथ तस्मादेवंविच्छान्तो दान्त इ

सत्यादिश्रुतिप्रतिपादितान्यंतरंगसाधनानि दर्शयतीति तस्मादिति॥ ॥तस्माद्ब्रह्मज्ञानलाभाय विद्वान् शांतो दांतः सत्यवादी
भवेच्च॥ कर्मत्यागी सर्ववेदांतसिद्धं विद्याहेतुं संततं त्वनुपेयात्॥४७॥ यस्माद्वितीयात्मविज्ञानं मोक्षविघ्नफलं तस्माद्ब्रह्माभा
परोक्ष्यादिगुणयुक्तो भवेत्॥ तत्र शांतो बाह्येंद्रियव्यापारादुपरतः॥ दांतो मानसविषयतृष्णाभ्यो निवृत्तः॥ सत्यवादी
ति॥ एतच्च सत्यवदनं ब्रह्मसत्ययोगांगोपलक्षणं॥ कर्मत्यागीति श्रुतिगतोपरतपदस्य व्याख्यानं ज्ञानांतरसाधनानि विद्या
विरोधीनि यानि कर्माणि तत्त्यागी भूत्वेत्यर्थः॥ सर्ववेदांतसिद्धमिति॥ श्रोतव्यो मंतव्य इत्यादिवेदांतप्रतिपादितश्रवणम
ननादिकं विद्याहेतुं निरंतरमुपगच्छेदित्यर्थः॥४७॥ तथा जाबाल्युपनिषदादिषु प्रतिपादितं त्रिपुंड्रधारणादिकमपि
शिवप्रीतिकरत्वेन परविद्यासाक्षादंतरंगसाधनमित्याह॥ त्रिपुंड्रमिति॥ ॥त्रिपुंड्रमुद्धूलनमास्तिको नमः सदाचरेच्च
करवेदनेरतः॥ शिवा वारि शब्दं च जपेद्विशेषतः प्रपूजयेद्भक्तिपुरःसरं हरं॥४८॥ साधनैः सकलैः सहितः सुराः वेदने
न समस्तमिदं जगत्॥ स्वरूपतया वस्तु निश्चितं वेद हस्ततलस्थितबिल्ववत्॥४९॥ साधनैः सकलैरित्यादि॥ वेदान्त
वचनादिभिः शांतिदांत्यादिभिः श्रवणमननादिभिश्चेत्यर्थः॥ सहित इति॥ हस्ततलस्थितबिल्वफलवत्सर्वस्य
दृश्यजातस्य परिच्छिन्नरूपत्वमापरोक्ष्येण यो वेद जानातीति॥४९॥ तस्य किं भवतीत्येतत्प्रतिपादयति॥ नैनमिति॥
नैनं पाप्मा तरति ब्रह्मनिष्ठं सर्वं पापं तरति निर्दहते च॥ नैनं पाप्मा तपति ब्रह्मनिष्ठं सर्वं पापं तरति स एव ब्रह्मविद्भव
परंपरोपभोग्यफलं तत्सर्वं पुण्यपापमतिक्रामति॥ तथाय श्रोत्र आहतमायामयं कार्यजातमस्ति तत्सर्वमतिक्रा
मति। एवं हि श्रूयते। एतमु हैवैते न तरत इत्यतः पापमकरवमित्यतः कल्याणमकरवमिति उभे उ हैवैष एते तरति

१ = आत्मतत्त्व॥५०॥ एवं सम्यक् ज्ञानिनं पाप्मा पुण्यपापलक्षणः न तरति नातिक्रामति = १

श्री २९

नैनं कृताकृते तपत इति। तत्र च कृताकृतयोरुभयोरपि पुण्यपापयोस्तरणीयत्वं तापकत्वं च प्रतिपादितं एवमत्रापि पा
पातरणमुभयोरुपलक्षणार्थं स्पष्टं। नैनं पाप्मा तरतीति श्रुतिव्याख्याय नैनं पाप्मा तपतीति तापकत्वं च प्रतिपादिकां श्रु
तिमपि संगृह्णाति। नैनमिति कृताकृतलक्षणः पुण्यपापरूपः पाप्मा … ब्रह्मविदं न तपति। अत एव ज्ञानाग्नि
ना सर्वान् दहति। कृताकृतयोः पुण्यपापयोरतापकत्वं तैत्तिरीयकेऽप्याम्नातं॥ एतं ह वाव न तपति किमहं साधु नाक
रवं किमहं पापमकरवमिति। तथा गीतास्वात्मज्ञानस्य सर्वपापनिर्दाहकत्वं भगवतोक्तं। यथैधांसि समिद्धोऽग्निर्भस्म
सात्कुरुतेऽर्जुन। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा इति॥५०॥ सोऽहं भगवतापि … मे … सह दा
स्यामीति। अत्यास्वात्मसहितं सर्वस्वं ब्रह्मोपदेष्ट्रा कारिणे गुरवे देयमिति प्रतिपादितं तत्स्पष्टं॥ इत्थमिति। इत्थं ब्रह्मस्वा
त्मभूतं विदित्वा ब्रह्मज्ञाः ह्यवं देहमतस्वकीयं अर्थं संबद्धीन्जातं समस्तं दद्याद् … शायमर्पयेत्॥५१॥ ५१॥
तथाविधस्य गुरोर्मातापितृरूपत्वेन सर्वदा … न कार्यं इत्यस्यार्थस्य प्रतिपादकं यास्कवचनं दाहृतमपि … प
ति। य इति॥ य आतृणत्यवितथेन कर्मणा … दुःखं कुर्वन्नमृतं संप्रयच्छन्। तं विद्यात्पितरं मातरं च तस्मै न द्रु
ह्येत्कृतमस्य जानन्॥५२॥ अवितथेन परमार्थोपदेशेन यो गुरुः कर्मणावाक् … आविध्यति … कुर्वन्नदुःखं
दुःखं कुर्वन्। लौकिको हि कर्णभेदने दुःखहेतुर्भवति। न त्वेवं दुःखाभरणमात्रमपि। तर्हि अमृतं न मरमात्मस्व
रूपं संप्रयच्छन्। स्वरूपभूतोऽप्यात्मा प्राग्ज्ञानावृतत्वेन नष्टप्राय आसीत् पुनर्गुरूपदेशेन … दृगतत्वामीकरवदु

५२

नलभ्यमानोन्तवतास्यामिप्रायः ॥ नमम तत्वशरीरं गुरुमेव मातापितरु आजानीयात् स्मर्यते हि ॥ सोहि विद्यातस्तं जनयति तच्छ्रेष्ठं ज
न्म शरीरमेव मातापितरौ जनयत इति ॥ अतः कारणादस्य गुरोः संबंधी ह्यतमम तत्वसाधने ब्रह्मोपदेशरूपं कर्म जानन् तद्
त शनया तस्मै न कदाचिदपि द्रोहो न कार्यः ॥५३॥ एनं मंत्रार्थं प्रपंचयति ॥ स्वदेशिकस्येत्यादिना ॥ ॥ स्वदेशिकस्यैव शरीरचिं
तनं भवेदनंतस्य शिवस्य चिंतनं ॥ स्वदेशिकस्यैव तु पूजनं तथा भवेदनंतस्य शिवस्य पूजनं ॥ स्वदेशिकस्यैव तु नामकीर्ति
शिवादिशब्दस्य च कीर्तनं भवेत् ॥ स्वदेशिकस्यैव तु बोधनं तथा भवेदनंतस्य शिवस्य बोधनं ॥५४॥ तस्माद्विद्वान् सर्व
मतो विहाय श्रद्धायुक्तः सद्गुरुसन्निधौ ॥ विद्याकोशं वेदवेदांतनिष्ठं गच्छेन्नित्यं स स धर्मादियुक्तः ॥५५॥ यत्कृत्यं स
कृत्यं मयापरब्रह्मरूपायुक्तेन संकीर्तितं कर्तव्यं सकलं तु नहि मुने ब्रह्मात्मनिष्ठस्य तु ॥ स्मर्तव्यं सकलं तथा नहि सदा ब्रह्मैव सच्चित्सुख
रवसंपूर्णस्वनतोदितं समरसं शम्भ्व स्वयं भासते ॥५६॥ इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञवैभवस्योपरिभागे ब्रह्मगीता
सूपनिषत्सु दशमोध्यायः ॥ समरसखंडैकरसं ॥५६॥ इति श्रीमत्र्यंबकपादाब्जसेवापरायणेन माधवाचार्येण विरचितायां सू
तसंहितातात्पर्यदीपिकायां यज्ञवैभवखंडस्योपरिभागे ब्रह्मगीताव्याख्यायां बृहदारण्यकव्याख्यानं दशमोध्यायः ॥१०॥ अ०
एवं बृहदारण्यकोपनिषदो ब्रह्मात्मैक्यपरत्वं व्याख्यायगाने सामान्यं दर्शयितुं कठवल्ल्युपनिषदो पैदंपर्यं प्रतिपादयितुमयम
ध्याय आरभ्यते ॥ अस्तितत्परमिति ॥ ब्रह्मोवाच ॥ अस्ति तत्परं साक्षाद्दुर्दर्शं गूढमनुप्रविष्टं सर्वत्र गुहायां निहितं परं ॥ २९
तद्विदित्वा महाधीरो हर्षशोकौ जहाति च ॥ तत्र च तं दुर्दर्शमित्यतः प्राकृतस्य मंत्र संदर्भस्याख्यायिकारूपत्वेनाविद्यात्मकस्यार्थस्य स
ज्यविद्यास्वरूपोपयोगिनस्तं दुर्दर्शमित्यादौ एवमंत्रार्थरूपार्थं तेऽत्र संग्रहंते ॥ यत्र समानः पाठस्तच्चेनेय कृपाकृतिरूपाहेतव्या

व्यायत्रनुपाठे विशेषस्तत्र मर्त्यभूतां श्रुतिमभ्युदाहराम॥ तदयमर्थः॥ दुर्दर्शं दुःखेन दर्शनीयमतिसूक्ष्मत्वाच्छशानुत्तोऽम गूढं गहनं स्थान
मनुप्रविष्टं प्राकृतविषयज्ञानैः प्रच्छन्नमित्यर्थः॥ गुहायां बुद्धौ निहितं स्थितं विकारजातेभ्यमुपरमो ह्येवंविधमात्मतत्त्वं विद्यते॥ तद्विदित्वा
साक्षात्कृत्य उत्कर्षापकर्षकृतौ हर्षशोकौ विद्वाञ्जहाति॥ ज्ञेयस्यात्मतत्त्वस्यानतिरिच्यमानेन हर्षशोककारणयोरुत्कर्षापकर्षयोरभावात्सम
नादित्यर्थः॥१॥ अन्यत्र धर्मादित्यमत्रस्यार्थं संगृह्णाति॥ धर्मादिभ्य इति॥ धर्मादिभ्यः परं तत्तु भूताद्भव्याच्च यत्तन्मा॥२॥ यत्पदमामनन्ति वेदाश्च त
पांसि परमं पदं॥ ब्रह्मचर्यं यदिच्छन्तश्चरन्ति शिवाय एव सः॥३॥ एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परं॥ एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्॥४॥
आदिशब्देन अस्पृष्टधर्मादिसंग्रहः॥ धर्मात् शास्त्रीयधर्मानुष्ठानात्स्य पृथग्भूतं तथा अधर्माद्विहिताचरणरूपात्पापात्परं पुण्यपापसं
स्पर्शरहितमित्यर्थः॥ भूताद्भूतकालावच्छिन्नाद्भविष्यत्कालावच्छिन्नात्परं नित्यं वर्तमानमित्यावत्॥ ईदृग्विधं यत्तत्सर्वे वेदाः प्रतिपा
दयन्ति सर्वाणि च तपांसि पदं पदनीयं यद्वदन्ति यत्प्राप्त्यर्थानि भवन्तीत्यर्थः॥ तथा यत्तत्त्वं प्राप्तुमिच्छन्तो गुरुकुलवासादिलक्षणमन्यदपि
ब्रह्मचर्यं चरन्ति मुमुक्षवः सतां हि शोर्थः शिव एव एतद्ध्येवाक्षरमित्यादिकं तत्ते पदं संग्रहेण ब्रवीम्योमित्येतदिति अतो यत्प्रणवात्मकमक्षर
माम्नातं तद्देवतद्ध्येवेन परामृश्यते॥ एतदेव प्रणवात्मकमक्षरं हिरण्यगर्भादिलक्षणमपरं ब्रह्म॥ तथैव देवाक्षरं निरस्तसमस्तोपाधिकं
सच्चिदानन्दैकरसं परं ब्रह्म प्रणवस्य तदुभयप्रतीतिकत्वात्तादात्म्यव्यपदेशः॥ अत एव देवाक्षरमपरं ब्रह्मात्मनोपास्यं विज्ञातव्यं परं ब्रह्म स्व
स्वाधिकारानुरूपेण ज्ञात्वा योपादित्सति ज्ञातव्यं परं ब्रह्म प्राप्तव्यमपरं ब्रह्म वा तस्य तद्भवति॥५॥ अत एवैतदपरब्रह्मप्राप्त्युपायत्वाद् ब्र
ह्मप्राप्त्यालम्बनानां मध्ये श्रेष्ठं प्रशस्ततमं एतदालम्बनं श्रेष्ठमेतदालम्बनं परं॥ एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते॥६॥ एतदालम्बनं परं
ब्रह्मविषयत्वात् अतः परापरब्रह्मणा एतत्प्रणवात्मकमालम्बनं ज्ञात्वा परं ब्रह्म ज्ञानादर्चिरादिमार्गेण ब्रह्मलोकं प्राप्य च महीयते तेन नु

स्म

प्रवणेन परं ब्रह्म ज्ञानच्छ्लोकत्वतदिति श्लोकः। अस्यैव श्लोकोऽत्र स्त्वश्लोकः हार्दाग्नात्रा मध्यस्थिते श्लोकः मीयेपरस्मिन्ब्रह्म
णि एकीभूतः सन्महीयते॥ अथ ते न प्रणवेन ज्ञातव्यं परं ब्रह्मस्वरूपं तनोनिर्दिशति॥ न जायत इति॥ न जायते म्रिय
ते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्॥ अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥ १८॥ जननम
रणे योऽसायोत्तद्भावविकारयोरात्मनि प्रतिषेधात्तन्मध्यवर्तिनो विकारा अपि तत्र न सन्तीत्यर्थात्सूचितं प्रतिपादितं भवति॥
स च सर्वक्रियारहितः आत्मा विपश्चिन्मेधावी अपरिलुप्तप्रज्ञास्वभावात् किं च नायमात्मा कुतश्चित्कारणान्तरा
दुत्पद्यते॥ तथापि स्वस्य स्वान्तरस्यैवाभावात्तन्तुविद्यदेरिव वस्तु विघात इति॥ तथा॥ न बभूवेति॥ तस्मादात्म
नः कश्चिदर्थान्तरभूतः पदार्थो न बभूव नोत्पन्नः॥ आत्मन आकाशः संभूत इत्याद्या श्रुतिस्तु मायावशात् द्वैतप्रपञ्चस्या
द्वितीये ब्रह्मण्यध्यासप्रतिपादनपरा तस्मात्कारणान्तराभावादयमात्मा अजो जनिरहितः॥ अत एव नित्यो ध्रुवः शा
श्वतः अपक्षयवर्जितः पुराणः पूर्वस्मिन्कालेऽपि नवः निरवयवत्वेन तदुपचयापचययोरभावात्सर्वदा एकरूप एवेत्यर्थः॥
एवंविध आत्मा स्वाधिष्ठिते शरीरे शस्त्रादिभिर्हन्यमाने न हन्यते न हिंस्यते॥ १९॥ ननु श्लोकेऽस्मिन्घटस्य पतमाने आत्मा अन
स्यात्मनो हिताहितरूपते जनस्तावात्मा नाहं हहत इत्यस्वरूपेण सर्वजनसंमतापि त्यत आह॥ य एनमिति॥ य एनं वेत्ति हन्तारं
यश्चैनं मन्यते हतम्॥ उभौ तौ न विजानीतो नायं हन्ति न हन्यते॥ २०॥ एवमुक्तविधमात्मानं हन्तारं यो वेत्ति अयमस्य हन्ते
ति यो जानाति यश्चैनमात्मानं हननक्रियाध्यासं मन्यते तावुभौ नैव जानीतः यतो नायमात्मा हन्ति न चासौ हन्यते निर्वि
कारस्यात्मनः क्रियाप्रसक्तेरद्विपयत्वपोरसंभवादित्यर्थः॥ अणोरणीयानित्यादि॥ अणोरणीयान्महतो महीयाना
त्मास्य जन्तोर्निहितो गुहायाम्॥ तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमस्य॥ २१॥ आत्मा सोऽस्त्यपरिमा
णाद्व्याद प्यणीयानतिशयेनाणुः॥ तथा महतो महत्परिमाणादपि महीयान्महत्तरः अणुमहत्त्वापदस्ति श्लोकेऽत्रैव स्त

९२

तत्सर्वमनेनैव कारणभूतेनात्मना लब्धसत्ताकं सद्भवतीति तदुभयव्याकृत्वा दात्मनोणीयस्त्वादिव्यपदेशः॥ सआत्माअ
स्यजंतोर्जनिमतो ब्रह्मादिस्तंबांतस्य प्राणिजातस्य गुहायां हृदये निहितः आत्मभावेनावस्थित इत्यर्थः। तं तथावि
धमात्मानमक्रतुरकामः दृष्टादृष्टविषयविलक्षणः पुरुषः पश्यति साक्षात्करोति धातुः प्रसादान्मन आदीनि करणा
नि शरीरस्य धारणात् धातव उच्यंते तेषां धातूनां प्रसादात् विषयोपभोगजनितकालुष्यविरहात् स्य च प्रत्यगात्मनो म
हिमानमकर्मनिमित्तवृद्धिक्षयरहितं रूपं सलक्षणं यदा आपरोक्ष्येण जानाति तदा वीतशोकः संसारबंधविनिर्मुक्तो भवतीत्यर्थः॥
दूरं व्रजतीत्यादि। दूरं व्रजति चासीनः शयानो याति सर्वतः॥ कस्तं साक्षान्महादेवं मदन्यो ज्ञातुमर्हति॥ ९॥ आसी
नः अवस्थितोऽचल एव सन् दूरं व्रजति तथा शयानः सन् सर्वतो याति गच्छति॥ सर्वगते प्रत्यगात्मनि आसनव्रजनशय
नादीनां परस्परविरुद्धधर्माणां व्यस्तत्वात् उपपद्यत एव प्रतिभासो न विरुध्यत इत्यर्थः। स विरुद्धधर्मयोगः परिच्छि
न्नस्य न संभवतीत्यर्थः॥ अपरिच्छिन्नोऽयमात्मा महादेवः॥ ९॥ एतेन मदन्य इति गतं महादेवमिति पदस्य कार्यं भवति॥
तं महादेवं मदन्यः को वा साक्षादयमहमस्मीति ज्ञातुमर्हतीति नाचिकेतसं प्रति मृत्युर्वाक्यं अशरीरमिति॥ अश
रीरं शरीरेषु अनवस्थेष्ववस्थितं॥ महांतं विभुमात्मानं मत्वा धीरो न शोचति॥ १०॥ स्वेन स्वरूपेण शरीररहितं न
माकाशकल्पं॥ अनवस्थेष्ववस्थानरहितेषु अनित्येषु देवपितृमनुष्यादीनां शरीरेष्वात्मभावेनावस्थितं स्वयं नित्यं
महांतमाकाशादिवदस्य महत्त्वमापेक्षिकं माभूदिति विभुं। नाप्यविभुमिति। विभुं व्यापिनमपरिच्छिन्नमात्मानं
सर्वप्राणिष्वहमिति प्रत्यक्तेनोल्लिख्यमानं मत्वा मननेन निश्चित्य पुनः संसारशोकं न प्राप्नोति॥ १०॥ नायमात्मेति

९२

धीन॥ नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्॥

इति॥ नायमात्मा प्रवचनेनानेकवेदाध्ययनेन लभ्यः लब्धुं शक्यः नापि मेधया ग्रंथधारणशक्त्या च॥ न बहुना श्रुतेन नात्मन्तरागस्य श्रवणेन केनचित्तदुपायेन लभ्यस्य इति॥ उच्यते॥ यमेव स्वात्मानमेष साधको वृणुते प्रार्थयते तेनैव साधकेनायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेनेत्यर्थः। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्॥ ११॥ अयमात्मा प्रवचनेनानेकवेदाध्ययनेन लभ्यः लब्धुं शक्यः नापि मेधया ग्रंथधारणशक्त्या च। न बहुना श्रुतेनात्मस्वरूपश्रवणेन तदुपायेन लभ्य इति॥ उच्यते॥ यमेव स्वात्मानमेष साधको वृणुते प्रार्थयते तेनैव साधकेनायमात्मा लभ्य उपलब्धुं शक्यः तस्य साधकस्यैष आत्मा स्वां तनुं निरस्तसमस्तोपाधिकं स्वकीयं रूपं विवृणुते प्रकाशयति॥ ११॥ नाविरत इति॥ नाविरतो दुश्चरितान्नाशान्तो नासमाहितः। नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्॥ १२॥ दुश्चरितात्पापाचरणादविरतोऽनुपरतः॥ एनमुदीरितमात्मानं न प्राप्नोति न प्राप्नुयात्। नाप्यशान्तः इन्द्रियलौल्यादनुपरतः तथा असमाहितचित्तः कार्यान्तरासक्तचित्तो प्येनं प्राप्नुं न शक्नोति। तथा अशान्तमानसः अशान्तमव्यावृत्तं विषयेभ्यो मानसं यस्य सोऽपि नैनं प्राप्नोति॥ यस्तु दुश्चरिताद्विरतः॥ इन्द्रियलौल्याच्च शान्तः समाहितचित्त उपशान्तमानसश्च स एवैनं भासमानं गुरुशास्त्रप्रमितेन प्रकृष्टेन निर्विचिकित्सापरोक्षज्ञानेन प्राप्नोतीत्यर्थः॥ १२॥ यस्य ब्रह्मेति॥ यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः। मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः॥ १३॥ यस्यात्मनः ब्रह्म क्षत्रं च उभे अप्योदनः अशनं भवतः उपलक्षणमेतत्। ब्रह्मक्षत्रोपलक्षितं सर्वं जगदुपसंह्रियमाणं यदस्य परमात्मन इदमोदनस्थानीयं भवति सर्वहारो मृत्युश्चोपदंशस्थानीयः॥ मृत्युर्यस्योपसेचनमिति परमात्मा यत्र वर्तते तत्स्वरूपमेवं प्रकारविशिष्टमिति दिवमनुष्यादीनां मध्ये को नाम जानीयात्॥ १३॥ उक्तमर्थं रथरूपकल्पनया प्राप्तत्वाभाव्यभावेन विषयितुं जीवेश्वरयोः पाधिकं भेदं सिद्धमेवमनुवदति॥ ऋतं पिबन्ताविति मंत्रस्याभिप्रायः

मा विवक्षितं तं पठति। ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे। छायातपौ ब्रह्मविदो वदन्ति शरीरमथ बुद्धिरसंज्ञितौ तौ।१४। सुकृ
तस्य स्वयंकृतस्य स्वात्मना निर्वर्तितस्य कर्मणः फलभूते ऽस्मिन् लोके अस्मिन् शरीरे गुहां संसारपरिणामरूपां बुद्धिं प्रविष्टौ बाह्यशरीराकाशा
पेक्षया हार्दाकाशं परमं तच्च परब्रह्मोपलब्धिस्थानत्वात् परार्धं मुख्यं स्थानं तत्र प्रविष्टौ हार्दाकाशावस्थितौ बुद्धिसत्त्वान्तर्गतावित्यर्थः। तौ
च जीवपरमात्मानौ ऋतं सत्यमवश्यंभावि कर्मफलं पिबन्तौ भुञ्जानौ। तत्र जीव एव कर्मफलभोक्ता न तु परमात्मा। अनश्नन्नन्यो अभिचाक
शीतीति श्रुतेः। अतोऽत्र छत्रिन्यायेनापिबदपि समुदाये पिबत्वप्रयोगः। तौ च छायातपवत्परस्परविलक्षणौ संसारित्वासंसारित्वादि
दिना ब्रह्मविदः प्रतिपादयन्ति। ये च पञ्चाग्नयः पञ्चाग्निविद्यायुक्ताः त्रिवारं नाचिकेतोऽग्निश्चितो यैस्ते त्रिणाचिकेताः एतेऽप्येवमात्मानौ प्रतिपादय
न्ति। अस्य च मन्त्रस्य जीवपरमात्मपरत्वं भगवता व्यासेनापि सूत्रितं। गुहां प्रविष्टावात्मानौ हि तद्दर्शनादिति।१४। न चानयोर्भेदो वास्तवः
स्फुटार्थपरत्वं मन्त्रस्य दर्शयति। शरीरस्थितिः शरीरस्थः कर्मफलं भुङ्क्ते भोजयिता शिवः। प्रतीतितो वस्तुतोऽभेदस्योपाधिकृतयोः
तयोर्जीवेश्वरयोर्भेदस्त्वौपाधिकस्तदुपाध्योर्मायाविद्ययोर्भेद एव परिच्छिन्ने जलमणिदर्पणादावस्य भेदश्चन्द्रबिम्ब इव प्रतीयते अ
तः प्रतीतिकृत एवानयोर्भेदो न वास्तव इत्यर्थः।।१५।। तत्राविद्योपाधिकृतो यो जीवस्तस्याविद्यया संसारगमनं विद्यया मोक्षगमनं चो
पायं रथरूपकल्पनया प्रतिपादयति। आत्मानमिति। आत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव
च।।१६।। कर्मफलोपभोक्तारं संसारिणमात्मानं रथिनं रथस्वामिनं जानीयात्। तदधिष्ठितं शरीरं रथं जानीयात्तद्रथो ह्यश्वैरि
न्द्रियैराकृष्यते। अध्यवसायलक्षणान्तःकरणपरिणामरूपां बुद्धिं सारथिं विद्यात्। बुद्ध्या हीन्द्रियादि कर्मसु प्रवर्त्यते। संकल्पादिलक्षणं मनः
तत्प्रग्रहं रशनां जानीयात्।।१६।। इन्द्रियाणि हयान्विद्याद्विषयानपि गोचरान्। आत्मेन्द्रियमनोयुक्तं विद्याद्भोक्तारमास्तिकाः।।१७।।

185

चक्षुरादीन्द्रियाण्यश्वान्रूपादिविषयांस्तु संचरणप्रदेशान्॥ एवं शरीरादीनां रथादिरूपत्वमारोप्य स्वामिसंबंधकल्पितं तत्रचारी शरीरादिविशिष्टस्यैवात्म
नो भोक्तृत्वं न चिन्मात्ररूपस्येति दर्शयति॥१८॥ आत्मेन्द्रियेति॥ आत्मशब्दः शब्दशरीरवाची देहेन्द्रियमनोभिः संयुक्तमेवात्मानं भोक्तारं जानीया
त्॥ तद्रहितस्य चिन्मात्ररूपस्य भोक्तृत्वाभावात् ध्यायतीव लेलायतीवा अनश्नन्नन्यो अभिचाकशीतीति श्रुतेः॥१७॥ उक्तं रथकल्पनमुपजीव्याविवेकिनः
इन्द्रियपारवश्यं विवेकिनः स्वाधीनेन्द्रियत्वं च प्रतिपादयति॥ यस्त्विति॥ यस्त्वविज्ञानवान्मर्त्योऽयुक्तेन मनसा सह। तस्येन्द्रियाण्यवश्यानि
दुष्टाश्वा इव सारथेः॥१८॥ यस्त्वमर्त्यः संसार्यात्मा अविज्ञानवान्कार्याकार्यविवेकज्ञानरहितो भवति तथा॥ अयुक्तेनाप्रगृहीतेनासमाहि
तेन मनसा युक्तो भवति तस्याज्ञानिनश्चक्षुः श्रोत्रादीन्द्रियाणि दुष्टाश्ववदवश्यानि वशीकर्तुमशक्यानि दुर्निवारणीयानीति यावत्॥
॥१८॥ यस्तु विज्ञानवान्मर्त्यो युक्तेन मनसा सदा। तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः॥१९॥ यस्तु पुनरुक्तविपरीतेन विवेकज्ञा
नवान्युक्तेन समाहितेन मनसा च युक्तो भवति तस्य विवेकिन इन्द्रियाणि स्ववशानि दान्ताश्ववत्प्रवर्तयितुं निवर्तयितुं च शक्यानीत्य
र्थः॥ एतयोरुभयोः क्रमेण संसारमोक्षयोरपि कारणं विस्तारः॥ यस्त्विति॥ यस्त्वविज्ञानवान्मर्त्यो ऽमनस्कः सदाशुचिः॥ न स तत्पदमा
प्नोति संसारं चाधिगच्छति॥ यस्त्वविज्ञानवान्प्राकृतः अप्रगृहीतमनस्कश्चात एवाशुचिरशुद्धः कामवशीकृतस्तेनाकार्येष्वपि प्रवर्त
नात्स उक्तस्यागुक्तस्य पदनीयमक्षराख्यं प्रतीतिप्रवणं चैकं परब्रह्म न प्राप्नोति न केवलं तदप्राप्तिमात्रं परन्तु अनर्थं जन्ममरणादिलक्ष
णं संसारं प्राप्नोति॥२०॥ यस्तु विज्ञानवान्मर्त्यः समनस्कः सदाशुचिः॥ स तु तत्पदमाप्नोति यस्माद्भूयो न जायते॥२१॥ यस्तूक्तविपरी
तो विवेकी विज्ञानवान्समाहितमनस्कः अत एव सदा सर्वशुचिः शुद्धश्च भवति॥ स तु तत्सानुभूतं पदनीयं ब्रह्म प्राप्नोति॥ तत्पदनीयं विशि

प्रति ५

नघि ॥ यस्मादिति ॥ यस्मात्तत्पदात् प्रच्युतः सन् भूयः पुनर्न जायते संसारमंडले न प्रविशति तादृशं पुनरावृत्तिलक्षणं ब्रह्मस्वरूपं प्राप्नोती
त्यर्थः ॥ २१ ॥ पुनस्तत्पदं विशिनष्टि ॥ विज्ञानेति ॥ विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः ॥ सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदं ॥ २२
निश्चियस्वरूपात्मना सविवेकबुद्धिर्विज्ञानं संकल्पविकल्पात्मकं मनः ॥ तथा च विज्ञानरूपसारथिना नीयमानः प्रगृहीतमनस्क
श्च सन् सविद्यानध्वनः संसारगतेः पारमंतं प्राप्नोति स्वस्वरूपपर्यायात्मज्ञानेन संसारबंधाद्विमुच्यते ॥ तच्च पारं विष्णोर्व्यापनशील
स्य ब्रह्मणः परमं प्रकृष्टं पदं पदनीयं प्राप्तव्यं सच्चिदानंदैकरसं स्वस्वरूपमिति यावत् ॥ २३ ॥ तद्विष्णोः परमं पदमिति श्रुतिवाक्यं स्वयं व्या
करोति ॥ पदं यदिति ॥ पदं यस्य परमं विष्णोस्तद्देवाखिलदेहिनां ॥ पदं परमं महत्तं सशिवः सांबविग्रहः ॥ २४ ॥ रुद्रविष्णुप्रजेशानानामन्ये
षामपि देहिनां ॥ एतेसां बं महादेवं किं भवेत्सरमं पदं ॥ २५ ॥ यत्र नान्यत्पश्यति नान्यच्छृणोतीत्येवं त्रिपुटीहीनं पदं द्युतीयं तत्वं तदे
वाखिलदेहिनां देवमनुष्यादीनां सर्वेषां परमं पदं निरतिशयानंदरूपतया सर्वै रभिलषिततत्वादीदृशं परमं पदमेव लीलया अ
अर्धनारीश्वरविग्रहः शिवः संपन्नः एतदेव सच्चिदानंदैकरसं परशिवस्वरूपं विष्ण्वादीनां गुणमूर्तीनामन्येषामिंद्रादीनां च पर
मं पदं भवतीत्यर्थः ॥ २६ ॥ इंद्रियादीनामुत्तरोत्तरं सूक्ष्मत्वव्यापकत्वप्रत्यक्त्वतारतम्यक्रमेण पदनीयस्य परशिवस्वरूपस्य निरति
शयं सूक्ष्मत्वादिकं प्रतिपादयति ॥ इंद्रियेभ्य इत्यादिना ॥ इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ॥ मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्प
रः ॥ २७ ॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः ॥ भूतकार्याणि तावदिंद्रियाणि स्थूलानि यैरर्थैः शब्दादिविषयैः स्वात्मप्रकाशना
यारभ्यंते तेऽर्थाः इंद्रियेभ्यः स्वकार्येभ्यः पराः सूक्ष्मा महांतश्च तेभ्योऽप्यर्थेभ्यश्च मनः शब्दवाच्यं मनस आरंभकं भूतसूक्ष्मं परं तस्मान्मन
सोऽपि परा सूक्ष्मतरा प्रत्यगात्मभूता च बुद्धिः अध्यवसायाख्यारंभकं भूतसूक्ष्मं बुद्धिशब्दवाच्यं तस्या अपि बुद्धेर्महानात्मा परः तस्य

सर्वांतरत्वात्ततोन्यस्य सूक्ष्मस्य प्रसंगं निवारयन्नाह ॥ पुरुषादिति ॥ पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः पुरुषा
मद्धिरूपा हैरण्यगर्भी बुद्धिर्महानात्मेत्युच्यते । सा सर्वासां बुद्धीनां कारणत्वात्सूक्ष्मतरा व्यापिनी प्रत्यग्भूता च तस्मादपि महतः परं सूक्ष्मतरं प्रत्यग्भू-
तं सर्वमहत्तरं चाव्यक्तमव्याकृतं नामरूपात्मकं सर्वस्य जगतो बीजभूतं मायाप्रकृत्याद्यपरपर्यायं तत्त्वं तस्मादप्यव्यक्तात्परः सूक्ष्मतरः सर्वका-
रणभूतः प्रत्यगात्मा अतएव पुरुषः सर्वस्य कार्यप्रपंचस्य स्वस्वरूपेण पूरयिता यद्वा सर्वस्मात्पूर्वं जुहोतेति पूरुषः ॥१०२५॥ सर्वांतरात्वाच्च नसं-
पात्प्रत्यगात्मनः परं किंचिदपि वस्तु नास्त्येवं सूक्ष्मत्वमहत्त्वप्रत्यगात्मत्वानां तत्रैव परिसमाप्तत्वात्सैव परा काष्ठा पर्यवसानभूमिः ॥ सैव गंतॄणां
संसारिणां परा प्रकृष्टा गतिः गंतव्यं प्राप्तव्यं वस्तु । अन्यास्तु गतयः पुनरावृत्तिमत्यापराः ॥ उक्तविध्यानुगतिः पुनरावृत्तिराहित्येन परा ॥ अत
एवं भगवतोक्तं ॥ यद्गत्वा न निवर्तंते तद्धाम परमं ममेति । एषा च प्रत्यगात्मत्वेन प्राप्तभ्रान्तिरूपस्वाज्ञानमात्राप्या ॥ अतोगयंतरवक्षिया
साध्ये ध्यत्वादनित्यत्वमस्य स्युन शंकनीयमित्यर्थः ॥२६॥ श्रुतिगतं पुरुषपदस्य व्याकरोति ॥ पुरुषो नाम संपूर्णः शिवः सत्यादिलक्ष-
णः ॥ सोऽयमत्रिधरो नान्यो रुद्रो विष्णुरजोऽपि वा ॥२७॥ पुरुषो नामेति ॥ त्रिविधपरिच्छेदरहितः सत्यज्ञानादिलक्षणः परशिव एव बला
८६ सानुरूपशब्दाभिधेयः स एव लीलया स्वस्मिन्वशाः रूपतामाविष्कुर्वन्नुमार्धनारीश्वरविग्रहः सन्त्रिगुणमूर्तिर्यो रुद्रादयोऽपि
न ततः पृथग्भूता इत्यर्थः ॥२८॥ एष सर्वेष्विति ॥ एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते ॥ दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्म-
दर्शिभिः ॥२९॥ एष उदीरितरूपः पुरुषः सर्वब्रह्मादिस्तंबांतेषु भूतेषु आवरणाविद्यया गूढः संछन्नः आत्मत्वेनावस्थितोऽपि
मोहवशाद्देहेंद्रियादिविविक्ततया न प्रकाशते । एवमपि सूक्ष्मदर्शिभिः इंद्रियेभ्यः परा ह्यर्था इत्युक्तप्रकारेण निरतिशयसूक्ष्मात्म
तत्त्वे द्रष्टुं शक्या विद्वद्भिः गुरुशास्त्रसंस्कृतया शास्त्रैकाग्र्यतया अत एव सूक्ष्मया बुद्ध्या स पुरुषो दृश्यते द्रष्टुं शक्यते ॥२९॥ तद्
दर्शनोपायमाह ॥ यच्छेदिति ॥ यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि ॥ महत्यात्मनि नियच्छेत्तद्यच्छेच्छांत आत्मनि ॥ प्राज्ञो
विवेकी वाक् शब्दोपलक्षितं कृत्स्नं बाह्यं विषयमिंद्रियजातं मनसि यच्छेत् नियच्छेत् उपसंहरेत् ॥ अत्र मनसी इति सप्तम्यर्थे प्रज्ञा

१२

स्रुपनिर्विकारे

यच्छेद्वाङ्मनसीति श्रुतिपाठगतं दैर्घ्यं छान्दसमिति मारव्यातं भवति॥ उपसंहरन्वा वाक्करणं तच्च मनः ज्ञाने प्रकाशस्वरूपे बुध्या
स्यआत्मनुपसंहरेत्॥ निश्चयज्ञानरूपां चि बुध्यी तां महत्यात्मनि तत्समष्टिभूते सूक्ष्मतरे हिरण्यगर्भे गोपायेन्नियच्छेत्॥
तञ्च महदात्माभिधं हैरण्यगर्भं बुद्धितत्वं ज्ञाने प्रत्यस्तमिताशेषविशेषत्वेन निर्विकारे सर्वांतरे साक्षिणि चिन्मात्ररूपे मुख्य आ
त्मनि यच्छेत्॥ एवमिंद्रियादिकं कारणपर्यंतं विलाप्य परिपूर्णस्वप्रकाशचिदात्मा तु संघातं परोक्षं भवेदित्यर्थः॥१३॥ पृथिव्या
दीनां स्थूलतानामुत्तरोत्तरमेवैकगुणन्यूनत्वात्सूक्ष्मतारतम्यं दृष्टं किमु वक्तव्यं शब्दादिसर्वगुणरहितस्य निरतिशयं सूक्ष्मत्वमि
ति प्रत्यगात्मविषयेनानंतस्वरूपमुपलक्षयति॥ अशब्दमिति॥ अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगंधवच्च॥
अनाद्यनंतं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते॥१५॥ अशब्दमित्यस्य साधु कार्थं॥ अव्ययमिति॥ यद्धि शब्दादिमद्भवति॥
तत्खलु व्ययधर्मविदं तु परमशिवस्वरूपं शब्दादिरहितत्वान्न व्येति न हीयते इत्यव्ययमनश्वरं॥ अरसमिति॥ आप्यगुणस्य र
सस्य धुदासः॥ अव्ययत्वादेव नित्यमिदी दृग्विधं तत्तो अनादीति॥ आदिः कारणं तद्रहितं अंतः कार्यं तद्रहितं॥ सकारणत्वे कार्य
त्वनापरिणामत्वान्नित्यत्वं कारणमिति तदुभयमनेन व्यावर्त्यते॥ महतो महदु व्याख्या सर्वविलक्षणं नित्यविज्ञप्तिस्वरूपमि
ति यावत्॥ ध्रुवं कूटस्थं न तु निर्विकारं वमीदृग्विधं ब्रह्मात्मानं निचाय्य निश्चित्य मृत्युमुखान्मृत्युगोचरादविद्याकामक
र्मलक्षणात्संसारात्प्रमुच्यते॥१५॥ ननु कश्चिदेवात्मा कस्मात्सर्वैर्न दृश्यत इति तत्र कारणमाह॥ पराञ्चीति॥ पराञ्चि खानि
व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन्॥ कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्॥१॥ महेशो जगत्स्र
ष्टा परमेश्वरः स्वानि खानीति उपलक्षितानि श्रोत्रादीनींद्रियाणि पराञ्चि पराग्गमनस्वभावानि बाह्यशब्दादिविषयप्र
काशनाय प्रवर्तमानानि बहिर्मुखानि सृष्टवान् व्यतृणत् हिंसितवान्॥ उत्ह तुर हिंसानादरयोरिति धातुः यस्मादेवं तस्मा
त्तैरिंद्रियैः पुरुषः पराङ् पश्यति बाह्यानेव शब्दादिविषयानेवोपलभते नो संस्वरूपं जानाति॥ एवमपि कश्चित्तु नदीरो धीमा

श्री

नमन्नरं मोक्षमिच्छन् आवृत्तचक्षुः बाह्यविषयदर्शनसाधनं चक्षुः श्रोत्रादिकमिन्द्रियमेतत्स्वस्वविषये स्वोव्यावर्तितं येन तथाविधो भूत्वा प्रत्यगात्मानमुदीरितलक्षणमसंसार्यात्मतत्त्वमैक्षत्पश्यति ॥ छन्दसि लङ्लिङ्लिटः इति वर्त्तमाने लट् ॥ २१ ॥ पराच इति ॥ पराचः कामाननुयन्ति बाला मृत्योः पाशं ते यन्ति विततस्य मोहात् ॥ बाला अज्ञजना मनुष्याः कामान् काम्यमानान् शब्दादीन् बाह्यविषयाननुयन्ति अनुसरन्ति ते कामिनो मृत्योः अविद्याकामकर्मसमुदायस्य प्रसारितं पाशजालमपि यन्ति प्राप्नुवन्ति अत्र कारणमाह ॥ स्वेति ॥ स्वस्यात्मनो मोहो प्यदाद्यावरणमज्ञानं तद्वशादित्यर्थः ॥ अथ धीरा अमृतत्वं विदित्वा ध्रुवं तत्त्वं यान्ति कामेष्वसक्ताः ॥ २२ ॥ अथ शब्दो मुक्तवैपरीत्ये ॥ धीरा विवेकिनो जनाः प्रत्यगात्मस्वरूपावस्थं स्थानलक्षणममृतत्वं विदित्वा साक्षात्कृत्य ते कामेष्वसक्ताः असंबद्धाः सन्तः कूटस्थं कूटवन्निर्विकारं नित्यं परमार्थतत्त्वं ब्रह्मात्मानं यान्ति प्राप्नुवन्ति ॥ २२ ॥ तद्धि मोपायमाह ॥ येनेति ॥ येन रूपं रसं गन्धं शब्दान्स्पर्शांश्च मैथुनान् ॥ एतेनैव विजानाति किमत्र परिशिष्यते ॥ २३ ॥ येन विज्ञानेन बाह्यान् रूपादिविषयान् मैथुनान् मिथुनसंबंधान्सुखविशेषांश्च विजानाति विस्पष्टं जानाति एतेनैव देहादिसंघातविलक्षणेन चिन्मात्रप्रकाशेन आत्मना ति विजानाति यो रूपादिसकलप्रत्ययसाक्षी स एवात्मा न तु देहेन्द्रियादिसंघातस्तस्य रूपादिमत्त्वेन घटादिवज्जडत्वादिति भावः ॥ अत्रास्मिन्लोके विज्ञेयं किं परिशिष्यते सर्वमेव तु चिन्मात्ररूपेणात्मना विज्ञेयमेव भवति न किंचित्परिशिष्यत इत्यर्थः ॥ २३ ॥ तस्य साक्ष्यात्मनः स्वरूपविशेषं प्रतिपादयति ॥ जाग्रदिति ॥ जाग्रत्स्वप्नसुषुप्त्याख्यं पुरुषेणानुपश्यति ॥ महान्तं परमात्मानं मत्वा धीरो न शोचति ॥ २४ ॥ जाग्रदादिस्थानत्रयं येन चिन्मात्ररूपेणात्मना अनुगतेन पश्यति जानाति ॥ महान्तमित्याद्युक्तार्थं ॥ एतेन स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यतीति श्रुतिरवस्थात्रयोपलक्षणार्था

व्याख्याता ॥३४॥ अथ तस्याः श्रुतेस्तात्पर्यमाह ॥ जाग्रदादीति ॥ जाग्रदादित्रयं यस्तु विजानाति चिदात्मना ।
ततो भेदेन नैवास्ति पुरत्रयमिदं पुंसदा ॥३५॥ चिदात्मना भास्यं जाग्रजादादि स्थानत्रयमितरद्रूपं नैव किंद्रूपेत
स्मिन्नवस्तत्वा ततो भेदेन नैव विद्यते ॥३५॥ चैतन्यमात्रो भगवान् शिव एव स्वयं प्रभुः ॥ पुरत्रयात्मना भाति न भे
दतो महाप्रभुः ॥३६॥ पुरत्रयाधिष्ठानं यच्चैतन्यमात्रं सर्वस्वयं प्रकाशमानः परशिवः परिच्छेदमतीतो सोपाधिकत्वा
किंतु निरस्तसमस्तोपाधिकः स्वयमेव प्रकाशते ॥३६॥ यदाम्नायते । यदेवेह तदमुत्र यदमुत्र तदिन्विह इति तदाम्नायमा
ह ॥ इहामुत्रेति । इहामुत्र स्थितं तत्त्वं सदेकं न ततोपरं ॥ मृत्योः स मृत्युमाप्नोति यो नानेव पश्यति ॥३७॥ इहास्मिन्
कार्यकारणसंघाते यदेव स्थितं सच्चिदानंदैकरसं तत्त्वं यच्चामुत्र जगत्कारणे सर्वज्ञे सूर्यात्मके ब्रह्मणि अवस्थितं तदुभ
यं सर्वदैकं न तयोर्भेदो विद्यते ॥ किंचिज्ज्ञत्व सर्वज्ञत्वादि भेदप्रतिभासस्य मायाविद्योपाधिकत्वादित्यर्थः ॥ अतएवो
त्तरेयवके त्तरीकयोः समाम्नातं स यश्चायं पुरुषे यश्चासावादित्ये स एक इति ॥ सोहमिति ॥ विपक्षे बा
धकमाह ॥ मृत्योरिति ॥ यस्त्वात्मनः सकाशाद्व्यतिरिक्तं वर्तमानं परशिवमन्यं पश्यति स मृत्योर्मरणात्पुनर्मृत्युं प्राप्नो
ति ॥ जन्ममरणप्रवाहपतितो भवतीत्यर्थः ॥ ननु परस्मात्कारणात् सर्वस्य जगतो भेदोनुभूयत एवेत्याशंक्याहृष्टांतेन
तादात्म्यं प्रतिपादयति ॥ अग्निर्यथेत्यादिना । अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ॥ दाह्यसमानाका
=एकस्तथा सर्वभूतांतरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥३८॥ यथा (सो) स्वल्वयमग्निः स्वयमेक एव सन् यस्मिन्भूतजाते नीतिभुवनमयं लोकं सं
प्रविष्टः सन् रूपं रूपं काष्ठादिकं सर्वं दाह्यभेदं प्राप्य तत्प्रतिरूपो बभूव ॥ १

तिर्भवतीत्यर्थः ॥ तथैक एव सच्चिदानंदैकरूपः परशिवः सर्वभूतात्मा सर्वेषां भूतानामंतरात्मा भूत्वा तत्तद्देवमनुष्या
दिशरीरं प्रविश्य तत्तत्प्रतिरूपो बभुव। तथा प्रपंचाद्बहिरपि स्वेन निरूपाधिकेनाविकृतरूपेणावतिष्ठते ॥ ३८ ॥ वायु
र्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव। एकस्तथा सर्वभूतांतरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥ ३९ ॥ वायुर्यथैक इत्य
त्राप्येवं पूर्ववद्योज्यं ॥ ३९ ॥ एवमेकस्यैवात्मनस्तत्र तत्र प्रतिरूपावस्थानेन तत्कृतसंसारदुःखानुभावेऽपि स्यादिति
शंक्य सदृष्टांतं निर्लेपतामाह ॥ सूर्यो यथेति। सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः ॥ एकस्त
था सर्वभूतांतरात्मा न लिप्यते लोकदुःखेन बाह्यः ॥ ४० ॥ यथा सूर्यः। सर्वलोकस्य चक्षुरालोकेन चक्षुरिंद्रियस्योपकारं
कुर्वन् चक्षुर्भूतो मूत्रपुरीषादिदर्शनजनितैश्चाक्षुषैराध्यात्मिकैर्बाह्यैः पापदोषैश्च न लिप्यते न स्पृश्यते। तथाए
व शिवः सर्वभूतांतरात्मा सन्नपि बाह्यतस्मात्सर्वस्माद्भूतजातात् द्विविक्तः सन् तदीयदुःखेन न लिप्यते ॥ अविद्या
याध्यात्मनः संसारप्रतीतिर्न च सा परमार्थोपायो विद्यत इत्यसतासंसारदुःखेन कथं परमार्थभूतस्यात्मनो लेपसं
भव इत्यर्थः ॥ ४० ॥ एको वशीति ॥ एको वशी सर्वभूतांतरात्मा एकं रूपं बहुधा यः करोति ॥ तमात्मस्थं येऽनुपश्यंति धीरा
स्तेषां सुखं शाश्वतं नेतरेषां ॥ ४१ ॥ एकः सर्वमुख्यः न चानेन सदृशोऽधिको वा कश्चिदस्ति। वशी स्वतंत्रः यतः सर्वज
गदस्य वशे वर्त्तते ॥ तदपि कुत इत्यत आह ॥ सर्वेति। सर्वांतरात्मत्वमपि कुत इति तदाह ॥ एकमिति ॥ एकमेकरसं वि
शुद्धविज्ञानैकलक्षणमात्मीयं रूपं बहुधा बहुप्रकारं विचित्रोपाधिभेदवशेनायः करोति। तमात्मस्थं आत्मनि स्थि

सर्व ४

१२

नि२

७१

रीरहार्दाकाशमध्येऽस्थितमभिव्यक्तं गुरुशास्त्रोपदेशेन येऽनुपश्यंति साक्षादनुभवंति धीरा विवेकिनस्तेषां वि
दुषांञ्च हरिभक्तानामेव सुखं शाश्वतं नित्यरतिशयाभिव्यक्तिर्भवति। इतरेषामज्ञानिनां तु यच्छस्पर्शादिविषयसंभो
ग सुखं तच्छाश्वतं न भवति शुभकर्मोपस्थापितत्वद्धि व्ययानुविधायित्वेन तस्य क्षणिकत्वादित्यर्थः ॥४१॥ नित्योऽनि
त्यानां चेतनश्चेतनानामिति श्रुतेरर्थमाहायेनैवेति ॥ येनैव नित्याश्च सचेतनाश्च यस्मिन्विसक्ताः प्रविभांति मो
हात्। तमात्मस्थं येऽनुपश्यंति धीरास्तेषां शांतिः शाश्वती नेतरेषां ॥४२॥ व्यावहारिका नित्या आकाशादयो ये
न यत्सत्तानुवेधबलेन नित्याः। तथा यच्चैतन्यानुवेधबलेन देवमनुष्यादयः सचेतनाः तेच यस्मिन्नुक्तप्रकारेण
श्च सणप ध्यस्ततया विसक्ताः संतो मोहादज्ञानवशाद्विभांति विचित्रनामरूपात्मना विविधं भासंते तमात्मस्थ
मित्यादि पूर्ववत् शांतिः सर्वविषयेभ्य उपरतिः ॥४२॥ तदेतदिति ॥ तदेतदिति मन्यंते निर्देश्यं परमं सुखं ॥
कथं नु तद्विजानीयां किमु भाति न भाति वा ॥४३॥ यदात्मस्वरूपभूतं सुखमनिर्देश्यं निर्देष्टुमशक्यमवाङ्मन
सगोचरं परमं निरतिशयं तदेतदित्यापरोक्ष्येण ब्रह्मनिष्ठा मन्यन्तेऽनुभवंति तदात्मसुखं इदानीं तनोऽपि क
थं नु केन खलु प्रकारेण विस्पष्टं जानीयां तत् किं भाति दीप्यते भासमानं हि तदस्य विस्पष्टं भाति किं वा न भाती
ति बहिरिव को ध्यान्तरे ॥४३॥ भाति विभाति च तस्य चक्षुरादि विवक्षितं न तत्र सूर्यो भातीति श्रुतेरर्थमाह। आदित्येति।

च

७१

= ऊर्ध्वमूल इति। ऊर्ध्वमूलस्त्ववाक्शाख एषोऽश्वत्थः सनातनः। तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ॥५

आदित्यचंद्रतारकादयो न भांति यस्मिन् ... भान्ति न हि तं हन्ति। प्रकाशमानं तमनु प्रकाशंतीति प्रकाशमानमस्यैव हि तेन
रेषी॥४४॥ तमनुप्रकाशंतीति चैतन्यज्योतिषि तस्मिन्नवस्थितत्वात्स्फुरणमनुस्तत्स्यैव प्रकाशंतीति सूर्योदयः प्रदी
प्यंते आह॥ स्वाभाविकं भानमात्मज्योतिष एव नान्येषां भौतिकानां तेजसां। अतः स्वप्रकाशचिदेकरसे तत्स्व
रूपभूते निरतिशयसुखं स्वयमेव भाति च विभाति चेत्यर्थः ॥४४॥ दृश्यमानस्य कार्यप्रपंचस्य मूलकारणमंतरेणा
नुपपत्तेस्तदस्तित्वं प्रतिपादयति ॥४५॥ ऊर्ध्वं संसारमंडलस्योपर्यवस्थितं ... आः परमं पदमिति प्रागुपन्यस्तं
निरस्तसमस्तोपाधिकं ब्रह्म मूलं कारणं यस्य स तथोक्तः अव्यक्तादिस्थावरांतः संसारवृक्षः स च स्वर्गनरक
तिर्यक्प्रेतादिभिः शाखाभिरर्वाचीनशाखः स च सनातनः अनादिरस्थिरत्वात् वृक्षः न तिष्ठतीत्यश्वत्थः ॥ अस्य
च संसारवृक्षस्य यन्मूलं कारणं तदेव शुक्रं शुद्धं सांसारिकदोषासंस्पृष्टं तदेव ब्रह्मामृतमविनाशिस्वभावं कथ्यते ॥
कार्यभूतस्तु संसारवृक्षो वाचारंभणमात्रत्वात् गंधर्वनगरादिवन्मिथ्याभूत इत्यर्थः ॥४५॥ तस्मिन्नित्यादि।
तस्मिन् लोकाः श्रिताः सर्वे तदु नात्येति कश्चन। एतद्वै तत्। स एव श्रेष्ठः सम्यगेव मयोदितं ॥४६॥ तस्मिन् पर
मार्थभूते सत्ये ब्रह्मणि मायाविलासवशेन सर्वे लोकाः श्रिता आश्रिताः परमार्थवस्त्वप्रतीयत इत्यर्थः ॥ अ
तः समस्तजगदुत्पत्तिस्थितिलयकारणं तद्ब्रह्म ... कश्चिदपि विकारो नात्येति॥ नातिवर्तते॥ एतद्वै खलु तद्ब्रह्म ... ज्ञाना
दमृतत्वप्राप्तिर्वर्ण्यते ॥४६॥ यदिदं किंचेति ... इदं सर्वं जगत् ... कंपते ... महद्भयं
वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति ॥४७॥ इदं परब्रह्मभूतं सर्वजगत्कारणभूतः परमात्मा ... कंपते। न स्वशासनभयात्स्वव्यापारेषु

७८

प्रवर्तमानं जगत्प्रेरयतीत्यर्थः ॥ भयमुद्यतमुद्यतं वज्रमिव महाभयहेतुभूतं कूटस्थं नित्यं तमात्मानं ये विदुस्ते संसारबंधा
न्मुच्यंत इत्यर्थः ॥४७॥ उक्तमेव भयहेतुत्वं विवृणोति ॥ तपतीति ॥ तपत्यस्य भयादग्निर्भयात्तपति भास्करः ॥ भयादिंद्रश्च वा
युश्च मृत्युर्धावति पंचमः ॥४८॥ अग्न्यादिलोकपालोपि तद्भयात्स्वस्वव्यापारे प्रवर्तते ॥ किमुक्तं यमसंयमभयहेतु
रिति भावः ॥४८॥ इह चेदशकद्बोद्धुं प्राक्शरीरस्य विस्रसः ॥ वर्तमान इति ॥ वर्तमाने शरीरेस्मिन्न शक्तो बोद्धुमीश्वरं ॥ नरः सर्वे
षु लोकेषु शरीरत्वाय कल्प्यते ॥४९॥ विद्याधिकारयोग्येस्मिन्नु शरीरे विद्यमाने सत्यप्रमत्तेनोऽयं वेत्ति न परं ब्रह्म स्वरूप
बुद्ध्यो बोद्धुं न शक्तः स सर्वेषु लोकेषु पुण्यपापवशेन शरीरधारणाय कल्प्यत इत्यर्थः ॥४९॥ यथादर्शे द्रुतनिर्मले गृह्णातीति ॥ य
थेति ॥ यथादर्शे स्वकरूपं यथावन्निर्मलेतरः ॥ तथा पश्यति देहेस्मिन्नात्मानं ब्रह्म केवलं ॥५०॥ यथा निर्मले आदर्शे स्वकी
यरूपं सम्यक्पश्यति ॥ तथास्मिन्मनुष्यशरीरे श्रवणमनननिदिध्यासनादिसाधनकलापानुष्ठानेनात्मानं ब्रह्मरूपत्वेन साक्षात्क
र्तुं शक्नोति ॥ अन्यत्र तु साधनानुष्ठानासंभवात् तज्ज्ञानं न सुलभमिति भावः ॥५०॥ इंद्रियाणां पृथग्भावमतियदाप्नोति तत
त्तिप्रायमहा ॥ जन्मनाश्नोति ॥ जन्मनाशवतां खानां पृथग्भावं परात्मनः ॥ तेषां जन्मविनाशौ च विदित्वा नात्मरूपतः ॥५१॥
पश्चादनात्मरूपेणाविदितं केवलात्मना ॥ विदित्वा स्वानुभूत्यैव सधीरः सकृन्न शोचति ॥५२॥ विदित्वानात्मरूपत इत्यादिनाआ
त्मसकोशादीन्विहायेंद्रियादिकं पृथङ्मनात्मरूपेणाविदित्वा तथावस्थितं तत्साक्षात्केवलात्मभावेन विदित्वा बोधघ
नभूते स्वात्मनि तत्सर्वं विलाप्येत्यर्थः ॥५१॥५२॥ एवं मन आदिकमपि स्वस्वकारणभावापत्त्या विलाप्य सर्वाधिष्ठानभू
तमुदीरितरूपं पुरुषस्वरूपमेवमुमुक्षुणा ज्ञातव्यमिति प्रतिपादयति ॥ इंद्रियेभ्य इत्यादिना ॥ इंद्रियेभ्यो मनः श्रेष्ठं
मनसः सत्वमुत्तमं ॥ सत्वादपि महानात्मा महतोव्यक्तमुत्तमं ॥५३॥ अव्यक्तात्तु परः साक्षाद्व्यापकोलिंग एव च ॥ यं
विदित्वा नरः साक्षादमृतत्वं हि गच्छति ॥५४॥ चक्षुरादींद्रियेभ्यः सकाशान्मनः श्रेष्ठं तदंतरणतेषां कार्यका

णत्वात्तस्मात्स्वं मननस्तत्कारणभूतं सूक्ष्मं श्रेष्ठं तस्य तदपि महानात्मा हैरण्यगर्भबुद्धिः परास्तात् ततोऽपि प्रत्यासत्तमव्यक्तं त
त्कारणत्वेनातिसूक्ष्मत्वात् तस्मादपि सर्वान्तरः पुरुषः पूर्णः अनेन सर्वमिदं आत्मा अव्यक्तादिस्थावरान्तस्य सर्वस्य कारणत्वात्
क्षाद्यापव्यः सचालिङ्गः लिङ्ग्यते गम्यते येन तल्लि
ङ्गं बुद्ध्यादि तन्न विद्यते यस्य स तथोक्तः॥ सर्वस्य सांसारिकपुण्यपापलेपस्यालिङ्गशरीराश्रितत्वात्तन्निषेधेनात्मनः सं
सारस्पर्शो निर्णीतो भवति॥ ५३॥ न च सौ निरूपयितुं आत्मा वस्तु वेदितुं शक्यः इत्यत्राह॥ न संदृशे इति॥ न संदृशे
तिरूपमस्य न चक्षुषा पश्यति कश्चिदेनं॥ हृदा मनीषा मनसाभिक्लृप्तः साक्षात्कारात्मना वेदितुं सः॥ ५४॥ संदृशे संदर्शनविषये प्रत्यगात्मनो रूपं न तिष्ठति॥ अतो न चक्षुषा उपलक्षणमेतत्॥ चक्षुरादिसर्वेन्द्रियेण कश्चिदप्येनमात्मानं न प
श्यति॥ कथं तर्हि सिद्धिरित्युच्यते॥ हृदा हृत्स्थया मनीषया मननसंकल्पादिरहितया [illegible] मनीषया विषयाब्धौ
निमग्नस्य मनसा मनोरूपेण सम्यग्दर्शनेन चाभिक्लृप्तः प्रकाशितो यः आत्मा साक्षात्प्रत्यगात्मत्वेन वेदितुं शक्यते॥ ५५॥
आत्मनोऽपि अस्य [illegible] स्थिता सर्वस्वरूपतां विस्तरात्मन्ययं प्रत्यर्थतः संगच्छति॥ एवमिति॥ एवं सा साक्षात्सच्चिदानन्दरूपं भावा
नु पर तत्त्वं ब्रह्म तावत् पनिषद्दर्शितं॥ अथ भवता [illegible] विद्यायोगादेव मुक्तो भावे ति॥ ५६॥ एवं सच्चिदानन्दरूपं स ब्रह्मा
ध्यायन्नेषणात्र हि यज्ञाग्नकारणं तद्दृष्टे तावद्गमयितुं कालः स्वभावो नियतिर्यदृच्छेत्यादिना कालादीनां जगत्कारणत्वं
निराकृत्य सर्वपक्षीकृतस्य ध्यानयोगानुमतात्मशक्तिः स्वगुणैर्निगूढामिति मायाशक्तिसहितस्य द्योतमानस्य प्रज्ञा
शक्तिसत्तरस्य ब्रह्मणो जगत्कारणत्वं वर्णितं तादृक् शक्तिः स्वगुणैर्निगूढाभिमतमायाशक्तिसंयोगस्य प्रतिपादयति॥
विद्यावर्णमिति॥ विद्यावर्णं ब्रह्मसंबन्धो सिद्धं तस्याचिन्त्यशक्तिरूपं ब्रह्मसत्वाच्छक्तिः॥ तत्सत्याभिध्यानं तदेव तदृशं सत्यानन्दात्मस्वं
रूपं॥ ५७॥ याविद्यामागत्र ज्ञानेन यावत् घेयं स्वरूपं नेदं नेदं तत्प्रभासम्बन्धं ब्रह्मसत्तस्य अचिन्त्यादिदिव्यादीतिचिन्तयितुम
शक्या सर्वदुर्घटकारिणी तोयचिच्छक्तिरस्त्येव नहि तस्या नानात्वं तत्ते जो स्वजनत्वादिकमप्रमाणकारणत्वा उपपत्तेरस्य

=ष्यति साह। रत्नेयेति। यत्सत्यादिलक्षणमद्वितीयं ब्रह्म तत्र ब्रह्मणि सत्त्वरजस्तमोगुणात्मिकया मायया

भोक्ता भोग्यं भोगप्रदश्चेति त्रैविध्यं प्रतिपिपादितं। तच्चाद्वितीये ब्रह्मणि कथं घटत इत्याशंक्य साक्षात्स्वरूपेण तदुपाधिना ऽत्रावच्छिन्ने भेदयु

नवति। ५७। तत्र मलिनसत्त्वप्रधानमायावच्छिन्नं यद्ब्रह्मणो रूपं जीवसंज्ञां लभते तेन मनः प्रधानमायावच्छिन्नं तु भोग्यं जगद्भवति। विशुद्धसत्त्वप्रधा

नमायोपाधिकं स्वन्यद्रूपमीश्वराख्यं सद्भोगप्रदं भवति। एकं रूपं ब्रह्मणो जीवरूपं भोग्यं विश्वं ब्रह्मणस्त्वन्यद्रूपं। अन्यद्रूपं ब्रह्मणः सर्वत्रास्त्र प्र

सामान्यरूपं परस्य। किं तदन्यद्रूपमिति। परस्य मायातीतस्य ब्रह्मणः कृत्स्नवेदान्तप्रतिपाद्यं केवलं चिदेकरसं यच्छुद्धरूपं तत्तु सोपाधिकरूपा

नयाद्दन्यद्विलक्षणमित्यर्थः। ५८। वक्ष्यतीति। हि। भोक्ता भोग्यमिति श्रुतौ सर्वाजीव इति मन्त्रेण जीवस्याविद्यया संसारचक्रे भ्रमणं विद्यया ब्रह्मता

प्त्यं च यदाम्नातं तदाह। सर्वाजीव इति। सर्वाजीवे सर्वसंस्थे बृहन्ते तस्मिन्जीवो भ्राम्यते ब्रह्मचक्रे। अन्यात्मानं प्रेरितारं च मुक्त्या मत्वा चेकं याति म

त्योर्मितत्वं। ५९। आसमन्ताज्जीवनमाजीवः सर्वेषामाजीवो यस्मिन्तत्सर्वाजीवं तस्मिन्सर्वसंस्थे सर्वेषां संस्थामरणं स्थितिर्वा यस्मिन्तत्सर्वसं

स्थं तस्मिन्बृहन्ते विस्तृते तस्मिन्ब्रह्मचक्रे ब्रह्मणा निर्मिते संसारचक्रे स्वाविद्यया संसरन्जीवो भोगप्रदेनेश्वरेण भ्राम्यते। स च जीवः

स्वार्जितसुकृतवशात्परमेश्वरानुग्रहेण चानुष्ठितैः श्रवणमननादिसाधनकलापैः सन्ततेन गुरूपदिष्टशास्त्रश्रवणेन प्रत्यगात्मानमीश्वरं तु

चैकत्वेन ज्ञातं मुक्त्या मत्वा साक्षात्कृत्य अमृतत्वं मोक्षं प्राप्नोतीत्यर्थः। ५९। अस्य जीवेश्वरैक्यस्य विस्पष्टप्रतिपादकमन्यं मन्त्रमुपस्कृत्य व्या

ष्टे। ज्ञाज्ञाविति। ज्ञाज्ञौ जीवाजीवसंज्ञौ प्रतीत्याश्रयायुक्त्या स्वानुभूत्या चाभिन्नौ। माया भोक्तृभोगहेतुः परात्मा रूपैरेभिर्विश्वरूपो ह्यकर्ता

। ६०। ज्ञः अपरिच्छिन्नचैतन्यैकस्वभावस्तत्सदार्थः परशिवः। अज्ञः कर्ता भोक्ता आहतज्ञानस्तं पदार्थस्ता चेतौ जीवाजीवसंज्ञौ प्रतीत्याद्य

नौ परमार्थात्। तस्मात्तत्त्वमसि अहं ब्रह्मास्मीत्यादिश्रुतेः सा तदनुसारेण युक्त्या तदनुभवेन च तावभिन्नौ। उपाधिकृत एव तयोर्भेदो न वा

स्तव इत्यर्थः। तयोर्भेदकमुपाधिं दर्शयति। मायेति। भोक्तुः संसारिणो मनो भोगहेतुर्माया मलिनसत्त्वप्रधानमायावशीकृतो हि प्रत्यगात्मा कर्ता

भोक्ता भवति। परमात्मा तु स्वाधीनमायत्वादेभिर्दृश्यमानैः परिकल्पितैः सर्वैरपि रूपैर्विश्वरूपो नानाविधरूपः सन्नप्यकर्ता कर्तृत्वादि

संसारधर्मरहितः अतस्तदुपाधिपरित्यागेन तयोरैक्यं स्वप्यवस्थायां नामिति भावः। ६०। क्षरं प्रधान

५९

सा

197

सरं हर इति मंत्रस्यार्थमाह ॥ क्षरं मायेति क्षरं मायाया अक्षरं जीवरूपं क्षरात्मनावभिधत्ते देव एकः अक्षरं क्षरणशीलं न श्वरं अविद्यामि
त्यर्थः माया तत्त्वं अक्षरमनश्वरं जीवत्वात्वाप नं ब्रह्मणो रूपं तदुभयात्मना एकः एव स्वयं परमेश्वरः शिवः ईशते नियन्तो भासते मा पा
त्का तर्थ से दस्य तस्मिन्नभ्यवहार्यत्वेन तदस्य निरेकादित्यर्थः ॥ आत्मज्ञानात्सद्योमुक्तेरदर्शनात्तस्य तत्साधनत्वं प्रत्यक्षविरुद्धमित्याशङ्क्य मुमु
तस्येति। सनाय तस्याभिध्यानादिति श्रुतिमुदाहरति ॥ तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिः ॥ ९ ॥ तस्य निरन्तरम
ध्यानेतद्युक्तिदानं दैकरसस्य ब्रह्मणो ध्यानात् सर्वं स्वात्मीयं ब्रह्मेति तोटस्यैव ज्ञानो च्छ्रवणजनितात्मस्य ब्रह्मैक्यस्य विषयाश्रयो ध्याना
नाद्यास्ते दगपंचस्य निद्रितित्स्वेति ॥ तदेवाहं ब्रह्मास्मीत्यात्मयोजनादेकीकरणाद्योनिकामः स्त्रात्मनाद्भूतो च स्वात्र स्वरूपाभो माया
त्व निवर्तितेपुनस्तत्त्वभावात्तद्रूपभावनान्निदिध्यासनपर्यायात् द्वितीयमपरोक्षज्ञानं जायते तेन च माया निवृत्तासति वार्यते न स्या
निवारितायामपि तज्जनिता वासनारब्धकर्मफलक्षयपर्यन्तमनुवर्तते अतो विदुषोपि नासर्यतोपि देहयात्राद्यर्थो व्यवहा
रो न विरुद्धः ॥ भूयः पुनश्चान्ते आरब्धकर्मफलोपभोगावसाने विदेहकैवल्यावसरे स्ववासनया सह सकलमायानिवृत्तिर्भवती
त्यर्थः ॥ ९ ॥ उक्तध्यानादेः फलप्रतिपादिकां श्रुतिं संगृह्णाति ॥ ज्ञात्वेति ॥ ज्ञात्वा देवं सर्वपापापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्र
हाणिः ॥ तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं याति केवलस्वरूपं ॥ ९ ॥ देवं द्योतमानं स्वयंप्रकाशमानं परमात्मानमुदीर
णात्सर्वात्मत्वेन ज्ञात्वा सर्वपाशापहानिः मूलमायाकर्मादयः पाशास्तेषां सर्वेषामविद्यास्मितादीनां क्लेशानां च प
रिक्षयं प्राप्नोतीत्यर्थः ॥ तस्याभिध्यानात्तृतीयं देहभेदे इति श्रुतिं व्याचष्टे तस्येति ॥ अद्वितीयब्रह्मात्मसाक्षात्कारेणम
त्वा ज्ञाननिष्ठो सत्यां केवल्यपरूपं केवलात्माभावस्थानलक्षणं सर्वैश्वर्यमनपेक्षकं परमेश्वरं प्राप्नोति ॥ आप्तकामस्तन्माया
भि

१२ = प्रणवं चोत्तरारणिं । ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवत् ॥ ६५ ॥

प -- २२

शक्तिवशाद्भोक्तृभोग्यादिभावेन भिन्नरूपं परित्यज्य यत्तत् दृक्वास्तवमभिन्नं कैवल्यरूपं ॥६२॥ एतज्ज्ञेयं नित्यमेवात्मसंस्थं नातः
परं वेदितव्यं हि किंचित् ॥ भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् ॥६३॥ एतदेव नित्यं सर्वदा आत्मसंस्थं प्रत्य
गात्मस्वभावेन स्थितं तज्ज्ञेयं साक्षात्कर्तव्यं ॥ नन्वितोऽन्यदपि किंचिद्वेदितव्यं स्यादित्यत आह ॥ नात इति । अतोऽस्मान्निरतिशयानंद
लक्षणाद्ब्रह्मात्मनोऽन्यद्वेदितव्यं किमपि तत्त्वं नास्ति अतोऽन्यदार्तमिति श्रुतेः । यत्तावद्भोक्तृभोग्यादिभेदेन त्रिविधं जगत्प्रतिभा
ति तदपि निरूप्यमाणे मायातीतब्रह्मलक्षणाधिष्ठानमात्रान्न व्यतिरिच्यत इत्यस्यार्थस्य प्रतिपादकं मंत्रमुदाहृत्य व्याचष्टे । भोक्तेति ॥
ब्रह्ममेतदिति अनुभाव्यं द्रष्टः ॥६३॥ तथाविधस्य ब्रह्मणो ज्ञानोपायं बोधयितुं यदाम्नाति वह्नेर्यथेति तत्संगृह्णाति ॥ वह्ने
॥२००॥ रिति ॥ वह्नेर्यथा योनिगतस्य मूर्तिर्न दृश्यते नैव च लिंगनाशः ॥ स भूय एवेंधनयोनिगृह्यस्तद्वोभयं वै प्रणवेन देहे ॥६४॥ ल २ ॥१०७
योनिगतस्य योनिः कारणमरणिस्तद्गतस्याग्नेर्मूर्तिः स्वरूपं न दृश्यते चक्षुषा चक्षुरिंद्रियेणाग्निर्नोपलभ्यते अथापि नैव लिं
गनाशः मथनाभावे सति यदग्नेस्सद्भावगमकं लिंगमौष्ण्यं तस्य च नाशोऽपि न भवति तो सोऽग्निः पुनर्मथनोपायेनेंधनयोनिः इंधनादरणि
रूपात्काष्ठाज्जायमानः सन्निंद्रियग्राह्यो भवति ॥ यथायं दृष्टांतस्तथा ब्रह्मापि कार्यकारणसंघाते प्रविष्टं साक्षाद्वेदेनानुपलभ्यमान
मपि उपायविशेषेण गृहीतुं शक्यते तमुपायं दर्शयति ॥ तद्वेति ॥ वाशब्दश्चार्थे तच्च ब्रह्मोभयविधं परं चापरं च देहे शरीरे हृदंबु
जमध्ये ध्येयत्वेन ज्ञेयत्वेन चावस्थितं प्रणवेन ॐकारेण गृह्यत इत्यर्थः ॥६४॥ कथं प्रणवस्य तद्ग्रहणोपायत्वमिति । तदाह । स्वदे
हमिति । स्वदेहमरणिं कृत्वा ॐकारं चोत्तरारणिं ॥ ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवत् ॥६५॥ स्वदेहोपलक्षितहृदयमध्य ११२
रारणिं कृत्वा ॐकारं चोत्तरारणिं कृत्वा ध्याननिर्मथनाभ्यासात् ध्यानं प्रणवाभिधेयत्वेन तदालंबनत्वेन वा परस्यापरस्य वा ब्रह्मणश्चिंतनं
तदेव निर्मथनं तस्याभ्यासाद्यावत्साक्षात्कारमनुवृत्तिस्तस्मादुपायाद्देवं द्योतमानं स्वप्रकाशानंदैकमात्मस्वरूपं पश्येत् साक्षात्कुर्यात् ।

= अनुपश्यति। तेन सत्यादिसाधनवता पुरुषेणात्मा गृह्यत इति संबंधः। अत एवार्थो वर्णितः पश्चि ५ श्लोकेन ४ ष घाम्नातं। सत्येन = ८

ति निगूढं तत्। यथा काष्ठे निगूढं विलीनमग्निं मथनोत्तराणिभ्यां निर्मथनावर्तनेनोपलभते तद्वदित्यर्थः॥ ६५॥ विहितमात्मदर्शनमनेके
दृष्टांतैरुपपादयन्सत्यादिसाधनमुपदिशति॥ तिलेष्विति॥ तिलेषु तैलं दधिनीव सर्पिरापः स्रोतस्स्वरणीषु चाग्निः॥ एवमात्मात्मनि गृह्य
तेसौ सत्येनैनं तपसा योनुवेत्ति॥ ६६॥ यथा तिलेषु तैलं व्याप्य वर्तते यथा वा दध्नि सर्पिः राज्यां स्रोतःसु सिकतान्वितास्सु नदीषु आपो ऽभ्यंतरे व्या
प्य वर्तते अरणीषु काष्ठेष्वग्निः यथैते तैलादयस्तिलादिषु विवेकतो अनुपलभ्यमाना अपि पीडनोत्खननमथनैर्विविच्य विवेकेनोपलभ्यंते एवं स्व
यमात्मनि रूपाधिकः सच्चिदानंदैकरस आत्मनि हृदये गृह्यते। श्रवणमननादिसंस्कृतेन मनसा साक्षात्क्रियते। योसावेवंविध आत्मानं स
त्येन वचनेन तपसा कृच्छ्रचांद्रायणादिलक्षणेन वर्णाश्रमविहितेन स्वधर्मेण यः साधकोनुवेत्ति लभ्यस्तपसा ह्येष आत्मेति॥ ६६॥ तिला
षु तैलादिवद्व्याप्य वर्तमानो यः सर्वव्यापक आत्मा नासावुपचरितः किंतु साक्षाद्ब्रह्मैवेति प्रतिपादयति॥ सर्वव्यापिनमिति॥ सर्वव्यापिनमात्मा
नं क्षीरे सर्पिरिवार्पितं॥ आत्मविद्यातपोमूलं तद्ब्रह्मोपनिषत्परं॥ ६७॥ क्षीरे कारणात्मनावस्थितं घृतं यथा तद्व्याप्नोति एवं कारणात्मना कार्यं
जगत्कृत्स्नं व्याप्नोतीति सर्वव्यापी॥ तस्य ब्रह्मरूपत्वसंदर्शने साक्षात्साधनमाह॥ आत्मेति॥ आत्मसच्चिदानंदैकरसस्य श्रवणमननादि
साधनजन्या साक्षात्काररूपा या विद्या यच्च तपो वर्णाश्रमविहितं यज्ञदानादिकर्म तदुभयं मूलं उपलब्धिकारणं यस्य स तथोक्तः॥ एवंभूतं य
आत्मानं विद्वान्पश्यति तदेव परं ब्रह्म तद्ब्रह्मनिष्ठं॥ उपनिषदिति॥ उपनिषत्सूर्वा सदेरयं त्राव्युत्तस्य च विशरणगत्यवसादनलक्षणात्स्यो
र्थः अद्वितीयं ब्रह्म सर्वप्राणिगुहाशयात्मस्वरुपेण निरुपाधिकरूपेण प्रकाशमानं सन्निततरां तदीयसंसारं विस्तृणोतीति नस्ति सूपनिषत्॥ यद्वा जी
वभावेनावस्थितं साक्षिचैतन्यं नितरां स्वात्मानमुपगमयत्यैक्यं प्रापयतीति॥ तदविद्यामवसादयति शिथिलीकरोतीति वा उपनिषत् परं ब्रह्म।

८३ मेघ ४

पञ्चात्मोपनिषत्सदमिति श्रुतौ पठनादत्रापि तथैव पठनीयम्। तथा च उपनिषत्त्वेन ब्रह्मविद्योच्यते तया पटनीयं प्राप्तव्यमित्यर्थः॥ ६७॥ एवं
मादितायस्य ब्रह्मणः स्वरूपं शिवशर्मा सोमाद्युदन्ता सेणावस्थानं तदि विनस्याः परिच्छिन्नं चिदानंदैकरसस्य निरूपाधिकं स्वरूपं स्वज्ञानोत्तो
दाश्चैतिहत्यं शास्त्रार्थस्य संग्रहेण प्रतिपादितस्तत्र कर्मज्ञाने ताश्चतरोपनिषदि प्रथमाध्यायव्याख्यायां युञ्जानः प्रथमं मनइत्याद्यध्या
यपंचकस्य तद्विवर्णरूपत्यागतात्पर्या तासंग्रह्य व्याचष्टे॥ पशुदाने ति॥ यज्ञदानादिभिः पुण्यैर्योगसिद्धिर्भविष्यति॥ योगात्संजायते ज्ञानं
ज्ञानान्मुक्तिर्नकर्मणा॥ ६८॥ युंजानः प्रथमं मनइत्यादिषु मंत्रेषु अग्न्याहरणाद्युपलक्षितस्याग्निहोत्रादिनित्यनैमित्तिकादिकर्मजात
स्य योगहेतुत्वश्रवणात्परमेश्वरार्पणबुद्ध्यानुष्ठितेन नित्यनैमित्तिककर्मणा त्रिरुन्नतं स्थाप्य समं शरीरमित्यादि श्रुत्युक्तरूपस्य योगस्य
सिद्धिः स्यादिति॥ युक्तमनस्कस्य श्रवणमननाद्यनुष्ठानाद् नायासेन ब्रह्मात्मैकत्वज्ञानं जायते तेन च मुक्तिरित्यध्यायपंचकस्य तात्पर्यार्थः॥ ६९॥
ब्रह्मविद्यासंप्रदायगोपनार्थं अत्याश्रमिभ्यः परमं पवित्रमित्यादिना श्रुतौ यदधिकारलक्षणमाम्नातं तदाह॥ अत्याश्रमिस्येति॥
ति॥ अत्याश्रमिभ्यः शांतेभ्यो वक्तव्यं ब्रह्मवेदनं॥ अनाश्रमाणां तावद्दातव्यं नापुत्रायकदाचन॥ ६०॥ कः पुनरस्य वाऽत्याश्रमः यद्यो
गादधिकारीति तत्राह॥ अग्निरिति॥ अग्निरित्यादिभिर्मंत्रैर्भस्मनोद्धूलनं तथा॥ त्रिपुंड्रधारणं चापि वदंत्यत्याश्रमं बुधाः॥ ६१॥
जाबालश्रुतिगतैरग्निरिति भस्मेत्यादिमंत्रैर्भस्मोद्धूलनं त्रिपुंड्रधारणं च चशब्दोनुक्तसमुच्चयार्थः॥ तेन च शिवमंत्रजपतत्पू
जादिकं संगृह्यते एतद्धूलनादिकमत्याश्रमं कथयंत्यभिज्ञाः॥ ७०॥ शिवभक्तिकंचनुरूपं ज्ञानं पिविद्योत्पत्त्यावंतरंगसाधनमिति
श्रुतिमुदाहरति॥ यस्येति॥ यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ॥ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः॥ ७१॥ ७१॥ इति
प्रतिपादितमुपनिषदर्थं निगमयति॥ श्रुतिवचनेन मयैव श्रुतिवचनेन समस्तं परमरूपा बलतः पठंतिच॥ यदीवेदितं सनरः स्व
कर्मोहन्तरीतिशिवं विशति प्रियरूपं॥ ७२॥ ॥ इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञवैभवखंडे ब्रह्मगीतासूपनिषत्सु एकादशोऽध्यायः॥ ११॥
प्रियरूपमिति। निरतिशय ... आनंदरूपमित्यर्थः॥ ७२॥ इति मत्र्यंबकपदाब्जसेवापरायणेनोपनिन्मार्गप्रवर्त्तके

॥ १०१॥

॥ १०१॥

न्माधवाचार्येणविरचितायांसूतसंहितातात्पर्यदीपिकायांयज्ञवैभवखंडस्योपरिभागेब्रह्मगीतासूपनिषत्सुएकादशोऽध्यायः ॥११॥
एवमैतरेयकादिसर्वशाखागताउपनिषदो व्याख्याय प्रतिपत्तिसौकर्याय तास्वपरिनिश्चितमर्थं संग्रहेणाख्यातुं प्रतिजानी
ते ॥ वक्ष्य इति ॥ श्रीसूत उवाच ॥ वक्ष्ये सारतरं साक्षात्सर्ववेदार्थसंग्रहं ॥ श्रद्धया सहितो यूयं शृणुतातीव शोभनं ॥१॥ सर्वशा
खार्थेति सर्वासामुपनिषदां येऽर्थाः विस्तरेण प्रतिपादितास्तेषां संग्रहमित्यर्थः ॥१॥ स च सर्वोपनिषत्सु आम्नातोऽर्थः प्रत्यग्ब्र
ह्मतादात्म्यरूप इत्याह ॥ अस्तीति ॥ अस्ति नावदहंशब्दप्रत्ययालंबनं सुराः ॥ सर्वेषां नः परं ज्ञानं स एवात्मा न संशयः ॥२॥
सोऽयं स्वाविद्यया साक्षी शिवः सन्नपि वस्तुतः ॥ स्वाविद्याबलेमाविज्ञीय संसारीवावभासते ॥ स एवात्मेति ॥ कार्यकारणसंघा
तविविक्तचैतन्यस्याहंशब्दवाच्यतया आत्मत्वेन प्रतिभासमानैर्पिदेहेंद्रियादेर्द्रष्टा स्वस्वादृष्टादिवदनात्मत्वेन सर्वां
तरः साक्षी चिन्मात्ररूप एवाहंशब्दलक्ष्य आत्मा न देहादिरित्यर्थः ॥ स्वाविद्ययेति ॥ स्वस्य संसारित्वस्वरूपावरणाज्ञा
नेनेत्यर्थः ॥ शिवः सन्नपीति ॥ सर्वगतः शिव एव हि सर्वप्राणिषु तदुपाधिवशाज्जीवभावेन परिच्छिन्नो भासते ॥ अने
न जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति श्रुतेः ॥२॥ एवं संसारित्वस्य स्वस्वरूपाज्ञानमात्रकृतत्वात्तन्नाशो
ज्ञानादन्येनोपेक्षते तेन तज्ज्ञानमनेन क्रमेण सिध्यतीत्याह वेदोदितेनेति ॥ वेदोदितेन मार्गेण पारंपर्यक्रमेण तु ॥ मुमुक्षो
सं देहं प्राप्य पुनः शांत्यादिसाधनैः ॥४॥ पारंपर्यक्रमेणेति ॥ गुरुपरंपरायातक्रमेणेत्यर्थः ॥४॥ सहितः शिवभक्त्या च गु

२६

रोः पादं प्रपद्य च ॥ वेदांतानां महावाक्यश्रवणेन तथैव च ॥५॥ मननेन तथा देव ध्यानेन परमात्मनः ॥ प्रत्यग्ब्रह्मैकता ज्ञा
नं लब्ध्वा याति शिवं परं ॥६॥ प्रत्यगात्मानमहमहंशब्दोपलक्षितं ॥ शिवरूपेण संपश्यन्नेव याति स्वपूर्णतां ॥७॥ प्रत्यगा
त्मानमिति ॥ शांतिदांत्यादिभिः श्रवणमननादिभिश्च संपन्नज्ञानेन साक्षिचिन्मात्ररूपं सुखदुःखादिसकलद्वंद्वविनि
र्मुक्तं स्वमहंशब्दाभ्यां लक्षितमपरिच्छिन्नपरशिवरूपेण सम्यक् पश्यन् साक्षात्कुर्वन्नेतस्मन्मनुष्य एव स्वात्मनः परि
पूर्णतां प्राप्नोतीति ॥७॥ श्रुतिरपि शीनस्वमक्षाळमेव सार्वात्म्यप्राप्तिं विदुषो दर्शयति ॥ तद्वस्तुतया भातेऽहंशब्दार्थे मुनी
ताः ॥ अविद्याविलयं याति विद्यया परयैव तु ॥८॥ विद्यया परयाऽविद्यानिवृत्तौ प्रत्यक्केवलं ॥ शिष्यते खलु नाओवोभा

202

यापि

वोनाम्यस्त्येवच ॥ ८ ॥ नन्वेतस्य त्वीपवामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति शिष्यते रवलुना भावैरीति ॥ भावा भावा सकस्य
सकलस्याविद्यापरिकल्पितत्वात्तस्या अप्रतीतिमाच शरीरत्वेन सदसद्विलक्षणत्वादिद्ययातन्निवृत्तौ केवलं ब्रह्मैवावशि
ष्यते ॥ ननु भावाभावकमसाल्पकं वाधिकं किमु शिष्यते ॥ ९ ॥ ननु तस्यामवस्थायामविद्यानिवृत्तिरप्यस्ति न वा न चेदविद्यैवेति तत्र
ति कथं केवलपरिशेषः ॥ अस्ति चेत्तर्हि निवृत्तिरपि परिशिष्यत इत्यत आह ॥ व्यवहारेति ॥ व्यवहारदृशाविद्यानिवृत्तिश्च
कथ्यते ॥ तत्त्वदृष्ट्या तु नाविद्या न निवृत्तिश्च हे सुराः ॥ १० ॥ ब्रह्मरूपतया ब्रह्म केवलं प्रतिभासते ॥ जगद्रूपतयाप्ये
तद्ब्रह्मैव प्रतिभासते ॥ ११ ॥ ब्रह्मरूपतया ब्रह्म केवलं प्रतिभासते ॥ विद्याविद्यादिभेदेन भावाभावादिभेदतः ॥ गुरु
शिष्यादिभेदेन ब्रह्मैव प्रतिभासते ॥ १२ ॥ ब्रह्मैवास्मीति विज्ञानं ब्रह्मप्राप्तेस्तु साधनं ॥ जगन्मायेति विज्ञानं मज्ञानफल

॥१०२॥

तो भवेत् ॥ १३ ॥ व्यवहारदृष्ट्यैवाविद्यानिवृत्तिश्च कथ्यते परमार्थदृष्ट्या तु तदुभयमपि नास्तीत्यर्थः ॥ अत एवोक्तमाचार्यैः ॥
अस्या विद्या विद्यायामेवास्तित्वं प्रकल्प्यते ॥ ब्रह्मदृष्ट्या त्वविद्येयं न कथंचन युज्यत इति ॥ किं तर्हि तत्त्वदृष्ट्या भासत इति ॥
तदाह ॥ तच्चेति ॥ एतच्च पंचमेध्यायेपि प्रतिपादितं व्यावहारिकमज्ञानमपि ब्रह्मैव वस्तुत इत्यादिना ॥ तस्मात्तत्त्वदृशा

॥१०२॥

स्वदृष्ट्या भावाभावादिभेदभिन्नं सर्वं जगत्कारणभूतं ब्रह्मात्मनैवावभासत इति प्रतिपादयति ॥ जगद्रूपेत्या
दिना ॥ अज्ञानफलत इति ॥ ब्रह्मात्मना यत्सर्वं जगद्विषयं ज्ञानं तद्ब्रह्मप्राप्तिसाधनं ॥ यत्तु ततोन्यत्वेन जगद्विषयं ज्ञा
नं केवलं तत्तदज्ञानमेव ॥ अन्यथावस्थितस्यान्यथाग्रहणादित्यर्थः ॥ १०।११।१२।१३ ॥ किमर्थं तर्हि आत्मन आकाशः संभू
त इत्यादिश्रुत्या सृष्टिः श्रुत्याभेदेन जगत्प्रतिपादनमित्यत आह ॥ तथापीति ॥ तथापि परमाद्वैतज्ञानस्य वक्तुं वेदनी ॥
उपकारकमत्यंतं दृष्ट्याव किंच श्रुतिः ॥ १४ ॥ जगदध्यारोपापवादाभ्यां सतो निष्प्रपंचमद्वैतं ब्रह्म प्रत्येतुं शक्यते ॥ अ

तस्मान्न रूपकारकत्वेन द्वैतं जगद्वर्णनीयमित्यर्थः ॥१४॥ ननु जगन्मिथ्याभूतं चेत्कथं तर्हि यावज्जीवमग्निहोत्रं जुहुयात् ॥ तमेतं वेदानु
वचनेन ब्राह्मणा विविदिषन्तीत्यादिका श्रुतिः ॥ साध्यसाधनभावं प्रतिपादयतीति तत्राह ॥ यथेति ॥ यथा जातस्वरूपेण सत्यत्वेन जग
द्धर्मेति ॥ जेऽपि ह्रुत्पहितमन्त्रणां कदापि द्विजिके सादरं ॥१५॥ सत्यत्वेन जगदङ्गीकृत्य सा श्रुतिः ॥ साध्यसाधनभावमात्रप्रतिपादनपरा
न तु तस्य पारमार्थिकं सत्यत्वं प्रतिपादयतीत्यर्थः ॥१५॥ सत्यत्वेन जगज्ज्ञानमित्याह ॥ सत्यत्वेन जगज्ज्ञानं संसारस्य प्रवर्तकं ॥ असत्
यत्वेन ज्ञानं तु संसारस्य निवर्तनं ॥१६॥ ततः संसारनाशाय कदाचित्स स्मृता श्रुतिः ॥ जगत्सर्वमिदं मायावदसत्यं तन्निर्मलं ॥१७॥
पारमार्थिके सत्यत्वेन जगज्ज्ञानं तु मिथ्याज्ञानत्वात्संसारहेतुः ॥ असत्यत्वेयानज्ञानं तु परमार्थत्वात्संसारनिवर्तकं परमं श्रु
तीरितं मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं ॥ इन्द्रो मायाभिः पुरुरूप ईयते मायामात्रमिदं द्वैतमात्रमित्यादिका सा श्रु
तिः ॥१६॥१७॥ अतो विभिन्नपक्षस्थितान पारूपमपेद्यसा ॥ सर्वं ब्रह्मेति कल्याणी श्रुतिर्द्वैतहीनं सादरं ॥१८॥ सर्वं ब्रह्मेति ॥ सर्वं खल्वि
दं ब्रह्म इदं सर्वं यदयमात्मेत्यादिका प्रतीयमानस्य सकलस्य जगतोऽखण्डैकरसब्रह्मात्मत्वं बोधयतीत्यर्थः ॥१८॥ ब्रह्मैव केवलं कृ

चा

द्विघते तत्त्वदर्शिने ॥ न चैव ध्यानवर्तिनं जगज्ज्ञानं चापरं ॥१९॥ अतः परमनिर्वाणनिष्ठस्य परयोगिनः ॥ यथा यथावभासो
ऽयं शिव एव न चापरं ॥२०॥ यथा यथावभासेति ॥ ब्रह्मनिष्ठस्य येन येन प्रकारेण जगत्प्रतिभासते स सर्वेणापि प्रकारेण
तत्साक्षीभूतः शिव एवावभासते ॥ न चान्यो लौकिकादिरित्यर्थः ॥२०॥ भूतपूर्वेति ॥ भूतपूर्वानुसंधानात्कथ्यते नु च वस्तु
तः ॥ यथा यथावभासोऽयं शिवदृष्टिस्य वेदनं ॥२१॥ नहि निर्वाणनिष्ठस्य शिवे स्य परयोगिनः ॥ यथा यथा न यत्र किंचि
सत्परमार्थतः ॥२२॥ तथा तथावभासेन स्वेन रूपेण केवलं ॥ स्थितिमितो दृष्टिवियोगी स्वयं निष्ठितिनान्यथा ॥२३॥ पू
यं सर्वं जगद्विषयावभासः सप्रविकारवदसत्वेन रूपाया बुद्धिः सापि भूतपूर्वं गत्यन्तदानीं सर्वस्य जगतो प्रतिभासतात् ॥

त्मनापूर्वगता श्रवणेनेद्र॥ या बुद्धिः सापि तत्तत्पूर्वगा सा तदानीं संकल्पयंत्रवती स्याह॥ यथेति॥ इदं निबंधस्य वेदनस्यापि निधाकार्यस्येनकार
णनिवस्यानन्तरत्वात् इत्यर्थः॥ अस्ति भिनोद् धिवर्दिता॥ निस्तरंगसमुद्रवृद्धिक्षेपहेतोर्दैततासावादस्यंतनिर्विकल्पेन चिदानंदेकरसत्वम
वेनानिश्चल्तीतिष्ठतीत्यर्थः॥२३॥ परनिर्वाणनिष्ठस्य योगिनः परमास्थितिः॥ स्वयं चनोविजानाति नेहारिर्नमहेश्वरः॥२४॥ स्वयंचनवि
जानातीति॥ स्वप्रकाशे आत्मन्यमनावस्थितस्य विदुषो विज्ञानहेतुनामंतःकरणादीनां विधाकार्यत्वाद्विधानिवर्त्तनात्स्वयं विद्वानपि ता
मवस्थां कर्मकर्तृभावेन न जानातीत्यर्थः॥२५॥ नमयाम्ब पुनि शक्यते योगिनः स्थितिः॥ नापि वेदेन मौनेन नापि स्मृतिपुराणकैः॥२५॥
अहो निर्वाणनिष्ठस्य योगिनः परमास्थितिः॥ पादशापरमानिष्ठादृश्यविहिकेवलं॥२६॥ एवं रूपापरानिष्ठा शिवस्यातिस्य सावनः॥
शिवायाश्चाविसतुः प्रसादेनहरेरपि॥२७॥ तथाममापिच्चान्येषां नचाप्तिमिहेश्वरः॥ तादृरूपो महादेवः खलु सा साक्षात्ननः॥२८॥
इदृशापरमानिष्ठागुरोः साक्षान्निरीक्षणात्॥ कर्मसाम्ये लनायासासिद्ध्यत्येव न संशयः॥२९॥ कर्मसाम्येत्वनायासादिति॥ कर्मणो
सुकृतदुःकृतयोः फलभोगेन क्षयसाम्ये सतीत्यर्थः॥ उक्तंहि॥ जंतोः पश्चिमजन्मनः स्मृतिकर्मसाम्ये इति॥२८॥ देशिकं देवदेवेशं शिवविं
धार्द्धचक्रमं॥ णः॥ नदिव्यं सर्वयत्नेन प्रकुर्यात् सर्वदादरात्॥३०॥ स्वस्यानिष्टमपि प्राज्ञः प्रकुर्याद्गुणोदितः॥ गुरोरिष्टं प्रकुर्वाणः पर
निर्वाणमश्नुते॥३१॥ स्वाश्रमं च स्वजातिं च स्वकीर्तिं पालनं तथा॥ स्वादृष्टं बंधुपुत्रादिसंगमं॥३२॥ गृहक्षेत्रधनादीनां
मानिं देशं स्वतया॥ अनवेक्ष्य गुरोरिष्टं कुर्यान्नित्यमतंद्रितः॥३३॥ गुरौ प्रीते शिवः साक्षात् प्रसन्नः प्रीतिमान् सतो॥ गुरोर्देहे महा
देवः सांबः सन्निहितः सदा॥३४॥ गुरोरनिष्टं मोहाद्वा न कुर्यात्कुरुते यदि॥ पच्यते नरके घोरे यावदाभूतसंप्लवं॥३५॥ शि
वे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन॥ तस्मादिष्टं गुरोः कुर्यात् पालितो येन मस्सागिरा॥३६॥ गुरुर्नमानो नान्यः सत्यमेव न संशयः॥
श्रीकलाभास्करोक्तौ सानास्ति नास्ति न संशयः॥३७॥ आत्मनोनान्यदृतिपरमात्मनव्यतिरिक्तः॥ स एव गुरुर्मूर्तिमास्थायावतिष्ठते॥
उक्तंहि॥ न लभ्यकारोयोजयति परे नत्वसदोच्यापाचार्यमूर्तिस्थ इति॥३७॥ ज्ञानास्वरूपं देहादियोददातीपितानुमः॥ नगुरुः

नो२ सौ२

ता९ ७क ये४ ९५॥ हे १०२॥ ॥१०२ रु

कथितः प्राज्ञैः क्लेशहेतुप्रदो हि सः ॥ ३८ ॥ अष्टैश्वर्यप्रदस्तद्वद्गंधर्वादिसुखबुद्धिप्रदः ॥ सार्वभौमपदस्यापि न गुरुः क्लेशदो हि सः ॥ ३९ ॥ मैत्रतं आदिहस्त
वल्लौकिकोपायदस्तथा ॥ न गुरुः कथितः प्राज्ञैः क्लेशहेतुप्रदो हि सः ॥ ४० ॥ स सत्यवन सकलं भातं निश्चयास स्वरूपतः ॥ सर्वं स्वाश्रिततया सामान्यविभज्यपर
चेतनौ ॥ ४१ ॥ सत्यवत्सकलमिति ॥ स घटः स पट इत्यादिना सत्यव सातिभातमपि कृत्स्नं द्वैतरूपमस्य स्वरूपेण निश्चित्य स्वदेहेन्द्रियादिसंघातसाक्षी
चिन्मात्ररूपमात्मानं ततो विभज्यानवच्छिन्नचिदात्मकं यत्परं ब्रह्म तत्त्वमसीति वेदान्तमहावाक्यलक्षणेन प्रदीपेन एवं ब्रह्मात्मतत्त्वं प्रबोधयति ॥ ४१ ॥
य स्वं तदिति वेदान्तप्रदीपेन स्वकं निजां शिवत्वं बोधयत्येष गुरुः साक्षान्न चापरः ॥ ४२ ॥ एष एव साक्षाद्गुरुर्नान्य इति ज्ञोपदंशे वाच्छिन्ननिरतिशया
नंदावाप्तिलक्षणस्य पुरुषार्थस्य प्रापकत्वादित्यर्थः ॥ एतदेव प्रपंचयति ॥ द्वय रूपमित्यादिना ॥ द्वयरूपमिदं सर्वं द्वयरूपेण विज्ञाप्य च ॥ द्वयरूपं ब्रह्म यो
वक्ति स गुरुर्नापरः पुमान् ॥ ४३ ॥ परमाद्वैतविज्ञानं कृपयैव ददाति यः ॥ सोऽयं गुरुर्गुरुः साक्षाच्छिव एव न संशयः ॥ ४४ ॥ गुरुरिति ॥ गुरवः पित्राद्या
स्तेषां मध्ये सोऽपि विद्वान्गुरुः ॥ तादृशं देशिकं साक्षाद्देवी तं बुजभास्करी तोषयेत्सर्वयत्नेन श्रेयसे भूयसे नरः ॥ ४५ ॥ प्रतिज्ञातमर्थमुपसंहरति ॥ सर्ववेदांते
ति ॥ सर्ववेदांतवाक्यानामर्थः संग्रहरूपतः ॥ कथितस्त्वमया देवा मम माह परमेश्वरः ॥ ४६ ॥ सर्वज्ञः सर्ववित्साक्षात्सकामः कृपाकरः ॥ सर्वदोषविनि
र्मुक्तः स्वयमेवाब्रवीन्मम ॥ ४७ ॥ यथाह सर्ववेदानामर्थं सर्वज्ञ ईश्वरः ॥ तथैव कथितोऽस्माभिः स्वयमेव न संशयः ॥ ४८ ॥ स्वप्रकाशस्वरूपस्य
स्वतः सिद्धस्य शूलिनः ॥ करामलकवत्सर्वं प्रत्यक्षं हि न संशयः ॥ ४९ ॥ वेदानामन्यथैवार्थं ये वदंति विमोहिताः ॥ महासाहसिका एव तेन
तानीह संशयः ॥ ५० ॥ मदुक्तार्थं स्वक्त्वा प्रकारेण विनाये प्रवदंति ते ॥ अंधकूपे निरालंबे पतंत्येव न संशयः ॥ ५१ ॥ वेदार्थः परमाद्वैतं नेतरत्सुरपुं
गवाः ॥ नो चेद्देवैरयं युष्माकं च पतिष्यति ॥ नो चेत्स्त्रैकुन्माकं मे मूर्धा पतिष्यति न संशयः ॥ ५२ ॥ अन्यथा वेदवाक्यानामर्थं इत्सुभिर्वांकयो ॥ अ
निश्चितार्थो मूर्धा युष्माकं च पतिष्यति ॥ ५३ ॥ इतः परं न वक्तव्यं विद्यते सुरपुंगवाः ॥ सत्यमेव मयाप्रोक्तं भो भोः पादौ स्पृशाम्यहं ॥ ५४ ॥ स्पष्टोऽर्थः ॥
एवमुक्ते सादिम स्कतवाक्यो ॥ स्कतउवाच ॥ एवमुक्त्वा महातेजा ब्रह्मा च स्मरपुंगवान् ॥ प्रत्यगात्मं तं परानंदं पार्वतीपतिमीश्वरं ॥ ५५ ॥ परमाद्वैतस्व

पंतंभवरोगस्य भेषजं ॥ स्मृत्वा न त्वां पुनः स्मृत्वा भक्त्या परवशो भवत् ॥ ५६ ॥ देवश्च देवदेवेशं स्मृत्वा सांबं त्र्यंबकं ॥ प्रणम्य दंडवद्भूमौ विवक्त्राऽ
भवन्मुदा ॥ ५७ ॥ देवदेवो महादेवो नत कारुणिकोत्तमः ॥ तत्रैवाविरभूद्देव्या सहस्रस्य तपोधन ॥ ५८ ॥ विष्णुश्च पद्मया सार्धं तत्रैव ब्रह्मवित्तमाः ॥ आ
गतो भगवान्रुद्रः सुमशो वस्करनायकः ॥ ५९ ॥ पुष्पवृष्टिरभवत्तथा पुरास्त्वस्तिश्च र्वेव चेनानि चाभवन् ॥ तत्र भक्तिसहितेन विष्णुना पद्मया च परिपूजि
तः शिवः ॥ ६० ॥ ब्रांकरोपि चाशिरा सेश्वरः परस्त्वं वयैव सहितः सनातनः ॥ तत्र चन्द्रसमकरोदपि प्रभुः स्वस्वरूपपरवेदनप्रियात् ॥ ६१ ॥ सर्वलोक
जननी शिवा परा पापनाशकरबोधदायिनी ॥ ब्रह्मवज्रधररुद्रकाग्निमारुत्वानुभूतिसहितेन चक्षुषा ॥ ६२ ॥ त्रिलोक्यकारुण्यबलेन केवलं प्र
प्रबोधयामास सुरोत्तमानिमान् ॥ पुनः प्रजानाथपुरःसराः सुराः प्रणम्य मानं तु शिवां शिवामपि ॥ ६३ ॥ त्वं च कृत्यदक्षुषैव ददृशुः श्रुतिमस्तके
श्च विज्ञानरूपपरलोचगोचरा ॥ भक्त्या पुनः परमकारुणिकं महांतं पंचाक्षरेण भवपाशहरेण भक्त्या ॥ ६४ ॥ तुष्टुवुः श्रुतिवचोभिरादरान्न
ष्टकष्टभवपाशबंधनाः ॥ इष्टसिद्धिरभवद्दिवः सुरा इत्यवोचदमुभाऽपहः शिवः ॥ ६५ ॥ ब्रांकरी चैरणागतप्रियाबंधहेतुमलनाशकारिणी ॥ सा
मत्प्रसादबललब्धवेदना इत्यवोचदभवन्नातिप्रियाः ॥ ६६ ॥ केशवोऽपि स्कपुंगवान्प्रति प्राहचांबुरयमद्भुतः प्रभुः ॥ सर्ववेदशिरसामगो
चरः प्रीत एव भवतामितिर्द्विजाः ॥ ६७ ॥ देवोऽपि कारुण्यरसार्द्रमानसः सुरानशेषानजपूर्वकानपि ॥ उवाच गीतामति शोभनामिमां मम मातु
कृत्वामपि यः पठेद्द्विजः ॥ ६८ ॥ स याति मामेव निरस्तबंधनः परः शिवाख्याचिस्त्वदैव वर्तते ॥ देवा मुनेर्मोपि समस्ततेजसा श्रियामुकुं
देन समः स एव भवेत् ॥ ६९ ॥ एषा गीता ब्रह्मगीताभिधाना श्रेया सूक्ष्मा सर्वगीतोत्तमा च ॥ वेदाशीशा वेदनिष्ठैर्द्विजेंद्रैः पैर्न्यापाठ्या नैव भ
क्तादिभिः स्वा ॥ ७० ॥ इत्येवं परमशिवः प्रभाष्य नाथः शिष्टानामशुभहरः पुरत्रयारिः ॥ भक्तानामतुलसुखप्रबोधकं वैस्फुरणसुखे फैः रीत
तिरोबभूव ॥ ७१ ॥ देवी सा सकजगद्विचित्रा कारुण्यादखिलसुरान् नरान् जांविलोक्य ॥ सुप्रीता परमसुखप्रबोधरूपा तत्रैव स्फुरणसु
खे तिरोबभूव ॥ ७२ ॥ विष्णुर्लक्ष्म्या साकमाभास्य देवो हृष्टात्मा स्वस्ववैकुंठमाप ॥ ब्रह्मा देवानामसौ वेध्याभियुक्तो स्य स्यकारुड्रे

चित्रा २ ने

निश्चेव भव॥७७॥ देवाः सर्वे दंडवद्भूमिभागे भक्त्या सार्धं पद्मयोनिं प्रणम्य। प्रहृष्टात्मानः सत्यबोधैकनिष्ठान् सद्यः स्वं स्वं देशमी
युर्हृष्टचित्ताः॥७८॥ इमां सौम्यब्रह्मगीतां प्रबुद्धिः श्रुत्वा ज्ञानेनादरेणाश्रुतैव। मर्त्यः श्रद्धाभक्तियुक्तस्य विप्रा निःसंदेहानंतरस्याति शुद्धा॥७९॥
इति परशिवभक्त्या प्रोक्तनिःपक्षपातः सुरवधनिवृत्तत्वः प्राप्तिकामेन गीतां। मुनिगणहितबुद्ध्या भाष्यनिर्वाणरूपं परतरमवलोक्य
प्रस्तयामो नमामः॥८०॥ मुनयश्च गुरुं परवेदिनं प्रणिपत्य समस्तहितप्रदं। हृदयांभोजस्थमहं पदं लक्षितं परतत्त्वतयैव विदुः स्थिरं॥८१॥
इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञवैभवखंडे ब्रह्मगीतासूपनिषत्सु द्वादशोऽध्यायः॥ छ॥ इति परशिवभक्त्येति कविवाक्यं॥
इति श्रीमत्काशीविलासश्रीक्रियाशक्तिपरमभक्तश्रीमत्त्र्यंबकपादाब्जसेवापरायणेनोपनिषन्मार्गप्रवर्तकेन माधवाचार्येण विर
चितायां सूतसंहितायां तात्पर्यदीपिकायां यज्ञवैभवखंडस्योपरिभागे ब्रह्मगीताव्याख्यायां द्वादशोऽध्यायः॥१२॥ छ॥ छ॥ छ॥
॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥ तत्सद्ब्रह्मार्पणमस्तु॥ छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥

208

[OrderDescription]
,CREATED=27.08.20 13:52
,TRANSFERRED=2020/08/27 at 14:28:14
,PAGES=208
,TYPE=STD
,NAME=S0003553
,Book Name=M-1512-BRAHAMGEETA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF

FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF

FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF

FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF

FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF

FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF

FILE208=00000208.TIF
,